# विश्वविद्या

अन्ताराष्ट्रियस्तरे मानिता, सन्दर्भिता प्रवरसमीक्षिता च शोधपत्रिका

Internationally Recognized Refereed & Peer reviewed Research Journal



VEDIC-VEDANTIC STUDIES & RESEARCH INSTITUTE, NEW DELHI.

ज्ञानेनैव परं पदम्

VOL. 1

वेद-वेदान्त-अध्ययन-शोधसंस्थानम्, नवदेहली.

2022-2023

# भारतीयदर्शनं प्रति मध्वाचार्याणां योगदानम्

**प्रो.हरिप्रसाद अधिकारी**[१]

**श्रीमन्मध्वमते हरिः परतरः सत्यं जगत् तत्त्वतो**
**भेदो जीवगणा हरेरनुचरा नीचोच्चभावं गताः ।**
**मुक्तिर्नैजसुखानुभूतिरमला भक्तिश्च तत्साधनम्**
**ह्यक्षादित्रितयं प्रमाणमखिलाम्नायैकवेद्यो हरिः ।।**

भारतीयदर्शनेषु माध्वदर्शनस्य विद्यतेऽनितरसाधारणं वैशिष्ट्यम्। आनन्दतीर्थ-पूर्णप्रज्ञ-वासुदेवप्रभृतिभिः नामभिः ख्यातिं गताः स्वामिवर्याः सर्वशास्त्रनिष्णाता आसन् । ब्रह्मसूत्रभाष्य-अनुव्याख्यान-उपनिषद्भाष्य-गीताभाष्य-महाभारततात्पर्यनिर्णय-भागवततात्पर्यनिर्णय-प्रमाणलक्षण-कथा-लक्षण-उपाधिखण्डन-मायावादखण्डन-प्रपञ्चमिथ्यात्वानु-मानखण्डन-तत्त्वोद्योत-तत्त्वविवेक-तत्त्वङ्ख्लान-विष्णुतत्त्वविनिर्णय-तन्त्रसारसङ्ग्रह-कृष्णामृतमहार्णव-यतिप्रणवकल्प-सदाचारस्मृतिप्रभृतयो नैके ग्रन्थाः स्वामिवर्यैः प्रणीताः । आचार्यैः सप्तत्रिंशत् (३७) ग्रन्थाः प्रणीता इति विद्वांसो मन्यन्ते । अस्यां परम्परायां पद्मनाभतीर्थ-नरहरितीर्थ-माधवतीर्थ-अक्षोभ्यतीर्थ-त्रिविक्रमपण्डित-नारायणपण्डित-जयतीर्थ-विजयध्वजतीर्थ-व्यासतीर्थ-वादिराजतीर्थ-विजयीन्द्रतीर्थ-राघवेन्द्रतीर्थ-वेदाङ्गतीर्थ-सत्यधर्मतीर्थ-विश्वपतितीर्थ-व्यासतीर्थ-विद्याधीशतीर्थ-वेदनिधितीर्थ-सत्यनिधितीर्थ-सत्यनाथतीर्थ-

१.आचार्योऽध्यक्षश्च तुलनात्मकधर्मदर्शनविभागः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

वनमालीमिश्रप्रमुखाः पारेशतमाचार्याः स्वसारस्वत-साधनया माध्वपरम्परां सम्पोषितवन्तः । माध्वदर्शने पञ्चविधभेदाः स्वीकृताः । प्रतिपादितश्चैतद् विष्णुतत्त्वविनिर्णये—

**जीवेश्वरभिदा चैव जडेश्वरभिदा तथा ।**

**जीवभेदो मिथश्चैव जडजीवभिदा तथा ।।**

**मिथश्च जडभेदोऽयं प्रपञ्चो भेदपञ्चकः ।**

**योऽयं सत्योऽप्यनादिश्च सादिश्चेन्नाशमाप्नुयात् ।।**

माध्वदर्शने चतुर्विधा शक्तिः स्वीकृता-

ताश्चाचिन्त्याधेयसहजपदशक्तिनाम्ना विख्याताः । भगवान् विष्णुरेवात्र परमात्मा, तदवतारा अपि तदभिन्ना एव । यथोक्तं–

**अवतारादयो विष्णोः सर्वे पूर्णाः प्रकीर्तिताः ।**

**पूर्णं च तत्परं पूर्णं पूर्णात् पूर्णाः समुद्गताः ।।**

भगवती लक्ष्मीः भगवत्प्रेरणया सृष्टिस्थित्यादिकार्याणि सम्पादयति । इयं लक्ष्मीः भगवतः शक्तिरस्ति । परमात्मभिन्ना तन्मात्राधीना लक्ष्मीः । परमात्मनः कृपयैव लक्ष्मीः सृष्ट्यादीनामष्टकार्याणां सम्पादनं करोति । सा अनादिनित्या अनादिमुक्ता च स्वीकृता । साप्तकामा भगवद्भक्तिस्वरूपा चास्ति ।

जीवश्चात्र त्रिविधः प्रतिपादितः -

१. मुक्तियोग्यः २. नित्यसंसारी ३. तमोयोग्यश्च

मुक्तिदशायामपि जीवेषु तारतम्यं स्वीकृतं माध्वदर्शने-

**मुक्ताः प्राप्य परं विष्णुं तद्देहं संश्रिता अपि ।**

**तारतम्येन तिष्ठन्ति गुणैरानन्दपूर्वकैः ।।** (गीतामाध्वभाष्ये)

सालोक्य - सामीप्य - सारूप्य - सायुज्यभेदेन परममुक्तेश्चातुर्विध्यं स्वीकृतमत्र । एवमेव सामान्यमुक्तेरपि-कर्मक्षय-उत्क्रान्ति-अर्चिरादि-गमन-भोगभेदैश्चातुर्विध्यं निरूपितम् ।

माध्वदर्शने स्वतन्त्र-परतन्त्रभेदेन द्विविधं तत्त्वं स्वीक्रियते । स्वतन्त्ररूपेण अशेषसद्गुणः दोषरहितः भगवान् विष्णुः विराजते । उक्तश्च—

**स्वतन्त्रं परतन्त्रं च द्विविधं तत्त्वमिष्यते ।**

**स्वतन्त्रो भगवान् विष्णुः निर्दोषोऽशेषसद्गुणः ।।**

अद्वैत-वेदान्ते जगतः भ्रान्तिमयत्वं भ्रान्तिरूपत्वं वा कल्प्यते । वस्तुतः पारमार्थिकदशायां जगतः सत्तैव नाङ्गीक्रियते । द्वैतज्ञानमेव बन्धनकारणमिति मन्यन्तेऽद्वैतिनः । किन्तु माध्वदार्शनिकाः अद्वैत-विपरीतं द्वैतं सिषाधयिषन्ति । तद्यथा-

**न च नाशं प्रयात्येष न चासौ भ्रान्तिकल्पितः ।**

**कल्पितश्चेन्निवर्तेत न चासौ विनिवर्तते ।।**

अपि च—

**द्वैतं न विद्यत इति तस्मादज्ञानिनां मतम् ।**

**मतं हि ज्ञानिनामेतन्मितं त्रातं हि विष्णुना ।।**

माध्वदर्शने श्रीपतिविष्णुरेव परमतत्त्वरूपेण स्वीक्रियते । धर्मार्थ-काममोक्षाख्येषु चतुर्षु पुरुषार्थेषु मोक्ष एव परमपुरुषार्थः । यथोक्तम्—

**मुख्यं च सर्ववेदानां तात्पर्यं श्रीपतौ परे ।**

**उत्कर्षे तु तदन्यत्र तात्पर्यं स्यादवान्तरम् ।।**

अपि च—

**धर्मार्थकामाः सर्वेऽपि न नित्या मोक्ष एवहि ।**

**नित्यस्तस्मात् तदर्थाय यतेत मतिमान्नरः ।।**

तत्त्वमसीति वाक्यस्य अद्वैतपरत्त्वं साधितमद्वैतवेदान्ते । माध्वाः तन्नैव स्वीकुर्वन्ति तद्यथोक्तम्—

**आह नित्यपरोक्षं तु त्वच्छब्दो ह्यविशेषतः।**

**त्वं शब्दश्चापरोक्षार्थं तयोरैक्यं कथं भवेत् ?**

**जीवस्य परमैक्यं तु बुद्धिसारूप्यमेव तु ।**

**एकस्थाननिवेशोऽत्र व्यक्तिस्थानमपेक्ष्य सः ।।**

जीवेश्वरयोर्भिन्नत्वं स्वीकृतं माध्वदर्शने । यथाहि-

**यथाज्ञो जीवसङ्घश्च प्राणादेश्च नियामकः ।**

**तथा जीवेश्वरौ भिन्नौ सर्वदैव विलक्षणौ ।।**

इत्थं माध्वदर्शने सर्वदर्शन-विलक्षणं तत्त्वं श्रुत्याधारेण साधितम्। व्यासतीर्थप्रभृतीनां सर्वतन्त्रस्वतन्त्राणां माध्वमतानुयायिनां तर्कोपबृंहिताः नैके ग्रन्था विलसन्ति। येषु अद्वैतप्रभृतीनां महतोत्साहेन खण्डनं कृतं विद्यते। आचार्येण मधुसूदनसरस्वतीमहोदयेन न्यायामृतग्रन्थस्य खण्डनार्थम् अद्वैतसिद्धिर्विरचिता। व्यासतीर्थस्य अपरेऽपि तर्कताण्डव-तात्पर्यचन्द्रिका-मन्दारमञ्जरी-भेदोज्जीवन-ग्रन्था विलसन्ति। न्यायामृत-

माश्रित्य विद्वद्भिः दशटीकानां रचना कृता । इत्थं माध्वदर्शनकारणादेव भारतीयदर्शने खण्डन-मण्डनपरम्परा सम्यक् प्रावर्तत । यदि माध्वदर्शनं नाभविष्यत् तदा अद्वैतसिद्धिप्रभृतीनां ग्रन्थानामुत्पत्तिरपि नाभविष्यत् । खण्डन-मण्डन प्रक्रिययैव सर्वेषां भारतीयदर्शनानां विकासो दरीदृश्यते । यथाहि बौद्धैः, जैनैः सहाप्यद्वैतादिवैदिकदर्शनानां लम्बायमाना पारेसहस्रवर्षव्यापिनी वादविवादपरम्परा दृश्यते । अतः शास्त्रार्थ-प्रक्रिया शास्त्रकलेवरवर्धने सुतरामुपयोगिनी विद्यत इति वक्तुं शक्यते। सर्वाणि दर्शनानि स्वानुबन्धचतुष्टय्याधारेण चिन्तने प्रवर्तन्ते । अतः प्रत्येकं दर्शनस्य हार्दं तदैव विज्ञातुं शक्येत यदा तदनुबन्धचतुष्टयबोधो जायेत । एतद्विवेचनाधारेण निर्भ्रान्ततया वक्तुं शक्यते यद् भारतीयदर्शनं प्रति मध्वाचार्याणां विद्यते महानुपकारः ।

**सहायकग्रन्थसूची**


१. सर्वदर्शनसङ्ग्रहः - माधवाचार्यस्य

२. द्वादशदर्शनसङ्ग्रहः - स्वामिकाशिकानन्दगिरिमहोदयस्य
स्वामी काशिकानन्दजी ट्रस्ट, मुम्बई, १९८८

३. भारतीय दर्शन की चिन्तनधारा - प्रो.राममूर्ति शर्मा, मणिद्वीप
प्रथम संस्करणम्, १९९९ ।

४. भारतीय दर्शन का परिशीलन - डॉ.रमाशङ्कर त्रिपाठी
भारतीय विद्या संस्थान वाराणसी, वि.सं. २०५७

५. ब्रह्मसूत्रशाङ्करभाष्यम् - चौखम्बा संस्कृत प्रतिष्ठान, १९८८

६. भारतीय दर्शन - प्रो.बी.एन.सिंह, पूर्वाचार्य दर्शन विभाग,
काशी हिन्दू विश्वविद्यालय, वाराणसी ।

# वेदान्तसम्प्रदाये मध्याचार्यस्य दृष्टिः

**प्रो. के. अनन्तः**
विशिष्टाद्वैतवेदान्तविभागः
श्री. ला. ब. शा. रा. सं. विश्वविद्यालयः
नवदेहलीः-१६

दृश्यते ज्ञायते परमतत्त्वमनेन इति व्युत्पत्त्या दृश् धातोः ल्युट् प्रत्यये कृते सति दर्शनशब्दस्य निष्पत्तिर्भवति। तच्च दर्शनं भारतीयप्रस्थाने वैदिकावैदिकभेदेन द्विविधं भवति। ये खलु वेदस्य सत्तां नाभ्युपगच्छन्ति ते अवैदिकाः भवन्ति। अवैदिकदर्शनानि तावत् चार्वाक-वौद्ध-जैनदर्शनानि भवन्ति। ये खलु वेदस्य सत्तां स्वीकुर्वन्ति ते वैदिकाः भवन्ति। वैदिकदर्शनानि तावत्सांख्य-योग-न्याय-वैशेषिक-मीमांसा-वेदान्तदर्शनानि भवन्ति। तेषु वैदिकदर्शनेषु वेदान्तदर्शनस्य महत्त्वं-वैशिष्ट्यञ्च सततं विद्यत इह खलु जगति। वेदान्तस्य बहवः प्रस्थानभेदाः विद्यन्ते। तत्र वेदान्तस्य ब्रह्मसूत्रमधिकृत्य शङ्कराचार्यैः अद्वैतसिद्धान्तस्य, श्रीरामानुजाचार्यैः विशिष्टाद्वैतसिद्धान्तस्य, वल्लभाचार्यैः शुद्धाद्वैतसिद्धान्तस्य, मध्वाचार्यैस्तु द्वैतसिद्धान्तस्य च समुद्भावनं कृतम्। अत एव द्वैतसिद्धान्तस्य प्रवर्तकः मध्वाचार्य इति जगति प्रसिद्धो विद्यते। वायुदेवस्य अवतारभूताः इमे आचार्या आनन्दतीर्थः पूर्णप्रज्ञो वा इति नाम्ना प्रसिद्धाः सन्ति। इमे आचार्याः द्वैतसिद्धान्तप्रतिष्ठापनाय बहूनां ग्रन्थानां विरचनं कृतवन्तः। तेषु ग्रन्थेषु

महाभारततात्पर्यनिर्णयः, प्रमाणलक्षणम्, कथालक्षणम्, मिथ्यात्वानुमानखण्डनम्, उपाधिखण्डनम्, मायावादखण्डनम्, तत्त्वसङ्ख्यानम्, तत्त्वोद्योत इत्यादयः ग्रन्थाः प्रसिद्धाः सन्ति। तत्र पूर्णप्रज्ञाचार्यमते द्रव्य-गुण-कर्म-सामान्य-विशेष-अभाव-विशिष्ट-अंशी-शक्ति-सादृश्यभेदेन दश पदार्थाः विद्यन्ते। एतेषां मते परमात्मा सर्वज्ञः सर्वद्रष्टा सर्वस्रष्टा च भवति। तत्र लक्ष्मीः पत्नी एव। ब्रह्मादयः पुत्राः भवन्ति। श्रीदुर्गादयः लक्ष्म्याः मूर्त्तिभेदाः भवन्ति। जीवस्य भेदत्रयं तावत् मुक्तियोग्यः, तमोयोग्यः नित्यसंसारी च।

मध्वाचार्यैः प्रस्थानत्रयस्य भाष्यं लिखितम्। व्याससूत्रमाधरीकृत्य अनुभाष्यं लिखितम्। मध्वभाष्यस्य व्याख्या जयतीर्थाचार्यैः कृता। प्रस्थानेऽस्मिन् व्यासतीर्थस्य मौलिकग्रन्थो विद्यते तात्पर्यचन्द्रिका। भक्तिः कर्म च मोक्षस्य साधनं भवति। उपनिषद्विद्याध्ययनस्य प्रयोजनं तावत् जीवात्मा परमात्मानं प्राप्नोतीति अत्र आचार्याणां दृढविश्वासो विद्यते। इयं विद्या जन्ममरणादीनां उपद्रवाणां नितान्तनाशाय प्रभवति। संसारबीजभूतायाः अविद्यायाः तज्जनितसंस्कारस्य च नाशः विद्यया अनया सिद्ध्यति। अतः उपनिषद्विद्या परात्मविद्या भवति। उपनिषद्भाष्यविषये मध्वाचार्यः इतरव्याख्यातॄन् अपेक्ष्य आत्मनः प्रभावं प्रकटयति। ऐतरेयोपनिषदः अध्यायत्रयाय परं व्याख्यानम् अन्यैः आचार्यैः लिखितं दृश्यते। किन्तु ऐतरेयोपनिषदः मध्वाचार्यस्य व्याख्यानं साङ्गोपाङ्गम् आवहति। माण्डूक्योपनिषन्मध्ये दृश्यमानाः कारिकाः गौडपादप्रणीता इति अन्ये आमनन्ति। किन्तु

रामानुजमध्वाचार्यौ तादृशं विश्वासं विहाय ताः कारिकाः उपनिषदः भागत्वेन स्वीकुरुतः।

गद्यरूपेण लब्धं प्रमाणलक्षणनामकं पुस्तकं यद्यपि लघुग्रन्थः तथापि विषयप्राधन्यात् महत्तमं भवति। कथालक्षणं नाम पुस्तकं श्लोकरूपे निबद्धा वर्तते। कथालक्षणं तु शास्त्रचर्चायाम् अवश्यं स्वीकरणीयान् नियमान् व्यवस्थाविशेषांश्च प्रतिपादयति। ग्रन्थेऽस्मिन् पञ्चविंशति-श्लोकाः विद्यन्ते। श्रुतिस्मृतिपुराणादिषु कृतिषु यानि आचारानुष्ठानानि कथितानि तानि कृष्णामृतमहार्णवः, तन्त्रसारसङ्ग्रहः, सदाचारस्मृतिः, जयन्तीनिर्णयः, यतिप्रणवकल्पः, न्यासपद्धतिः, तिथिनिर्णयप्रभृतिषु ग्रन्थेषु सुतरां प्रतिपादितानि वर्तन्ते। नरसिंहनखस्तुतिः, द्वादशस्तोत्राणि प्रभृतीनि पुस्तकानि स्तुतिविभागे अन्तर्भवन्ति। बाल्यकाले कन्दुकक्रीडां प्रति रचितः 'कन्दुकस्तुति' नामकः लघुग्रन्थश्च आचार्यविरचितो दृश्यते। उक्तानां लघुग्रन्थानाम् उपरि महात्मना अनेन विरचितं प्रस्थानत्रयभाष्यं तेन विरचितेषु ग्रन्थेषु मध्ये सर्वातिशायि वर्तते।

द्वैतमते द्विविधं तत्त्वं स्वतन्त्रपरतन्त्रभेदात्। तदुक्तं ''तत्त्वविवेके''-

**स्वतन्त्रं परतन्त्रञ्च प्रमेयं हिविधं मतम्।**
**स्वतन्त्रो भगवान् विष्णुः निर्दोषखिलसद्गुणः[१] ॥**

हरेः सर्वोत्तमत्वमेव श्रीमन्मध्वाचार्येण संस्थापितं बहुभिः प्रमाणैः— यथा ''यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति।

१. तत्त्वविवेकः

यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व तद्ब्रह्म''[२], ''ईशावास्यमिदं सर्वम्''[३]

स्मृतिश्च—

**एष सर्वेषु भूतेषु गूढो आत्मा न प्रकाशते''[४]**

**अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ।**

**मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय ।।**

**मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव[५]**

**यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः।**

**अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः[६]।।**

श्रीमन्मध्वाचार्यः विष्णुरेव परब्रह्मेति श्रुतिस्मृत्यादिभिः स्पष्टीकरोति । यथा– ''अग्निर्वै देवानामवमो विष्णुः परमः''[७]

**''तद्विष्णोः परमं पदम्''[८]**

**''परं पदं वैष्णवमामनन्ति''[९]**

२. तै. उपनिषद्

३. ई. उपनिषद्

४. कठोपनिषद्

५. श्रीमद्भगवद्गीता ७-६

६. श्रीमद्भगवद्गीता १५-१८

७. ऐतरेयब्राह्मणम्

८. कठोपनिषद्

९. भागवतम् २/५/१४

**द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ।**

**वासुदेवात् परो ब्रह्मन् न चान्योऽर्थोऽस्ति तत्त्वतः ।।[१०]**

**विभुत्वात् विष्णुरुच्यते ।।[११]**

**विश प्रवेशने धातुस्तत्र स्नुप्रत्ययादनु ।**

**विष्णुर्यः सर्वदेवेषु परमात्मा सनातनः ।।[१२]**

**ब्रह्मशब्दश्च विष्णावेव ।।[१३]**

श्रीमध्वाचार्यः जगतः सत्यत्वं श्रुतिबलेन स्वकीयग्रन्थेषु संस्थापयति। यथा—

**''विश्वं सत्यम्''[१४]**

**''यच्चिकेत सत्यमित् तन्नमोघम्''[१५]**

**''कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान्**

**व्यवधाच्छाश्वतीभ्यः समाभ्यः''[१६]**

**''प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि।**

**विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान्''[१७]**

---

१०. भागवतम् २/५/१४

११. कूर्मपुराणम् १/८/११

१२. वराहपुराणम् ७२/५

१३. ब्रह्म. सू.

१४. ऋग्वेदः २/२५

१५. ऋग्वेदः

१६. उपनिषद

भेदवादी मध्वाचार्यः ''तत्त्वतो भेदः'' इति वाक्येन भेदं स्पष्टीकरोति तद्यथा——

''भेदस्तु स्वरूपदर्शन एव सिद्धः। प्रायः सर्वतो विलक्षणं हि पदार्थस्वरूपं दृश्यते''[१८] आचार्येण पञ्चविधो भेदः स्पष्टतया निरूप्यते। यथा——

**जीवेशयोर्भिदा चैव जीवभेदः परस्परम्।**

**जडेशयोर्जडानां च जडजीवभिदा तथा[१९]॥**

जीवगणाः अथवा जीवात्मानः हरेः (विष्णोः) अनुचराः अर्थात् सेवकाः इति द्वैतमतम्। यथा-

**''तद्विजिज्ञासस्व तद् ब्रह्म''**[२०]

हरिरेव जीवेभ्यः मोक्षप्रदायक इति आचार्यमतम्।

**''नायमात्मा प्रवचनेन लभ्यो न मेध्या न बहुना श्रुतेन।**

**यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्''**[२१]

ब्रह्मसूत्रभाष्येऽपि उक्तं यथा-

---

१८. विष्णुतत्त्वविनिर्णयः

१९. महाभारततात्पर्यनिर्णयः

२०. तै.उपनिषद

२१. कठोपनिषद

**''बलमानन्द ओजश्च सहो ज्ञानमनाकुलम् ।**

**स्वरूपाण्येव जीवस्य व्यज्यन्ते परमाद् विभोः''[२२]।।**

अमला भक्तिरेव मोक्षस्य साधनम् । तदुक्तम् आचार्येण महाभारततात्पर्यनिर्णये । तथाहि—

**माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः ।**

**स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथा''[२३] ।।**

मोक्षसाधनभूतायाः भक्तेः प्राधान्यं अनुव्याख्याने आचार्यः सूचयति । यथा—

**भक्त्या ज्ञानं ततो भक्तिः ततो दृष्टिस्ततश्च सा ।**

**ततो मुक्तिस्ततो भक्तिः सैव स्यात् सुखरूपिणी''[२४] ।।**

श्रीमद्भगवद्गीतागतान् श्लोकानपि आचार्यः प्रमाणत्वेन दर्शयति । यथा—

**''भक्तास्तेऽतीव मेप्रियाः''[२५]**

**''मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।**

**स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते''[२६]**

---

२२. ब्रह्मसूत्राभाष्यम् २/३/३१

२३. महाभारततात्पर्यनिर्णयः

२४. अनुव्याख्यानाम् ३/२/२५

२५. भगवद्गीता १२/२०

२६. भगवद्गीता

**"भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः"[२७]।**

प्रमाणत्रयमेव आचार्यस्य सम्मतम् । तत्तु प्रत्यक्षम्, अनुमानम्, आगमश्च। प्रमाणलक्षणे एतेषां लक्षणं प्रोक्तम् यथा—— "निर्दोषार्थेन्द्रियन्निकर्षः प्रत्यक्षम्। निर्दोषोपपत्तिरनुमानम्। निर्दोषः शब्दः आगमः"[२८]।।

अनेन प्रकारेण मध्वाचार्यैः प्रमाणस्य लक्षणं साधितम् । तच्च सर्वथा विशिष्टस्थानं भजते । इत्यलम् ।

२७. भगवद्गीता

२८. प्रमाणलक्षणम् सर्वमूलग्रन्थः

# ‘‘माध्ववेदान्ते तत्त्वविमर्शः’’

**प्रो. बिष्णुपदमहापात्रः**
न्यायविभागः
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः
नवदेहली

वैदिकावैदिकरूपेण भारतीयदर्शनं द्वादशविधं वर्तते । तत्र वेदान्तदर्शनस्य स्थानं सर्वथा विशिष्टमिति सर्वैरङ्गीक्रियते। समेषां दार्शनिकानां यद्यपि चरमलक्ष्ये अपवर्गे वैमत्यं नास्ति तथापि अपवर्गसाधने वैमत्यमवलोक्यते। तत्त्वज्ञानान्मुक्तिरिति सिद्धान्त-स्वीकारे ‘‘ऋते ज्ञानान्न मुक्तिः, विद्ययामृतमश्नुते’ इत्यादि श्रुतिवाक्यमपि सङ्गच्छते। तत्त्वविषये तत्त्वसङ्ख्याविषये च दार्शनिकानां महान् मतभेदो दरीदृश्यते। तत्र एकमेव बह्मतत्त्वं सदिति ये वेदान्तिनः ब्रुवन्ति तेषां सिद्धान्तनिराकरणाय भट्टकुलावतंसः दाक्षिणात्यः मध्वाचार्यः जीवबह्मणोः भेदं सत्यत्वं च संस्थापितवान्। एतेषां मध्वाचार्याणां सिद्धान्तस्तु द्वैतवादसिद्धान्तः।

तत्रेदमवधातव्यं यत् वैष्णवसम्प्रदायवद् मध्वाचार्यैः शङ्कराचार्यसिद्धान्ते विमतिं समुद्भाव्य सविशेषब्रह्मवादः परिणामवादः जगतः सत्यत्वं भक्तिवादश्च संस्थापितः। स्थलविशेषे च वैष्णवपरम्परानुगतसिद्धान्तमतिक्रम्य द्वैतवादस्य व्यवस्थापनं कृतम्। किंवादन्त्यनुसारेण अयं द्वैतवादः वायुदेवतातः सम्प्राप्तः। तदनन्तरं वायुतः हनुमद्देवता हनुमद्देवतातः भीमः भीमतः आनन्दतीर्थः सम्प्राप्त

इति अस्माभिः श्रूयते । अयमेवानन्दतीर्थः पूर्णप्रज्ञः मध्वो वेति संज्ञया विभूषितः ।

द्वैतवादस्य समर्थने आचार्याणामयमेवाशयो विद्यते यत् कार्यकारण-सम्बन्धदृष्ट्या नहि द्वैतवादस्य स्थितिरपि तु निमित्तकारण-उपादानकारणयोः आत्यन्तिकभेदात् अयं द्वैतवादः सिद्धान्तितः । कार्यकारणयोर्मध्ये भेदाभेदसम्बन्धस्तु वेदान्तिनां मतमिवाङ्गीक्रियते । एतेषां नये पञ्च भेदाः सन्ति । तथाहि-ब्रह्म-जीवयोर्भेदः, ब्रह्म-जडयोर्भेदः, जीव-जडयोर्भेदः, जीवानां परस्परं भेदः, जडपदार्थानां परस्परं भेदश्च । एतादृशभेदकारणात् इदं दर्शनं द्वैतसिद्धान्तपरकं भवतीति प्रसिद्धं विद्यते । पदार्थतत्त्वमाधारीकृत्य यथा अस्य दर्शनस्योपरि न्यायवैशेषिकयोः प्रभावोऽवलोक्यते तथैव असाधारणरूपेण एकीभावमुपेक्ष्य ब्रह्मणः निमित्तकारणत्वं प्रकृतेश्च उपादान-कारणत्वमस्तीति स्वीक्रियत इति साङ्ख्यदर्शनस्यापि प्रभावो दरीदृश्यते ।

न्यायवैशेषिकसाङ्ख्यदर्शनानां यद्यपि प्रभावोऽस्य दर्शनस्योपरि परिलक्ष्यते । तथापि मध्वाचार्यैः उपनिषद्वाक्यानां स्वतन्त्रं व्याख्यानं प्रकटितमिति इदं दर्शनं अद्वैतादिप्रस्थानात् स्वीयं विलक्षणं विचारकौशलं व्यवस्थापयति । अद्वैतमतनिराकरणावसरे आचार्यः प्रतिपादयति अद्वैतशब्दस्तु भ्रमात्मक एव । यतः ज्ञाता कथमपि ज्ञेयो न भवति । ज्ञानं ज्ञेयस्य भवति । ज्ञाता ज्ञानमपि न भवति । यत्र ज्ञानं विद्यते तत्र कश्चिद् ज्ञाता कश्चिच्च ज्ञेयो भवति । ज्ञातृ-ज्ञान-ज्ञेयादीनां भेददर्शनात् एतेषामैक्याभावात् सर्वथा द्वैतवादः समर्थनीयः । तथाहि– तत्त्वोद्योते

''न हि ज्ञान-ज्ञेययोरेकाकारता, न हि अज्ञानस्य घटाश्रयत्वं ब्रह्माश्रयत्वं वा अस्ति। पुङ्गतमेव हि तमोऽज्ञानेन निवर्तते, विषयाश्रयश्चेदज्ञानं निवर्तते तर्हि एकेन ज्ञातस्य घटस्य अन्यैरज्ञातत्वं न स्यात्''[१] इति।

अत एव मध्वाचार्यैः अद्वैतवादः बौद्धशून्यवादस्य औपनिषदिकसंस्करणमिति अभ्युपगम्यते। मायावादस्य ब्रह्म शून्यवादस्य शून्यञ्च अभिन्नमेव। तथाहि—

''यच्छून्यवादिनः शून्यं तदेव ब्रह्म मायिनः''। शङ्कराचार्याणां नये बह्म एकमेवाद्वितीयं भवति, किन्तु मध्वाचार्यनये जगद्-जीवयोः सत्यत्वम्। तत्र किन्नाम सत्यत्वमिति जिज्ञासायां सत्यस्य लक्षणं ब्रवीति श्रीमध्वाचार्यः-

''सद्विलक्षणत्वम् असद्विलक्षणत्वञ्च मिथ्या इत्यविलक्षणमेव सत्यं स्यात्[२]'' इति। एवञ्च उपर्युक्तसिद्धान्ते मानमपि प्रदर्शितमाचार्यैः-

**''अविरुद्धं तु यत् त्वस्य प्रमाणं तच्च नान्यथा।**
**एतद्विरुद्धं यत्तु स्यान्न तन्मानं कथञ्चन ।।**
**वैष्णवानि पुराणानि पञ्चरात्रात्मकत्वतः।**
**प्रमाणान्येव मन्वाद्याः स्मृतयोऽप्यनुकूलतः ।।**[३]

**अपरश्च— ''जगत्प्रवाहः सत्योऽयं पञ्चभेदसमन्वितः।**

---

१. तत्त्वोद्योतः पृ. २४२.

२. तत्त्वोद्योतः पृ. २४२.

३. महाभारततात्पर्यनिर्णयः १/३१-३२.

**जीवेशयोर्भिदा चैव जीव-भेदः परस्परम् ।।**

**पञ्चभेदा इमे नित्याः सर्वावस्थासु नित्यशः ।**

**मुक्तानां च न हीयन्ते तारतम्यं च सर्वदा ।।**[४]

अभिप्रायस्तु जीव-ब्रह्मणोः पूर्णतः ऐक्यं नास्ति। जीव-ब्रह्मणोर्भेदसद्भावे भाष्ये प्रमाणं दर्शयति—

**''भिन्नाः जीवाः परो भिन्नस्तथा विज्ञानरूपतः''**[५]

श्रुतिश्च **''द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते''**[६]

यदि च ''अयमात्मा ब्रह्म'' इत्यस्यार्थो भवति अयं यः सर्वत्र व्याप्तो भवति तद् बह्म भवति। शङ्कराचार्यनये ब्रह्म निर्गुणम्। रामानुजाचार्यनये जीवः जगच्च ईश्वरस्य विशेषणं भवति। किन्तु मध्वमते ब्रह्म सगुणं भवति। ब्रह्म विष्णुरेव। स च सृष्टि-स्थिति-लयस्य कारणं भवति। स एकोऽवतारी पुरुषः, भक्तवत्सलश्च विद्यते । भक्तानां समुद्धरणार्थं सततम् अवतरति । तथाहि—

**''अवतारादयो विष्णोः सर्वे पूर्णाः प्रकीर्तिताः ।**

**पूर्णश्च तत्परं पूर्णं पूर्णात् पूर्णाः समुद्भवाः ।।**[७]

अस्य कथनस्याभिप्रायमपि पोषयति श्रीकृष्णचन्द्रः—

---

४. महाभारततात्पर्यनिर्णयः १/६९-७१.

५. मध्वभाष्यम्-३/३/२९.

६. मुण्डक ३/१/३.

७. मध्वभाष्यम्

**''यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।**

**अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् ।।''[८]**

तत्र तत्त्वज्ञानान्मुक्तिरिति यदाचार्यैः स्वीकृतं तत्तत्त्वानि कानि इति जिज्ञासायामुच्यते तत्त्वं द्विविधम्- स्वतन्त्रम् अस्वतन्त्रञ्च । तथाहि—— ''स्वतन्त्रमस्वतन्त्रं च द्विविधं तत्त्वमिष्यते'' इति ।

अभिप्रायस्तु– परब्रह्म ईश्वरस्तु स्वतन्त्रत्वं भवति । जीवः प्रकृतिश्च परतन्त्रतत्त्वं भवति अनेन प्रकारेण स्वतन्त्ररूपात् परतन्त्ररूपाच्च त्रयाणां वर्गद्वयं स्वतन्त्रमस्वतन्त्रञ्चेति । एतानि त्रीाणि तत्त्वानि सत् तत्त्वानि भवन्ति । यतः एतेषां सर्वदा प्रतीतिर्भवति । तथाहि—— ''सदिति प्रतीयमानत्वात् । अतः सर्वदा प्रत्यक्षेण प्रतीयमानं वस्तु सदित्येव प्रतीयते''[१०] इति । न्यायामृते च ''सर्वदेशकालनिषेधाप्रतियोगित्वं सत्त्वम्। असद्विलक्षणत्वे सति अनारोपित्वं वा । अस्तित्वप्रकारकप्रमां प्रति कदाचित्साक्षाद्विषयत्वं वा''[११] इति।

मध्वाचार्यमते द्वैतस्य सत्यत्वम् । यतो यः स्वरूपतो भिन्नो भवति स अभिन्नः एकः तादात्म्यञ्च कथमपि भवितुं नार्हति। ब्रह्म-जीव-प्रकृतीनां परस्परं स्वरूपतो भेदो विद्यत एव । जीवानां स्वातन्त्र्य-

८. श्रीमद्भगवद्गीता, ४/७-

९. तत्त्वसंख्यानम्

१० तत्त्वोद्योतः पृ. १९

११. न्यायामृतम् पृ. ९५-९७

प्रतिपादनाय जगतः या सत्ता विद्यते सा ब्रह्माधीना भवतीति प्रतिपादनाय च ''तत्त्वमसि, अयमात्मा ब्रह्म, एकमेवाद्वितीयम्, सर्वं खल्विदं ब्रह्म'' इत्यादि उपनिषद्वाक्यानां प्रयोगः, न तु इमानि श्रुतिवाक्यानि अभेदप्रतिपादकानि ।

तत्र भाष्यग्रन्थे ईश्वर-प्रकृति-जीव-जडभेदेन चत्वारः पदार्थाः प्राप्यन्ते । तथाहि-

**''ईश्वरः प्रकृतिर्जीवो जडश्चेति चतुष्टयम् ।**

**पदार्थानां सन्निधानात् तत्रेशो विष्णुरुच्यते ।।**

माध्वदर्शने वर्तमानसन्दर्भे दश पदार्थाः प्राप्यन्ते । द्रव्य-गुण-कर्म-सामान्य-विशेष-विशिष्ट-अंशी-शक्ति-सादृश्य-अभावभेदेन दश पदार्थाः सन्ति । तथाहि मध्वसिद्धान्तसारे- ''द्रव्यगुणकर्मसामान्यविशेषविशिष्टांशिशक्तिसादृश्याभावाः दश पदार्थाः''[१२] इति।

तत्र प्रथमपदार्थस्य द्रव्यस्य किं स्वरूपमिति जिज्ञासायां मध्वसिद्धान्तसारादिग्रन्थेषु प्राप्यते ''द्रव्यं तु द्रवणं-प्राप्य द्वयोर्विवदमानयोः पूर्वं वेगाभिसम्बन्धादाकाशस्तु प्रदेशतः'' इति । इदं लक्षणन्तु काल्पनिकमिति माध्वदार्शनिकाः ब्रुवन्ति । यतः एतादृशस्य लक्षणस्य विचारः प्रायशः माध्वग्रन्थेषु नावलोक्यते । वस्तुतः उपादानकारणत्वं द्रव्यत्वमिति द्रव्यसामान्यलक्षणम् । उपादानकारणत्वञ्च द्विविधम् । परिणामोऽभिव्यक्तिश्च । तथा चोक्तम्—- उपादानकारणत्वं वा द्रव्यत्वम्। उपादानत्वञ्च परिणामोऽभिव्यक्तिश्चेति द्विविधम्''[१३]

१२. मध्वसिद्धान्तसारः पृ. ०२.

इति। उपादानकारणभूतानि द्रव्याणि विंशतिः भवन्ति। तथाहि परमात्मा-लक्ष्मी-जीव-अव्याकृत-गुणत्रय-आकाश-प्रकृति-त्रिगुण-महतत्व-महत्-अहङ्कार-बुद्धि-इन्द्रय-मनस्-तन्मात्रा-भूत-ब्रह्माण्ड-अविद्या-वर्ण-आवरण-अन्धकार-वासना-काल-प्रतिविम्बाः ।

गुणस्तु गुणत्वजातिमत्त्वरूपमिति वैशेषिकवद् गुणस्य लक्षणं स्वीक्रियते। वैशेषिकदर्शने रूपरसादिभेदेन यद्यपि चतुर्विंशति-गुणाः प्रसिद्धाः सन्ति, तथापि तान् आहत्य तदतिरिक्तरूपेण च शम-दम-कृपा-तितिक्षा-सौन्दर्य-गाम्भीर्य-शौर्य-औदार्यादिभेदेन गुणानां परिगणनं विद्यते अस्मिन् दर्शने। वस्तुतः एतेषां नये गुणानां सङ्ख्याः अपरिमिताः अनन्ताश्च विद्यन्ते ।

कर्मविषये मध्वाचार्याः वदन्ति द्रव्य-गुणभिन्नत्वे सति द्रव्याश्रितं कर्म भवतीति। तच्च कर्म विहित-निषिद्ध-उदासीनभेदेन त्रिविधम्। वेदोक्तकर्म विहितकर्म, शास्त्रविहितकर्म निषिद्धकर्म, एतदुभयभिन्नं कर्म उदासीनकर्म, तच्च कर्म परिस्पन्दात्मकं भवति। अत्रैव तृतीये वैशेषिकाभिमतपञ्चकर्मणामन्तर्भावः, अन्येषां कर्मणामपि अत्रैव परिगणना विद्यते ।

तत्र जातिपदेन सामान्यस्य ग्रहणं भवति। तत्र न्यायवैशेषिकप्रस्थाने नित्यमेकञ्च सामान्यं भवति। परन्तु माध्वसम्प्रदाये किञ्चिद् विलक्षणं विद्यते। एतेषां नये जीववत् नित्यद्रव्ये नित्यत्वम्, अनित्यद्रव्येषु अनित्यत्वमिति। इदञ्च सामान्यं जाति-उपाधि भेदेन

१३. पदार्थसंग्रहः, पृ. ५८

नित्य-अनित्यभेदेन च द्विविधं भवति। तत्र लक्षणमपि वदति— ''अन्यनिरूपणानधीननिरूपणत्वं जातित्वम्, इतरनिरूपणाधीननिरूपणकत्वमुपधित्वम्''[१४] इति।

विशेषस्तु भेदाभावेऽपि भेदव्यवहारकारणभूतत्वमेव विशेषो भवति। एतादृशविशेषपदार्थस्तु समेषु पदार्थेषु तिष्ठति, स च विशेषः अनन्तः। तथोचोच्यते— ''भेदाभावेऽपि भेदव्यवहारनिर्वाहका अनन्ता एव विशेषाः''[१५] इति।

विशिष्टस्तु विशेषणयुक्तो भवति। विशेषणविशेष्ययोः समवायसम्बन्धं परित्यज्य पृथक् अंशीपदार्थः मध्वैः स्वीकृतः। तथा चोच्यते— ''विशिष्टं विशेषण-विशेष्य-तत्सम्बन्धातिरिक्तमवश्यमङ्गीकर्तव्यम्''[१६] इति। शक्तेः चत्वारो भेदाः विद्यन्ते। अचिन्त्यशक्ति-आधेयशक्ति-सहजशक्ति-पदशक्तिभेदेन। तत्र ईश्वरे स्थिता रहस्यमयी शक्तिः अचिन्त्यशक्तिः। कारणशक्ति-सहजशक्तिः सर्वथा सर्वेषु वस्तुषु तिष्ठति। देवप्रतिमासु मन्त्राण समुपस्थापिता देवशक्तिः आधेयशक्तिः। वाच्यवाचकभावसम्बन्धरूपा शक्तिः पदशक्तिः। वस्तुनः समानत्वज्ञानं सादृश्येन भवतीति सादृश्यपदार्थस्य स्वीकारः। तच्च सादृश्यं नित्यानित्यभेदेन द्विविधं भवति। मुक्तात्मा यदा ईश्वरसादृश्यं प्राप्नोति तादृशं सादृश्यं नित्यं भवति। गोसदृशो गवय इत्यत्र सादृश्यमनित्यं भवति। अभावपदार्थस्तु न्यायवैशेषिकवत् स्वीकार्यः। ईश्वरस्तु साक्षाद् विष्णुर्भवति। ईश्वरः ब्रह्मानिरपेक्षसत्ता,

---

१४. मध्वसिद्धान्तसारः पृ. ७.

१५. मध्वसिद्धान्तसारः पृ. ८.

१६. मध्वसिद्धान्तसारः पृ. ११.

स्रष्टा च भवति। स नित्यः चित्-सर्वव्यापी-सर्वद्रष्टा भवति। श्रीहरिः सर्वप्रधानं तत्त्वम्। ईश्वरस्य अष्टकार्याणि भवन्ति। तथा चोक्तं- ''सृष्टिस्थितिसंहारनियमनज्ञानावरणबन्धमोक्षाः[१७] इति। मध्वानुसारं ईश्वरे सर्वे सम्बद्धाः भवन्ति। ईश्वरः सर्वज्ञः एकराट्, सर्वगुण-सम्पन्नश्च। विश्वस्य उपादानं तु प्रकृतिरेव। उक्तञ्च ''साक्षात्परम्परया वा विश्वोपादानं प्रकृतिः[१८] ईश्वरः जगतः निमित्तकारणं प्रकृतिश्च उपादानं कारणं भवति। यतः प्रकृतिः ईश्वरस्य इच्छारूपा शक्तिरूपा वा भवति। ''हरेरिच्छाऽथवा बलम्'' इति। मध्वाचार्यैः प्रत्यक्षानुमाना-गमभेदेन प्रमाणत्रयं स्वीकृतम्। अनेन प्रमाणत्रयेण एतेषां तत्त्वानां सिद्धिः कृता। प्रमाणाधीना प्रमेमस्य सिद्धिर्भवतीति न्यायोऽपि सततमभ्युपगत्य पदार्थतत्त्वानां व्यवस्थापनं कृतमित्यलं विस्तरोण। अन्ते च—

**श्रीमन्मध्वमते हरिः परतमः रः सत्यं जगत्तत्त्वतो**
**भेदो जीवगणा हरेरनुचरा नीचोच्चभावं गताः।**
**मुक्तिः निंजसुखानुभूतिरमला भक्तिश्चतुस्सतत्साधनं**
**मोहाक्षादिस्त्रिर्षतयं प्रमाणमखिलाऽम्नायैकवेद्यो हरिः ॥**

---

१७. मध्वभाष्यम्.

१८. पदार्थसंग्रह पृ. ९३.

Review of Jamison 1.141.1-2

# Madhvācārya as an avatara of Vāyu

**Prof. Veeranarayaṇa N K Pandurangi**
Professor of Vedānta and Indian Philosophy
Dean of Vedānta Faculty
Karnātaka Samskrit University, Bengaluru

## Madhvācarya's date

Madhva was born in a small village called Pājaka, which is very near to the famous Vaiṣṇava pilgrimage city of Udupi. His date is fixed at 1197 to 1278 CE. The date given by other people like Govindācarya etc. i.e. 1238 to 1317 is not acceptable. It is directly contradicted by date given by Madhvācarya himself in his Mahābhārata tātparya nirṇaya where he stated चतुःसहस्रे त्रिशतोत्तरे गते संवत्सराणां तु कलौ पृथिव्याम् । जातः पुनर्विप्रतनुःस भीमो दैत्यैर्निगूढं हरितत्त्वमाह ॥ 32.121 ॥ this Kaliyugaśāka 4300 comes to 1198 or 1199 or atleast 1200. It also suites the Narahari Inscriptions of Śrīkurmam from 1266 to 1288.

The date of 1238 to 1317 does not suite all Kaifiyats given by different Mathas where they have given the death dates of their First pontiffs from 1284 to 1314. Hence date of Madhvācārya can be arrived at 1197 to 1278 CE conclusively.

By that time Jainism was in decline all over Karnātaka, due to either, Rāmānuja's influence on Hoysaḷa kings or more probably destructive Islamic campaigns. Though it is doubtful whether Hoysaḷa and Cāḷukya dynasties which ruled Karnātaka

at the time of Madhva were still followed Jainism, some Jaina feudatories ruled some small pockets in the district where Madhva was born. But neither they were influential nor dominating as claimed by Zydenbos (p. 267). Interestingly this region, particularly, is still dominated, culturally and religiously, by Brahmins (both madhvas and smartas) and their temples, whereas the other parts of Karnātaka are dominated either by Lingayat or Vokkaliga castes.

In Madhva's bibliography by Nārāyaṇapaṇḍita, a junior contemporary of Madhva, not a single instance of interaction with jainas is mentioned, and quite contrarily, King Jayasiṃha of Kumbḷe is said to have welcomed Madhva into his capital and greatly facilitated in his efforts to recover books stolen by some miscreants. Jayasiṃha was evidently a Hindu king who ruled the whole of Tuḷu country stretching from present day Kasargod to Udupi or probably more.

Madhva laid great emphasis on supreme lordship of Viṣṇu, and dealt a heavy blow to Advaita using each and every opportunity to refute it in his works. His major works have nothing to do with Jainism, even distantly, unlike the Advaita philosophy which, theoretically, is much similar to Sunyavada. Madhva was the first one to notice this which he pointed out in his Tattvoḍyota and Anuvyākhyāna. Hence Madhvācārya was more concerned about the Buddhism and Advaita. He refuted Jainism only twice in Anuvyākhyāna.

Madhva's lineage of dualist Ācāryas has been described to be heavily tortured by early Advaitins, as narrated by Nārāyaṇapaṇḍita in Maṇimañjarī, to follow Advaita tradition. It seems they were quite successful in their mission.

Madhvācārya as an avatara of Vāyu

बळित्था तद्वपुषे धायि दर्शतं देवस्य भर्गः सहसो यतो जनि ।
यदीमुप ह्वरते साधते मतिरृतस्य धेना अनयन्त सस्रुतः ।।
पृक्षो वपुः पितुमान्नित्य आशये द्वितीयमा सप्तशिवासु मातृषु ।
तृतीयमस्य वृषभस्य दोहसे दशप्रमतिं जनयन्त योषणः[१]

Rgveda 1.141.1-2.

Such Vedic mantras openly proclaim that Madhvācārya as an amṣa avatara of Vāyu. We will discuss these mantras later on.

This is corroborated by Rāmāyaṇa of Vālmika also.

ससूत्रवृत्त्यर्थपदं महार्थं ससङ्ग्रहं सिध्यति वै कपीन्द्रः ।
न ह्यस्य कश्चित् सदृशोऽस्ति वीर्ये वैशारदे छन्दगतौ तथैव ।।[२]

7.35.44-47

---

१. निर्यदीं बुध्नान्महिषस्य वर्पस ईशानासः शवसा क्रन्त सूरयः ।
यदीमनु प्रदिवो मध्व आधवे गुहा सन्तं मातरिश्वा मथायति ।।
प्र यत्पितुः परमान्नीयते पर्या पृक्षुधो वीरुधो दंसु रोहति ।
उभा यदस्य जनुषं यदिन्वत आदिद्यविष्ठो अभवद्घृणा शुचिः ।।
आदिन्मातॄराविशद्यास्वा शुचिरहिंस्यमान उर्विया वि वावृधे ।
अनु यत्पूर्वा अरुहत्सनाजुवो नि नव्यसीष्ववरासु धावते ।।

Rgveda 1.141.1-5

२. पराक्रमोत्साहमतिप्रतापैः सौशील्यमाधुर्यनयानयैश्च ।
गाम्भीर्यचातुर्यसुवीर्यधैर्यैर्हनूमतः कोऽप्यधिकोऽस्ति लोके ।।
असौ पुरा व्याकरणं ग्रहीष्यन् सूर्योन्मुखः पृष्ठगमः कपीन्द्रः
उद्यद्गिरेरस्तगिरिं जगाम ग्रन्थं महद्धारयदप्रमेयः ।।
ससूत्रवृत्त्यर्थपदं महार्थं ससङ्ग्रहं सिध्यति वै कपीन्द्रः ।
नह्यस्य कश्चित् सदृशोऽस्ति वीर्ये वैशारदे छन्दगतौ तथैव ।। 7.35.46

This verse in Rāmāyaṇa clearly indicates that Hanuman will be born as a bhaṣyakāra and comment on Sutras, He is unparalleled in Śāstras.

Hence Madhvācārya declared loud enough, very much himself, and not early Dvaitins, as claimed by Zydenbos (p. 250), that he is an incarnation of Vāyu.

Madhvācārya's teacher is Vedavyāsa and Nārāyaṇa[3] who lived in Badari in Himalayas.

---

सर्वासु विद्यासु तपोविधाने पस्पर्धते यं हि गुरुं सुराणाम् ।
सोऽयं नवव्याकरणार्थवेत्ता ब्रह्मा भविष्यत्यपि ते प्रसादात् ।

7.35.44-47. Gita Press edition

३. तमेव शास्त्रप्रभवं प्रणम्य जगद्गुरूणां गुरुमञ्जसैव ।
विशेषतो मे परमाख्यविद्याव्याख्यां करोम्यन्वपि चाहमेव ।।

(1.1.1.2. Anuvyakhyana),

आनन्दतीर्थाख्यमुनिः सुपूर्णप्रज्ञाभिधो ग्रन्थमिमं चकार ।
नारायणेनाभिहितो बदर्यां तस्यैव शिष्यो जगदेकभर्तुः ।।

३२.१५८।।

तनुस्तृतीया पवनस्य सेयं सद्भारतार्थप्रतिपादनाय ।
ग्रन्थं चकारेममुदीर्णविद्या यस्मिन् रमन्ते हरिपादभक्ताः ।।

३२.१६४।।

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
बट् तद्दर्शनमित्थमेव निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुः
मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ।। 32.168

Mahabharatatparyanirnnaya (found at the end of many works of Madhva)

Neither was he uneasy in declaring himself as an incarnation (which was the first in Indian philosophical arena, nobody seen following), nor were his early followers in declaring him so, as claimed by Zydenbos (p. 250). He could also defend his divine nature amid his formidable rivals. Even Trivikrama, one of the formidable ex-advaitin and Madhva's future disciple, praised Madhva's divinity in his commentary on Brahmasūtrabhāṣya of Madhva. Thus Zydenbos' claim that ãit seems not unlikely that in ascribing a divine nature to Madhva the early Dvaitins evinced an uneasy awareness that their creation of a new Vedantic tradition could be frowned upon within the brahminical communityä (Zydenbos p. 250) lacks evidences. One can refer to the opening verses of Tattvapradipika commentary of Trivikramapandita.

योद्धृणां राघवार्थे कृतमहितरणो योऽद्वितीयो द्वितीयो
विष्णोः कृष्णप्रियार्थं पुनरपि विपुलैस्संयुगैर्व्यक्तकीर्तीः।
यद्वीर्यं योधवीरैः कृतनुतिजगतां सप्तके सप्तके वा
देवेऽस्मिन् जैत्रशक्तिर्निवसति सकलेत्यत्र किं विस्मयः स्यात्१४।
रामक्रीडामनुविहरता पूर्वमापूर्णभक्त्या
तेन ज्ञाता न किमु विमलास्तत्कथाग्रन्थकोट्यः ।
सोऽयं रेजे कुरुषु विजयी सर्वतो भरताग्र्यो
जानीतेऽतः प्रविततमतिर्भारतार्थान् कृतार्थः ।।१८।।
त्रेधाऽवतारमवनाय सतां बळित्थेत्याद्या श्रुतिर्भगवती गुरुमेनमाह।
मुख्यानिलोऽतिबलवान्मतिरीशधेना नेतेति पृक्ष इति मध्व इति
क्रमेण ।। २३।। (TP 1.1.1.)

Madhvācārya is basically a Vaiṣṇava Ācārya, with a sole aim of propagating the Vaiṣṇavism. His main thesis is the Viṣṇu. He is all about it. He is not very much particular about other things like pramana and prama etc. All other things are auxiliary (parikara) for him. Hence he to inherited many theories from different schools. He had no necessity to adopt some theories from an obscure Jain author who is not even well known in Jaina philosophy too. All the things discussed here are shown to be available in mainstream philosophies. Hence Zydenbos' claims stand baseless.

**Madhvācārya's Guru**

Madhvācārya never needed a human teacher to teach him. He did it all by himself right from his childhood. But he was initiated into sannyaasa by Achyutaprajñatīrtha who was in the lineage of Sanaka etc. But we do not know names of all the names of teachers this lineage.[4] However Achyutaprajñatīrtha is not named anywhere by Madhvācārya, since after initiating the Madhvācārya into sannyāsa Achyutaprajñatīrtha himself became a disciple of Madhvācārya. It is the Vedavyāsa who taught and gave all the texts to Madhvācārya. It is clearly stated by him in MBTN as follows

4. And nobody has the full list of a lineage of any Ācārya, be it Śankarācārya, Rāmānujācārya or anybody else, because the lineage of Ācāryas is so big and continuous for several thousand years. Who was Śankarācārya's Guru, who was his guru, who was his guru? No. We do not know. It is cut down in between. Whatever the list prepared by the people of last centuries like Rāmānandacārya's or Śankarācāryas is fictitious. There are no evidences to know predecessors of Śankarācārya etc.

समस्तशास्त्रार्थविनिर्णयोऽयं विशेषतो भारतवर्त्मचारी ।
ग्रन्थः कृताऽ यं जगतां जनित्रं हरिं गुरुं प्रीणयतामुनैव ।।१६०।।
विनिर्णयो नास्त्यमुना विना यद् विप्रस्थितानामिह सर्ववाचाम् ।
तद्ब्रह्मसूत्राणि चकार कृष्णो व्याख्याऽथतेषामयथाकृतान्यैः ।।
१६१।।
निगूहितं यत् पुरुषोत्तमत्वं सूत्रोक्तमप्यत्र महासुरेन्द्रैः ।
जीवेश्वरैक्यं प्रवदद्भिरुग्रै र्व्याख्याय सूत्राणि चकार चाऽविः ।।
१६२।।
व्यासाज्ञया भाष्यवरं विधाय पृथक्पृथक् चोपनिषत्सु भाष्यम् ।
कृत्वऽखिलान्यं पुरुषोत्तमं च हरिं वदन्तीति समर्थयित्वा ।।
।। १६३ ।। (MBTN 32.160-163)

He is referring to Kṛṣṇadvaipāyana by the word Kṛsṇa (v.161) and Vyāsa (v.163)

देवं नारायणं नत्वा सर्वदोषविवर्जितम् ।
परिपूर्णं गुरूंश्चान् गीतार्थं वक्ष्यामि लेशतः ।।
(Gitabhasya 1.1.)

Here in this opening verse of Gitabhaṣya he refers to Vedavyāsa.

In Nyāyavivaraṇa Madhvācārya pays tribute to Vyāsa.

कृत्वा भाष्यानुभाष्येऽहमपि वेदार्थसत्पतेः ।
कृष्णस्य सूत्रानुव्याख्यासन्न्यायविवृत्तिमतिस्फुटम् ।।२।।
करोमि मन्दबुद्धीनां बुधानां चोपकारिकाम् ।
प्रीत्यै तस्यैव देवस्य तत्प्रसादपुरस्सरः ।।३।।
Nyāyavivaraṇa (1.1.1)

Hence it is not correct to claim that ''Viṣṇu is his only Guru. Nowhere in the works of Madhva did I find a corroboration for the opinion in Sumadhvavijaya'' that Madhva acknowledges Vyāsa as his teacher. In all places where Viṣṇu is praised as Guru, he does not appear in the form of Vyāsa'' (Mesquita p.17). It is also not correct to claim that ''Madhva's teaching does not depend on a guruparampara'', because even all the Ācāryas teaching does not depend on guruparampara.

What was the guruparampara of Śankarācārya? What was the guruparampara of Gaudapada? What was the guruparampara of Govindabhagavatpada? We do not know it. How the Prabhākara system of Purvamimamamsa began? It began with Prabhākara himself. There is no need to be connected with Guruparampara to establish something. If Madhvācārya started something on his own it was his speciality. It should not be an issue.

**Madhvācārya's lineage of Gurus**

वंशस्यादीन् सनकादीनुपासे दूर्वाससं परतीर्थाख्यभिक्षुम् ।
सत्यप्रज्ञं प्राज्ञतीर्थं मुनीन्द्रं पश्चाच्छिष्यावच्युतप्रेक्षमध्वौ ।।[5]

It is the verse known and recited in tradition which names most of the predecessors of Ācārya.

It is said that Madhvācārya was initiated into sannyāsa by Śrī Acyutaprekṣatīrtha who belonged to Sanakadi Sampradaya. Sanaka etc. were the Sons of Chaturmukha Brahma. Durvāsa came in this line after Sanaka etc. Later on we hear about Śrī

5. [1]http://kaniyoormatha.org/about/guru-parampara/ accessed on 14.3.2021.

Jñananidhitīrtha. But there is no proof that Śrī Jñananidhitīrtha was the immediate successor of Durvāsa. It may be true. It is quite possible there was lineage before Śrī Jñananidhitīrtha. But that was somehow forgotten. BNK Śarma (p.75 HDSV) holds that lineage of around 400 years from Prajnatirtha to Śrī Acyutaprekṣatīrtha is forgotten. However it is very difficult to assume that Śrī Acyutaprekṣatīrtha's immediate predecessor is not known to the tradition. Hence we may assume that Jñannidhitīrtha's predecessors are forgotten somewhere.

We know the line from Śrī Jñananidhitīrtha as follows-

Śrī sanaka, Śrī sanandana, Śrī Sanatkumara, Śrī sanatana

Śrī Durvāsa

Śrī Jñananidhitīrtha

Śrī Garudavahanatīrtha

Śrī Kaivalyatīrtha

Śrī Jñaneshatīrtha

Śrī Paratīrtha

Śrī Satyaprajñatīrtha

Śrī Prajñatīrtha

Śrī Acyutaprekshatīrtha

Śrī Madhvācārya.

We have full list of all the successors of every Matha. Hence there should be no confusion about the lineage of Madhvācārya.

**Review of Jamison 1.141.1-2**

Now let us examine how this same mantra is interpreted

by, newest translator of the oldest text, Stephanie Jamison in her book "The Rigveda Earliest religious poetry of India".

बळित्था तद्वपुषे धायि दर्शतं देवस्य भर्गः सहसो यतो जनि ।

यदीमुप ह्वरते साधते मतिरृतस्य धेना अनयन्त सस्रुतः ।।

**Jamison:**[6] Yes, indeed! It is just so the luster of the god, lovely to see, has been installed for wonder, after he was born of strength. When he zigzags up to it, our thought goes straight to success. Flowing together, the streams of truth have led (him).

Here Bhārga is the subject. Bhārga is translated as lustre of the God. It is said to be lovely to see. That lustre is installed for wonder (तद् वपुषे धायि) after he was born of strength (सहसौ यतोजनि).

How this Bhārga is born of strength if bharga is taken to mean fire (lustre of God)? Not much of strength is need to produce this mortal fire. How this fire (Agñi) is called God? How is lovely to see? This mortal fire is not lovely. Nowhere we can find "lovely fire". How he is installed for wonder? What is that wonder?

"When he zigzags up to it" it the second part of mantra.

---

1 Like the last hymn, this one is full of puzzles, and also like the last, it focuses especially on the birth and growth of the fire. The hymn begins and ends with the installation of the ritual fire (root dhā: 1ab, 13ab), providing a faint ring structure; the second mention of its installation, with the adverb prataram "further 316 I.141 forward" suggests that it refers to the installation of the new Āhavanīya fire to the east, a fire removed from the old Āavanīya at the beginning of classical śrauta rituals. Jamison: introduction to this sukta.

Here who zigzags up to it? Is it a mountain way where one can zigzag? What is meant by ''it'' here. What is the relation between this zigzag and our thoughts going straight to success? How the streams of truth lead fire? What is the relation between streams of truth? This translation is totally not understandable.

पृक्षो वपुः पितुमान्नित्य आशये द्वितीयमा सप्तशिवासु मातृषु ।
तृतीयमस्य वृषभस्य दोहसे दशप्रमतिं जनयन्त योषणः ।।

Rgveda 1.141.1-2.

Jamison Abounding in food, he lies in his own (place) as the wondrous form of nourishment; his second (wondrous form lies) here among the mothers, sevenfold kindly. His third (wondrous form, that) of the bull to be milked, have the young women begotten-him of tenfold forethought.

Here again Mantra is speaking of second and third forms of that Bhārga. It is said that Bhārga like in his own place with enough food.

But what is this food of fire? We don't know it. This Bhārga is wondrous (vapus) form of nourishment. What nourishment he is having from whom? Why nourishment? What does the second form do with seven mothers? Who were these mothers? How they are kindly?

Again Second half speaks about third form. It is more baffling. Here Fire has been described as the bull to be milked. But we can not milk a bull in reality. How it is possible at all? What are his tenfold forethoughts? How at all fire has any thought? How they young women will beget this

fire? Even old women can do? What is the role of young woman here? This is the work of male priests.

These questions arise in each and every line of translation. This is totally insane translation.

Actually first mantra means the first avatara of Vayu, the Hanuman. He is handsome lovely. He is put here by the Deva Viṣṇu for the three avataras. He is born of Sahas the impregnable Visṇu. He is the Mati, full of knowledge. He wanders near Rāma the Sīta. He carries out Rāma's words towards Sītadevi.

Second avatara is the Prkṣa, who destroys the prtana (army). He is know eater of high food. He is Bhima. Third avatara is Madhvācārya who stays always with seven sacred scriptures like four Vedas, Rāmāyaṇa, Mahābhārata and Pancaratra. He is know through the vedic words (yoshanah) for the flow of knowledge. He is the Daśapramati. Daśa means not only ten. But it means full. Full knowledged person is meant by Daśapramati.

Other mantras too can be understood coherently without trouble. Hence this can be concluded that this Baliṭha sukta really means Prāṇa that Vāyu and his three incarnations of Hanuman, Bhima and Madhva.

# व्याख्यानम् - एको विमर्शः

**विमर्शकः - एच्.पि. नागराजाचार्यः**

प्राध्यापकः द्वैतवेदान्तविभागः

पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूर्

श्रीवेदव्यासेन प्रणीतानां ब्रह्मसूत्र-महाभारत-भागवत-भगवद् गीतादीनां तथा वेदोपनिषदां च जगद्गुरुश्रीमन्मध्वाचार्यैः यानि भाष्य-व्याख्यानानुव्याख्यानानि कृतानि, तान्येव ग्रन्थरत्नानि सर्वमूलनाम्ना प्रख्यातानि । तानि च मूलग्रन्थस्याशयं सम्यगेवाऽविश्चक्रुरिति तु निश्चप्रचम् । परन्तु श्रीमध्वाचार्यभावो यदा न सहृदयानां चेतसि नाचकात् तदा त्रिविक्रमपण्डिताचार्य-नारायणपण्डिताचार्य-पद्मनाभतीर्थ-नरहरितीर्थ-जयतीर्थादयः विद्वद्वरेण्याः चतुःशास्त्रपारङ्गताः स्वीयटीका-वृत्त्यादिग्रन्थैः समभिव्यञ्जयामासुराचार्याकूतमित्येतद् भागधेयमेव अस्माकम् । हा हन्त नः शेमुषीपेशलता पेलवता वा । ता अपि टीका नाटीकन्त नः स्वान्तम् । तदानीं प्रादुरभूवंश्च नैकानि व्याख्यानानि विविधाख्यानि व्यासतीर्थ - वादिराजतीर्थ - रघूत्तमतीर्थ - राघवेन्द्रतीर्थ-श्रीनिवासतीर्थाख्य-प्रख्यातव्याख्यातृप्रणीतानि, अख्यात-व्याख्यातानि चासङ्ख्याकानि । इदानीन्तनकालानुकूलितानि प्राकृतप्रान्तीय-भाषाभाषितानि अपि ।

इदमत्रेदानीं विमृश्यते किमिदं व्याख्यानं नाम? कुत एषां प्रवृत्तिः? किं प्रयोजनं च बहूनां व्याख्यानानामिति ।

व्याख्यानं नाम——

वीत्युपसर्गपूर्वकप्रकथनार्थकख्याधातुनिष्पन्नोऽयं शब्दः। (वि) विशिष्टं (आ)प्रकृष्टश्च कथनमेव व्याख्यानम्। विशिष्टत्वं च मूलभावाविष्करणादेव, प्रकृष्टत्वमपि क्लिष्टतमानां व्याख्येयग्रन्थानां सुग्रहार्थकत्वसम्पादकत्वात्।

एतद्विवक्षया स्वतन्त्रग्रन्थाः प्रमाणपद्धति-न्यायामृत-भेदोज्जीवन-युक्तिमल्लिका-गीताविवृतिप्रभृतयोऽपि व्याख्यानग्रन्था एव।

कुत एषां प्रवृत्तिः ?

मूलग्रन्थोक्तस्य स्पष्टीकरणार्थमेव व्याख्यानानां प्रवृत्तिः। स्पष्टीकरणं ह्यनेकविधम्। सङ्क्षिप्योक्तस्य विस्तरोक्तिः। विस्तृतस्य च सङ्क्षेपः। विक्षिप्योक्तस्य सङ्गृह्योक्तिः। मूलस्थकठिणपदार्थनिरूपणम्। विषय-सौष्ठवसम्पादनम्। अन्यान्यस्व-परग्रन्थोल्लेखपुरस्सरं प्रमेयदृढी-करणम्। आकरग्रन्थस्य उल्लेखः इत्यादि।

१) सङ्क्षिप्योक्तस्य विस्तरोक्तेरेकमुदाहरणं दीयते।

ईक्षत्यधिकरणभाष्ये 'न चाशब्दत्वमितरसिद्धमि'त्युक्तं भाष्यकारैः। तस्यार्थस्तु - इतरेषां मते इतरस्य ब्रह्मेतरस्य अशब्दत्वं न सिद्धमिति। परन्तु किं तदितरमतम्, ब्रह्मेतरच्च किम् कुतस्तस्य अशब्दत्वं न सिद्धमिति स्फुटतया न ज्ञायते। तत्रेयं टीका प्रवृत्ता[1] - परकृतापव्याख्यां प्रत्याख्याति॥ नचेति॥ जगत्कारणत्वं सदेव सोम्येत्यादौ कस्यचित् प्रतीयते। तत् किं ब्रह्म? उत प्रधानम्? इति

१. ब्रह्मसूत्रभाष्यम् - १-१-५-५. पृष्ठम् - ७५

सन्देहे प्रधानमिति प्राप्ते सिद्धान्तितम् । न प्रधानं श्रौतजगत्कारणम् । तदैक्षतेति ईक्षतिश्रवणात् । अशब्दं हि तद् इति । तदेतद् व्याख्यानमयुक्तम्-यतोऽशब्दं हि तदिति हेतुतयोक्तमश्रौतत्वं न साङ्ख्यस्य प्रतिवादिनः सिद्धम् । तेन वैदिकत्वाभ्युपगतेः । नापि स्वन्यायेन तदुक्तिः । अजामेकामित्यादौ प्रधानस्य श्रुतत्वात् । किञ्च ब्रह्मणोऽपि श्रौतत्वं न युक्तम् । अवाच्यत्वात् । नापि तस्येक्षितृत्वम् । तस्येक्षतिस्वरूपत्वात् । जगत्कारणस्य मायावच्छिन्नस्येक्षणं सम्भवतीति चेन्न जिज्ञास्यस्यैव जगत्कारणतयोक्तत्वात् । न हि जिज्ञास्यं मायावच्छिन्नं, तज्जिज्ञासाया अप्रयोजकत्वात् । इत्यादि । एतदनया टीकया स्पष्टमवगम्यते यत् अत्र भाष्यकारैरद्वैतमतकृतस्य ईक्षत्यधिकरणरचनक्रमस्य अयुक्तता प्रतिपादिता इति ।

भावदीपे तु श्रीराघवेन्द्रतीर्थश्रीपादैः[२] 'न चाशब्दत्वमितरसिद्धम्' इति भाष्यवचनात् टीकायामुक्तानामर्थानां प्राप्तिः कथमिति तु स्पष्टं प्रतिपाद्यते । तथाहि-तत्रस्थवाक्यानि कतिचन - एतेन भाष्ये चशब्दस्य किञ्चेत्यर्थः । नेति काकुः । अशब्दत्वमितरसिद्धं प्रधानादितरस्य मायावाद्यङ्गीकृतब्रह्मणः सिद्धं न भवति किं भवत्येवेति योजना सूचिता भवति । एतेनेक्षितृत्वं चेतरसिद्धं मायावच्छिन्नब्रह्मणः सिद्धं न वाच्यम् । कुतः? अशब्दं हेतुगर्भमिदम् । अशब्दत्वात् । श्रवणादिरूपजिज्ञास्यत्वा सम्भवात्तस्येति भाष्यार्थः - इत्यादि ।

एवं मूले अति सङ्क्षिप्तमुक्तस्य विषयस्य विस्तरेण व्याख्यानेषूक्तौ

१. ब्रह्मसूत्रभाष्यम् - १-१-५-५. पृष्ठम् - ७६

विषयदार्ढ्यमध्येतॄणां भवति।

२) विस्तृतस्य च सङ्क्षेपः

इदं च विशेषतः स्वोपज्ञव्याख्यानेषु दृश्यते । तद्यथा - न्यायामृते पञ्चमिथ्यात्वनिराकरणं विस्तृततया कृतम् श्रीव्यासतीर्थैः । तस्य सारस्त्वन्ते श्लोकद्वयेन निरूपितम् । तद्यथा–

**१)[३]अनिर्वाच्येऽप्रसिद्ध्यादिः, २) प्रतीते प्रतिषेध्यता ।**

**४)स्वाश्रयेऽत्यन्तविरहः ५)सद्विलक्षणता तथा ।**

**इति पक्षत्रयेऽत्यन्तासत्वं स्यादनिवारितम् ।**

**६)धीनाश्यत्वे त्वनित्यत्वमेव स्यान्न मृषात्मता ।**

एतेन च विस्तृतस्य विषयस्य धारणं सुशकं भवति ।

३) विक्षिप्योक्तस्य सङ्गृह्योक्तिः ।

ब्रह्ममीमांसाशास्त्रे वा सर्वमूलग्रन्थेषु वा भिन्नभिन्नस्थलेषु नैके विषयाः प्रत्यपादिषत । ते चाध्येतृबुद्ध्यारोहाय एकत्र समग्राहिषत भेदोज्जीवनयुक्तिमल्लिकादिषु ।

४) मूलस्थकठिणपदार्थनिरूपणम्

'तस्माद्वायुरेव व्यष्टिर्वायुः समष्टिः' इति बृहदारण्यकोपनिषत् । तत्र व्यष्टिसमष्टिपदार्थं न्यरूपयद् भाष्यमेवं वर्तते-

[४]देवान् ऋषीन् पितृन् यक्षान् गन्धर्वान् मानुषोरगान् ।

---

३. न्यायामृतम् - प्रकरणम् - ११ पृष्ठम् - १०६

असुरांश्च वशे नित्यं नयत्यमितपौरुषः ।

सम्पूर्णांश्च सुपर्णेशशेषेन्द्रान् तत्स्त्रियोऽपि च ।

अष्टौ नयत्युन्नयति वशीकृत्य स्वयं प्रभुः ।

अतो व्यष्टिः समष्टिश्च वायुरेवाभिधीयते ।। इति ।

अत्र व्यष्टिसमष्टिशब्दाभ्यामयमर्थः कथं लब्ध इति न ज्ञायते । तदा भावबोधकारा एवं व्याख्यान् - अशू व्याप्तौ इत्यस्मात् कर्तरि क्तिच्क्तौ च संज्ञायाम् क्तिच् । विविधम् अश्नुते इति व्यष्टिः । सं समीचीनमश्नुते इति समष्टिः इति ।

तदनेन व्याप्नोति इत्यर्थकरणेन सर्वान् वशीकरोति इत्यर्थः कथं लब्ध इति ज्ञायते ।

५) विषयसौष्ठवसम्पादनम्

अभावः केन प्रमाणेन गृह्यत इति विचारः । तत्रानुव्याख्या एवं वर्तते-

[५]अर्थापत्त्युपमाभावा अनुमान्तर्गताः क्वचित् ।

प्रत्यक्षान्तर्गतोऽभावः सुखादेर्नियमेन च ।

अन्यत्र झटिति प्राप्तः.. इत्यादि ।

तस्य सामान्यत एवमर्थो भाति । घटः नास्ति योग्यत्वे सति अनुपलभ्यमानत्वात् इत्यनुमानेन प्रत्यक्षयोग्यार्थप्रतियोगिकाभावज्ञानं

---

४. बृहदारण्यकोपनिषद्भाष्यम् - पञ्चमोध्याय-

५. श्रीमदनुव्याख्यानम् - ३-२-१-३

भवति । क्वचिच्च घटाद्यभावग्राहकं प्रत्यक्षमपि भवति । यत्र अभावज्ञानं झटिति भवति तत्र प्रत्यक्षं, यत्तु विलम्बेन जायते तत्र अनुमानेन इति । सुखाद्यभावश्च नियमेन साक्षिप्रत्यक्षेण ग्राह्य इति । अत्र च न्यायसुधायामेतदुक्तं भवति इत्यनेन अभावज्ञानविषये के किं वदन्ति, तस्यासाधुता कुत इति विवृतमस्ति । तथाहीमानि सुधावाक्यानि -

[६]'घटाद्यभावग्राहकं योग्यानुपलब्धिरूपं प्रमाणं पृथगेवेति मीमांसकाः । अनुपलब्धिलिङ्गकमनुमानमेव तदिति सौगताः । तदुभयमप्यनुपपन्नम् । प्रतियोगिस्मरणवतः पुरोवर्तिनि घटाद्यभावस्य प्रत्यक्षेणैव गम्यमानत्वात्। इन्द्रियान्वयव्यतिरेकानुविधायिनोऽभावप्रत्ययस्यअप्रत्यक्षफलत्वानुपपत्तेः । इत्यादि' तदनेन व्याख्यानेन अस्माकमभावज्ञानविषये स्फुटं निर्णयो जायते । इत्थं विषयसौष्ठवसम्पादकानि व्याख्यानानि ।

६) अन्यान्यस्वपरग्रन्थोल्लेखपुरस्सरं प्रमेयदृढीकरणम् ।

[७]'परिपूर्णं गुरूंश्चान् गीतार्थं वक्ष्यामि लेशतः' इति गीताभाष्यमङ्गल पद्यम् । तत्र आन् - व्यासान् । अ आ अं अः पुराणर्षिः व्यासः शाखा सहस्रकृत् इति तन्नामसु पाठात्' इति टीकया आन् इत्यनेन आचार्यः वेदव्यासनतिं चकार इति ज्ञायते । परन्तु इदं वाक्यं कुत्रास्ति इति अस्य आकरो न ज्ञायते । तदा भावदीपिका - भावरत्नकोषादि व्याख्यानेषु 'महाभारतनिर्माता कवीन्द्रो बादरायणः'इत्यादि अग्रिमवाक्यान्यपि सङ्गृह्य इति वासुदेवसहस्रनाम्नि व्यासनामसु पाठादित्यर्थः इति व्याख्यातम् ।

६. श्रीमन्न्यायसुधा - ३-२-१-३ पृष्ठम् ९५२

७. गीताभाष्यम् - उपोद्घातः -१ पृष्ठम् - ५

तदनेन आकरज्ञानेन अध्ययनं परिपूर्णं भवति ।

परग्रन्थोल्लेखनं कृत्वाऽपि क्वचन व्याख्यानं क्रियते । तद्यथा - "गीताभाष्ये - 'वेदार्थाज्ञमधीकारवर्जितं स्त्रियादिकम्' ।

अवेक्ष्य प्रार्थयामासुः इत्यादि श्रूयते । तत्र अधीकार इति कथं भवति, अधिकार इति भवेन्नु इति शङ्कायां 'उपसर्गे घञ्यमनुष्ये बहुलमित्यतो दीर्घः' इत्युक्तम् । यो व्याकरणं सम्यगधीतवान् स जानात्येवास्य सूत्रस्य प्रवृत्तिमनुवृत्त्यादिकं च । अनधीतव्याकरणादीतर शास्त्राणामपि एतद्विषये ज्ञानजननाय व्याख्यानेषु अनुवृत्तिदृष्टान्ता-दिप्रदर्शनपूर्वकं सूत्रमिदं व्याख्यातम् । अधीकारेति रूपस्य निष्पत्तिश्च प्रादर्शि । तदनेन स्वशास्त्राध्ययनसमकालमेव व्याकरणादिशास्त्रव्युत्पत्तिम् अपि प्राप्तारोऽध्येतारः ।

बहूनां व्याख्यानानां प्रयोजनानि

यद्यपि मूलग्रन्थार्थावगमनाय एकेनैव व्याख्यानेनालम् । तथापि तत्तद्व्याकर्तारः यद्विषयं मनसिकृत्य व्याकुर्वते तदनुगुणं तत्र विषयाः उपस्थाप्यन्ते । एके व्याकरणे रुचिमन्तः स्युः तेषां व्याख्याने तु व्याकरण विशेषा एव दृश्यन्ते । उदाहरणार्थं भावरत्नकोषः । येषां च मीमांसाभिरुचिः ते तु स्वसिद्धान्तमपि मीमांसान्यायैरेव दृढीकुर्वन्ति । यथा चन्द्रिकायां व्यासतीर्थाः । ये च न्यायशास्त्रासक्ताः ते खलु न्यायसिद्धान्तरीति-मनुसरन्त एव सिद्धान्तस्थापकाः । यथा भेदोज्जीवनव्याकर्तारः काशी तिम्मण्णाचार्याः ।

८. गीतभाष्यम् अध्यायः -१ पृष्ठम् - ४०-४२

तदेवं बहु व्याख्यानानामेकस्य ग्रन्थस्य सम्भवेऽपि एकैकस्माद् एकैको नूतननूतनविषय इति बहुविषयावगमो महत्प्रयोजनमिति सर्वमनवद्यम् ।

**उपसंहारः**

तदेवमस्मिन् प्रबन्धे व्याख्यानस्वरूपप्रयोजनादिविषये यथाशक्ति विमृष्टम् । इतोऽप्यधिकं वक्तव्यं स्यात् । महान्तः क्षाम्यन्तु । स्वस्ति ।

**अत्रोल्लिखिताः ग्रन्थाः**


१. अपौरुषेयाः वेदा उपनिषदश्च

२. श्रीमध्वाचार्यप्रणीताः - ब्रह्मसूत्रभाष्यम्, अनुव्याख्यानम्, भगवद्गीताभाष्यम्, बृहदारण्यकोपनिषद्भाष्यम्.

३.श्रीजयतीर्थप्रणीताः - श्रीन्यायसुधा, तत्त्वप्रकाशिका, प्रमेयदीपिका.

# भारतीयदर्शनानि तथा माध्ववेदन्तदर्शनम्

**डा. नारायणः पूजार**
सह प्राध्यापकः, द्वैतवेदान्तविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपतिः

किम् नाम दर्शनम्? दर्शनम् इत्यस्य ज्ञानम् इति, ज्ञानसाधनं शास्त्रम् इति च अर्थः। दृशिरु प्रेक्षणे इति धातोः ल्युट् प्रत्यये सति निष्पन्नः दर्शनम् इति शब्दः। ल्युट्प्रत्ययः भावार्थे करणार्थे च भवति। भावार्थे ल्युट् प्रत्ययः भवति चेद् दर्शनशब्दस्य ज्ञानम् इति अर्थः (दृश्यते इति दर्शनम्)। करणार्थे भवति चेत् ज्ञानसाधनं शास्त्रम् इति अर्थः (दृश्यते अनेन इति दर्शनम्)। ज्ञानसाधनानि अनेकानि सन्ति। यथा पञ्चज्ञानेन्द्रियाणि, अनुमानम्, शब्दश्च। चक्षुः, रसनं, घ्राणं, त्वक्, श्रोत्रं, इति पञ्च ज्ञानेन्द्रियाणि भवन्ति। एतैः पञ्चज्ञानेन्द्रियैः क्रमशः रूप-रस-गन्ध-स्पर्श-शब्दानां ज्ञानं जायते।

देशतः कालतः असन्निहितानां पदार्थानां ज्ञानं प्रत्यक्षेण न भवति। तादृशानां पदार्थानां ज्ञानं शब्देन वा अनुमानेन वा भवति। एतस्य विवरणम् अग्रे भविष्यति। अत्र अयं प्रश्नः भवति-दर्शनम् इति पदस्य ज्ञानसाधनम् इति अर्थः चेत् चक्षुरादीनि ज्ञानसाधनानि बहूनि सन्ति। तेषु अपि दर्शनपदं प्रयोक्तुं शक्यते। कुतः दर्शनपदस्य शास्त्रम् इत्येव अर्थः उक्तः? इति

इदम् अत्र उत्तरं भवति ''असाधारण्येन हि व्यपदेशाः भवन्ति'' इति नियमः अस्ति । व्यपदेशाः नाम अभिधानानि अथवा नामानि । तानि मुख्यतः असाधारणवस्तुषु अथवा प्रधानवस्तुषु एव भवन्ति । प्रसङ्गवशात् अन्यवस्तुषु अपि भवन्ति । यथा सरसिजम् इति शब्दः । सरसिजम् इत्यस्य सरसि=जलाशये जायते इति सरसिजम् इति अर्थः । जलाशये कमलं, शैवालं, मत्स्यादिकमपि जायते । तथापि शैवालादिषु सरसिजशब्दः न भवति । कमले एव प्रधानतया भवति ।

प्रसङ्गवशानाभ्याम् शैवालादिषु अपि कदाचित् सरसिजम् इति शब्दः प्रयुज्यते । तद्वद् दर्शनं इत्यस्य दृश्यते अनेन इति व्युत्पत्त्या ज्ञानसाधनम् इति अर्थः । ज्ञानसाधनेषु दर्शनशब्दः साधारणः अपि असाधारणसाधने एव भवति ।

प्रत्यक्षानुमानैः अग्राह्याः महात्मनामेव बुद्धिगोचराः पदार्थाः येन दृश्यन्ते - ज्ञायन्ते तदेव दर्शनम् असाधारणम् इति । अतः दर्शनम् इति शब्दः शास्त्रेषु प्रधानम् भवति । दर्शनशब्दवाच्यानि शास्त्राणि द्विविधानि ।

**नास्तिकदर्शनानि आस्तिकदर्शनानि इति ।**

तत्र ''वेदाः प्रमाणम्'' इति ये मन्यन्ते ते आस्तिकाः । तेषां दर्शनम् आस्तिकदर्शनम् । ये च ''वेदाः अप्रमाणम्'' इति मन्यन्ते ते नास्तिकाः । तेषां दर्शनम् नास्तिकदर्शनम् ।

**आस्तिकदर्शनेषु वेदान्तदर्शनम् अन्यतमत्**

वेदान्तदर्शनेषु अद्वैतवेदान्तदर्शनं, विशिष्टाद्वैतदर्शनं, माध्ववेदान्त-(द्वैतवेदान्त) दर्शनम् इति त्रीणि प्रधानवेदान्तदर्शनानि । अन्यानि अपि

सन्ति शक्तिविशिष्टाद्वैतं शिवाद्वैतं द्वैताद्वैतादीनि । प्रधानतया वेदान्तदर्शने आत्मा (जीवः), परमात्मा (ब्रह्म) प्रपञ्चः इति एते विषयाः निरूप्यन्ते । एतेषां जीवब्रह्मप्रपञ्चानां मध्ये परस्परं अभेदः अस्ति इति केचन, भेदः अस्ति इति केचन,अपरे भेदाभेदः अस्ति इति च अभिप्रयन्ति । अत एव वेदान्तदर्शनानां प्रतिपाद्यं विषयम् आश्रित्य तदनुगुणं नामानि प्रसिद्धिम् आगतानि । प्रायः वेदान्तदर्शनस्य मूलानि भवन्ति उपनिषदः, ब्रह्मसूत्राणि, भगवद्गीता च । एतदेव प्रस्थानत्रयम् इति उच्यते । उपनिषत्प्रस्थानं, सूत्रप्रस्थानं गीताप्रस्थानम् इति । सर्वैः अपि वेदान्तदर्शनाचार्यैः प्रस्थानत्रयस्य व्याख्यानं कृतमस्ति । तेषां व्याख्यानानि एव **''भाष्याणि''** इति व्यवह्रियन्ते ।

समयाः हि प्रवाहतोऽनादिनित्या इत्यभियुक्तोक्तेः सर्वाण्यपि दर्शनानि प्रवाहतोऽनादिनित्यानि । कस्मिंश्चित् कालघट्टे तत्तद्दर्शनस्याभ्युदयः समभूदिति भारतीयदर्शनपरम्पराभिज्ञा एव ज्ञातुं शक्नुवन्ति । अतः दर्शनानां पूर्वत्वापरत्वे तत्तद्दर्शनाभ्युदयसापेक्षे । तत्तद्दर्शनाभ्युदयकारणीभूतानां कालमपेक्ष्यैव दर्शनानामपि कालः निर्णीयते ।

**दार्शनविकासः**

प्रायः स्तरत्रये दर्शनानां विकासः परिदृश्यते । परमार्थदिदृक्षुः कश्चन ऋषिः सुदीर्घकालेन तपसा यत् प्राप्नोति तन्मन्त्ररूपेणाभिव्यज्यते । ऋषयः मन्त्रद्रष्टारः । अयं हि प्रथमस्तरः । मन्त्राणामर्थनिर्णयाय ऋषिकल्पः कश्चन सूत्राणि कारिकाः वा ग्रथयति । द्वितीयोऽयं स्तरः । अनेन हि दर्शनं किञ्चिदाविष्कारं गच्छति । सूत्राणि कारिकाः वा

व्याख्यातुं बहवः ज्ञानिनः बहुधा प्रायतन् । पूर्वपक्षसिद्धान्तरूपेण तत्सम्प्रदायप्रवर्तकाः मतान्तरनिराकरणेन स्वाभिमतस्थापनार्थं भाष्याणि रचयामासुः । तदनुयायिभिः कालान्तरे सपरिष्कारं टीकाटिप्पण्यादयः विरचिताः।

**दर्शनानांविषयवस्तु**

प्रत्येकस्यापि दर्शनस्यारम्भे तद्दर्शनस्य आरम्भणीयत्वसमर्थनं दृश्यते । अनुबन्धचतुष्टये सति आरम्भणीयत्वं दर्शनस्य नान्यथा । अधिकारी, विषयः, प्रयोजनं, सम्बन्धश्चेति अनुबन्धचतुष्टयम् । विषयः=दुःखनिवृत्त्युपायाः सुखप्राप्त्युपायाः । अधिकारी=सुखापेक्षी । प्रयोजनम्= सुखम्, दुःखनिवृत्तिश्च । सम्बन्धः अनेकविधः यथा-ग्रन्थस्य विषयस्य सम्बन्धः प्रतिपाद्यप्रतिपादकभावसम्बन्धः, विषयस्य अधिकारिणश्च ज्ञातृ-ज्ञेयभावसम्बन्धः, विषयस्य प्रयोजनस्य जन्य-जनकभावसम्बन्धः प्राप्य-प्रापकभावसम्बन्धः । प्रयोजनं हि आत्य-न्तिकसुखप्राप्तिः । सुखप्राप्तिः दुःखनिवृत्तिश्चेति द्वयमिदं जीवसामान्या-पेक्षितम् । अनेन च जीवानां योऽयं जननमरणादिरूपसंसारः स दुःखस्वरूप एव इति सर्वसमयाभिमतं तत्त्वम् । अत एव अलौकिकं नित्यं सुखम् आप्तुम् प्रापयितुं वा सर्वाण्यपि दर्शनानि प्रवृत्तानि । तत्र दुःखकारणं किम् ? तन्निवृत्त्युपायाः के ? किं वा नित्यं सुखम् ? तत्प्राप्त्युपायाः के ? इत्येतावदेव दर्शनानां मुख्यः विषयः । एतदनुबन्धिनोऽन्येऽपि विषयास्सम्भवन्ति । तत्र इमे मुख्याः विषयास्सन्ति ।

## आत्मा

चार्वाकाः चैतन्ययुतं शरिरमेव आत्मा इति मन्यन्ते । बौद्धाः शरीरातिरिक्तमात्मानमङ्गीकुर्वन्ति चेदपि तं क्षणिकमाहुः । क्षणिकविज्ञानसन्तान एवात्मेति तन्मतम् । जैनास्तु ज्ञानेच्छाक्रियाश्रयमात्मानमङ्गीकुर्वन्ति । एवमेवास्तिकदर्शनान्यपि शरीरातिरिक्तमात्मानं सुखाद्याश्रयत्वेन, ज्ञानाश्रयत्वेन, केचन ज्ञानस्वरूपत्वेन, अन्ये केचन सगुणत्वेन, निर्गुणत्वेन,एकत्वेनानेकत्वेन चात्मतत्त्वमुपवर्णयन्ति ।

## अनात्मा-

समस्तोऽयं चेतनातिरिक्तः प्रपञ्चः अनात्मनि अन्तर्भवति । नास्त्यत्र दार्शनिकेषु विप्रतिपत्तिः । परिदृश्यमानोऽयं प्रपञ्चः पारमार्थिक इति चार्वाकाः, बौद्धैकदेशिनः, जैनाः, न्यायवैशेषिकाः, सङ्ख्याश्च मन्यन्ते । विज्ञानवादिनः, शून्यवादिनः, अद्वैतवादिनश्च प्रपञ्चस्य व्यावहारिक-सत्यत्वमेवाभिप्रयन्ति । अनात्मत्वेनान्यैः परिगणितानि पुण्यपापाद्यदृष्टं, तत्कारणानि प्रारब्ध–आगामि–सञ्चितकर्माणि वा चार्वाकाः नाङ्गीकुर्वन्ति । अन्ये बौद्धजैनादयः सत्कर्मणा पुण्यं, दुष्कर्मणा पापं, पुण्यकर्मणा च सुखं, पापेन च दुःखमङ्गीकुर्वन्ति । ''अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम्'' इत्युक्तरीत्या इह जन्मनि जन्मान्तरे वा शुभाशुभकर्मणां फलमनुभोक्तव्यमेवेति सर्वाभिमतं तत्त्वम् । अनेन कृतप्रणाशस्याकृताभ्यागमस्य वा नावकाशः ।

## अनात्मा

१. दृष्टप्रपञ्चः पञ्चभूतात्मकोऽयं प्रपञ्चः, वृक्षः, पर्वतः, पाषाणः

इत्यादयः २. अदृष्टप्रपञ्चः- पापकर्म, पुण्यकर्म, अदृष्टादयश्च । जगतः कालदेशनियतत्वं, उत्पत्तिविनाशनियतत्वं, कार्यकारणभावनियतत्वञ्च सर्ववादिसम्मतम् । सत्कार्यवादः, असत्कार्यवादः, विवर्तवादः, परिणाम-वादश्चेति कार्यकारणभावम् अनेकरीत्या प्रतिपादयन्ति चेदपि प्रत्येकस्यापि कार्यस्य किञ्चित् कारणं भवत्येवेति समेषां दर्शनानाम् अवि प्रतिपन्नं तत्त्वम् ।

## बन्धः मोक्षश्च

जननमरणयोश्चक्रमेव संसार इत्युच्यते । अयमेव हि संसारः बन्धः इति । तस्मात् बहिरागमनमेव च मोक्षः इति च दार्शनिकानां परिभाषा । बन्धस्य कारणन्तु अविद्यैव । बन्धस्य, तत्कारणीभूताया अविद्यायाश्च स्वरूपविषये अपि विवादः अस्ति । परन्तु अविद्यायाः रागद्वेषदुः-खादिमूलत्वं सर्वे मन्यन्ते । ज्ञानस्य मोक्षसाधनत्वन्तु बहुवादिसम्मतं तत्त्वम् । केचन कर्मणोऽपि मोक्षसाधनत्वमाहुः । यथा बन्धतत्कारण-स्वरूपयोः विवदन्ते तथा मोक्षस्वरूपे तत्कारणीभूतज्ञानस्वरूपे च ।

## माध्ववेदान्तः

भेदवादः, प्रपञ्चसत्यतावादः इत्यादयः मध्वाचार्यात् पूर्वमपि आसन् । अत एव तस्य निराकरणाय अभेदवादः प्रवृत्तः । परन्तु कस्मिंश्चित् काले मध्वाचार्यैः भेदवादः दृढतया संस्थापितः इति, तस्य दर्शनस्य **''माध्ववेदान्तः''** इति व्यवहारः क्रियते । ''तत्ववादः'' इति प्राचीनं नाम अस्ति । अद्वैतमते प्रतिपादितस्य अद्वैतस्य, विशिष्टाद्वैतमते प्रतिपादितस्य विशिष्टाद्वैतस्य विमर्शनम् अत्र भवति

इति कारणात् द्वैतदर्शनमिति अन्ये व्यवहरन्ति। तथैव च प्रसिद्धिरागता ।

## मध्वाचार्याः तथा तेषां शिष्याः -

मध्वाचार्याः कर्णाटकदेशान्तर्गते उडुपीनगरसमीपस्थे पाजकक्षेत्रे जनिमापुः । माता वेदवती पिता च नारायणभट्टः इति प्रतीतिः अस्ति । जनाः नारायणभट्टं मध्यगेहभट्टः इति व्यवहरन्ति स्म। मध्वाचार्याणां वासुदेवः इति पित्रा कृतं नाम आसीत् । बाल्ये एव वासुदेवेन अनेके महिमानः प्रदर्शिताः आसन् । बाल्यादारभ्य अवतारसमाप्तिपर्यन्तं तेषां जीवनचरित्रं श्रीमध्वविजयकाव्ये निरूपितम् अस्ति ।

श्रीमध्वविजयस्य षोडशसर्गात्मकस्य रचयिता श्रीनारायण-पण्डिताचार्यः । नारायणपण्डिताचार्यः त्रिविक्रमपण्डिताचार्याणां पुत्रः आसीत् । त्रिविक्रमपण्डिताचार्यः मध्वाचार्याणां साक्षात् शिष्यः आसीत् । मध्वाचार्याणां समयः क्रिस्तशक १२३८ वर्षादारभ्य १३१७ वर्षपर्यन्तम् । ते स्वकीये एकादशे वयसि अच्युतप्रज्ञतीर्थेभ्यः तुरीयाश्रमं स्वीकृत्य **पूर्णप्रज्ञतीर्थ** इति प्रसिद्धाः समभवन् । ततः स्वगुरुपीठे पट्टाभिषेकसमये **आनन्दतीर्थेति** नामाऽप्नुवन् । मध्वाचार्याः इति एतेषामतिप्रसिद्धं नाम । यन्नाम्ना द्वैतवेदान्तः ‘‘माध्ववेदान्तः’’ इति प्रसिद्धो वर्तते । पूर्णबोधः, पूर्णप्रज्ञः, दशप्रमतिः, आनन्दतीर्थः, अनुमानतीर्थः, मध्वाचार्यः इति तेषाम् असाधारणगुणनिमित्तानि विभिन्ननामानि दृश्यन्ते ।

## मध्वाचार्याणां शिष्याः -

मध्वाचार्याणां शिष्याः अनेके आसन् । तेषु सत्यतीर्थाः हृषीकेशतीर्थाः (पलिमारुमठः) नरसिंहतीर्थाः (अदमारुमठः) जनार्दनतीर्थाः (कृष्णापुरमठः) उपेन्द्रतीर्थाः (पुत्तिगेमठः) वामनतीर्थाः (शीरूरुमठः) विष्णुतीर्थाः (सोन्दामठः ) रामतीर्थाः (काणियूरुमठः ) अधोक्षजतीर्थाः (पेजावरमठः) पद्मनाभतीर्थाः, नरहरितीर्थाः, माधवतीर्थाः, अक्षोभ्यतीर्थाः इति अनेके सन्यासिनः शिष्याः । त्रिविक्रमपण्डितस्तु गृहस्थशिष्यः । तथा तस्य अनुजः शङ्करार्यः अपि मध्वाचार्यशिष्यः । अन्योऽपि शङ्करार्यः शिष्यः आसीत् । एते सर्वेऽपि मध्वाचार्यैः प्रवर्तितस्य द्वैतदर्शनस्य सम्प्रदायस्य वा प्रवर्तकाः आसन् ।

## मध्वाचार्यैः रचितानां ग्रन्थानाम् अयं स्थूलविभागः

श्रुतिप्रस्थानग्रन्थाः । उपनिषत्प्रस्थानग्रन्थाः । गीताप्रस्थानग्रन्थाः । सूत्रप्रस्थानग्रन्थाः । इतिहासप्रस्थानग्रन्थाः । पुराणप्रस्थानग्रन्थाः । दश-प्रकरणानि । आचारग्रन्थाः । तन्त्रग्रन्थः । स्तोत्राणि इति ।

अन्ये ये वेदान्तदर्शनाचार्याः शङ्कराचार्य-रामानुजाचार्यादयः सन्ति, तैः इतिहासपुराणादिविषयेषु ग्रन्थाः न रचिताः । परन्तु मध्वाचार्याणाम् इदं वैशिष्ट्यं भवति यत् तैः प्रस्थानत्रयेण साकं इतिहासपुराणादीनां विषयेऽपि ग्रन्थाः रचिताः । मध्वाचार्याः स्वसिद्धान्तस्य प्रतिष्ठापनार्थं सर्वमूलाभिधान् ग्रन्थान् रचितवन्तः । येषु ब्रह्मसूत्रप्रस्थाने भाष्यम् - अनुव्याख्यानम् - न्यायविवरणम् - सङ्ग्रहभाष्यम् इति चत्वारः ग्रन्थाः सन्ति । गीताप्रस्थाने गीताभाष्यम्- गीतातात्पर्यम् इति द्वौ ग्रन्थौ स्तः ।

दशोपनिषदां दश उपनिषद्भाष्याणि सन्ति । श्रुतिप्रस्थाने ऋग्भाष्यम् इति एकः ग्रन्थः अस्ति । तत्त्वसङ्ख्यानम् - तत्त्वविवेकः - प्रमाणलक्षणम् कथालक्षणम् - मायावादखण्डनम् - उपाधिखण्डनम् -प्रपञ्चमिथ्यात्वानु-मानखण्डनम् - तत्त्वोद्योतः - विष्णुतत्त्वविनिर्णयः - कर्मनिर्णयः इति दश प्रकरणग्रन्थाः सन्ति । मायावादखण्डनम् उपाधिखण्डनम् प्रपञ्चमिथ्यात्वानुमानखण्डनम् एतत् त्रयं मिलित्वा खण्डनत्रयमिति व्यवह्रियते । तन्त्रमार्गे तन्त्रसारसङ्ग्रह इति एकः, पुराणप्रस्थाने यमकभारतम् - महाभारततात्पर्यनिर्णयः - भागवततात्पर्यम् इति त्रयः ग्रन्थाः सन्ति । आचारमार्गे कृष्णामृतमहार्णवः - सदाचारस्मृतिः - जयन्तीनिर्णयः - यतिप्रणवकल्पश्च इति चत्वारः ग्रन्थाः, कन्दुकस्तुतिः-नखस्तुतिः - द्वादशस्तोत्राणीति स्तोत्रग्रन्थाः च प्रसिद्धाः उपलब्धाः च वर्तन्ते । ब्रह्मसूत्रसम्बन्धिनां चतुर्णां ग्रन्थानां मध्ये मध्वाचार्यैः ब्रह्मसूत्रभाष्यं प्रथमतः विरचितम् ।

**सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुकारिभिः ।**
**स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ।**

इत्यादिभाष्यलक्षणोपेतं हि तद्भाष्यम् । तदनन्तरं च भाष्यस्य अतिगम्भीरत्वात् मन्दमतिभिः शिष्यैः भाष्ये प्रदर्शितानां युक्तीनां सुलभतया उद्धरणस्य अशक्यत्वात्, पुनरपि भाष्ये विद्यमानानां प्रमेयाणां समर्थकयुक्तीनां उद्धरणाय शिष्यैः भृशं प्रार्थिताः अनुव्याख्याननामकं ब्रह्मसूत्रव्याख्यानम् आरचयन् । तत्र भाष्यन्तु अतीव गम्भीरार्थं शब्दतः अतीव सङ्क्षिप्तार्थम् । अनुव्याख्यानं तु द्विसहस्रश्लोकपरिमितं प्रायः

आनुष्टुभेन छन्दसा निबद्धम् अस्ति । अतीव गम्भीरम्, अनेकार्थयुक्तं, युक्तिनिर्भरं, नानामतानां विमर्शनपरं च वर्तते । तस्मात् सर्वमूलग्रन्थेषु भाष्यानुव्याख्याने अतीव प्रामुख्यमावहतः। न्यायविवरणे प्रत्येकम् अधिकरणस्य पूर्वपक्षसिद्धान्तन्यायाः विवृताः। सङ्ग्रहभाष्ये तु द्वात्रिंशन्मितैः श्लोकैः समेषां सूत्राणाम् अर्थः सङ्गृहीतः । एतेषु ग्रन्थेषु विशेषतः विष्णुपारम्यं, तस्यानन्तगणैकदेहत्वम् अत एव दोषरहितत्वं, सकलशास्त्रमुख्यप्रतिपाद्यत्वं लक्ष्म्यादीनां तन्नियततत्त्वम् - तारतम्यम् - जगत्सत्यत्वम्, जीवत्रैविध्यम्, पञ्चभेदादयः प्रमेयाः प्रतिपादिताः । एतेषां मुख्यप्रमेयाणां सम्बद्धाः तत्साधकाश्च अन्येऽपि बहवः प्रमेयाः एषु ग्रन्थेषु विचारिताः। अपि च एतादृशस्य सिद्धान्तस्य विरुद्धानि यानि जैन-बौद्ध-चार्वाक-साङ्ख्य-योग-न्याय-वैशेषिक-पूर्वमीमांसादीनि दर्शनानि सन्ति । तानि सर्वाणि अपि एतेषु ग्रन्थेषु विमृष्टानि सन्ति । सर्वे च पूर्वतनाः ब्रह्मसूत्रभाष्यकर्तारोऽपि विमृष्टाः । विशेषतश्च अद्वैतवेदान्तः विस्तरेण अत्र विमृष्टो वर्तते ।

# श्रीमध्वाचार्यैः कृतं गीतानुसन्धानम् (परिचयः)

**डा ।। वंशीकृष्णाचार्यः पुरोहितः**
निदेशकः, तत्वसंशोधनसंसत्
श्रीपलिमारुमठः, रजतपीठपुरम्

**भारतं सर्वशास्त्रेषु भारते गीतिका वरा ।**
**विष्णोः सहस्रनामापि ज्ञेयं पाठ्यं च तद् द्वयम् ।।**

इति श्रीमद्भगवद्गीतायाः माहात्म्यं पुराणेषु सर्वत्र उल्लिखितमस्ति । तत्पठनं अधयनं च अस्माभिः अवश्यं कर्तव्यम् । अतः गीतायाः यथावदर्थं ज्ञातुं, गीतामृतं पातुं सज्जनकृपालवः श्रीप्राणांशसम्भूताः श्रीमदानन्दतीर्थभगवत्पादाचार्याः भाष्यम् अलिखन् । अतः तेभ्यः अनन्तनमोवाकान् समर्पयामि ।

अहो भाग्यमस्माकं यत् श्रीमद्भगवद्गीतायाः यथागीताचार्याभिप्रायं श्रीमध्वाचार्यैः कृतं भाष्यं लब्धमिति । गीता तावत् साक्षात् भगवता श्रीकृष्णेन गीतमिति सर्वविदितमेव । कुरुक्षेत्रे रणाङ्गणे श्रीकृष्णः अर्जुनमुद्दिश्य जीवनमौल्यानाम् उपदेशमकरोत् । स्वकर्तव्यस्य ज्ञापनार्थं अर्जुनाय उपदिदेश । अर्जुनं निमित्तीकृत्य अस्मानपि श्रीकृष्णः अबोधयत् । ताम् उपदेशरूपां गीतां भागवान् श्रीवेदव्यासः सर्वशास्त्रसारभूते श्रीमन्महभारते निबबन्ध ।

**स्त्रीशूद्रब्रह्मबन्धूनां त्रयी न श्रुतिगोचरा ।**
**अतो भारतमाख्यानं कृपया मुनिना कृतम् ।।**

एवं भगवतोक्त्या वेदार्थज्ञानानधिकारिणां धर्मज्ञानद्वारा मोक्षो भवेदिति भगवान् श्रीबादरायणः अष्टादशपर्वात्मकं भारतं कृत्वा, तत्र भीष्मपर्ववत् महाभारतपारिजातमधुभूतां सर्वभारतार्थसङ्ग्रहभूतां अष्टादशाध्यायात्मिकां श्रीकृष्णार्जुनसंवादरूपां श्रीमद्भगवद्गीताम् अरचयत्। वैदिकसम्प्रदाये बह्व्यः गीताः सन्ति। तथापि ''निर्विशेषितसूत्रत्वं ब्रह्मसूत्रस्य चाप्यत'' इति न्यायेन निर्विशेषितगीता नाम सा भगवद्गीतैव। तत्र गीतायां षट्कत्रयं वर्तते। प्रथमषट्के ज्ञानोपायकथनम्। द्वितीयषट्के साधनकथनम्। तृतीये पूर्वोक्तस्य साधनस्य प्रपञ्चनमकरोत्। तस्याः भगवतोक्तायाः गीतायाः प्राधान्यं सर्वे अर्वाचीनाः पाश्चिमात्या अपि सादरं प्रशंसनं तथा आचरणमपि कुर्वन्तः सन्ति। गीतायां श्रीकृष्णेन प्रयुक्तानां शब्दानाम् अर्थम् अपूर्वरूपेण श्रीमन्मध्वाचार्यैः उद्घाटितमस्ति। आचार्याणां कृष्णोक्तिषु कियान् आदरः अस्तीति गीतामधिकृत्य तैः उल्लिखितेन ग्रन्थद्वयेन ज्ञातुं शक्यते। श्रीमध्वविजये महाकाव्ये मध्वाचार्येण कृतानां ग्रन्थानां विषये उल्लेखो वर्तते । तत्र गीताभाष्यम् अधिकृत्यापि किञ्चित् लिखितम् अस्ति। तत्र ग्रन्थकारः एवं अवोचत्—

**गीतातात्पर्यभाष्याभ्याम् आभ्यां विश्वं प्रकाश्यते।**

**गोगणैरप्रतीकारैः अर्केन्दुभ्यामिवाधिकम्** ।।इति (म.वि.१५-७५)

विश्वप्रकाशनाय ग्रन्थद्वयं वर्तते इति उल्लिखितमस्ति श्रीनारायणपण्डिताचार्यैः। श्रीकृष्णाभिप्रायं सम्यक् स्फुटीकरिष्यति इदं भाष्यम्। श्रीमध्वाचार्यैः लिखितेषु श्रीसर्वमूलग्रन्थेषु इदं गीताभाष्यं

प्राथमिकमिति अस्य ग्रन्थस्य वैशिष्ट्यं वर्तते। श्रीमध्वाचार्याः स्ववेदान्तसाम्राज्याभिषेकानन्तरं प्रथमं बदरिकाश्रमं प्रति अगमन्। तत्र स्थितं श्रीनारायणं प्रणम्य तस्मै उपायनरूपेण इदं गीताभाष्यं समर्पयत्। तदा श्रीमन्नारायणः तस्य भाष्यस्य स्वाङ्कितमपि अदात्। तत्सर्वं श्रीमध्वाचार्याणां भाष्यस्य मङ्गलाचरणान्तर्गतेन शब्देन ज्ञायते । सः श्लोकः एवमस्ति—

**देवं नारायणं नत्वा सर्वदोषविवर्जितम् ।**

**परिपूर्णं गुरूंश्चान् गीतार्थं वक्ष्यामि लेशतः ।।** इति ।।

तस्मिन् श्लोके अन्तिमे आचार्याः पूर्वं शक्तितः इति शब्दं अरचयन्। तच्छ्रुत्वा नारायणः अवोचत् यत् ''यद्यपि बह्वर्था गीतेयम्। तादृशान् अर्थान् वक्तुं त्वयि शक्तिरप्यस्ति। तथापि अत्र मन्दमतिमालक्ष्य स्वल्पमेवोक्तम्। अतः तत्र श्लेके 'शक्तितः' इति पदं परित्यज्य 'लेशतः' इति पदं स्थापय'' इति। अतः आचार्याः भगवतः श्रीकृष्णस्य यः अभिप्रेतः अर्थः आसीत्, तमेव अर्थं भाष्यरूपेण व्यरचयदिति श्रीनारायणेन मुद्राङ्कितमिदं श्रीगीताभाष्यम्।

अस्यां गीतायां बहुत्र शब्दानां विशेषार्थाः निरूपितास्सन्ति श्रीमध्वाचार्यैः। तत्र द्वितीयाध्यायस्य एकादशतमे श्लोके कृष्णेनैवोक्तं पदं वर्तते 'प्रज्ञावादान्' इति। प्रज्ञाः ज्ञानिनः, तेषां वादाः इति सामान्यतया केचिद् वदन्ति। अस्माकमपि स एवार्थः प्रातिभाति। किन्तु तादृशार्थः तत्र श्लोके न घटते। पूर्वम् अर्जुनेनोक्ताः ज्ञानिवादाः न भवितुमर्हन्ति। मोहेन कर्तव्यविमुखः आसित् सः। ते न ज्ञानिवादाः। अतः आचार्याः

भाष्ये एवं वदन्ति ‘प्रज्ञावादान् स्वमनीषोत्थवचनानि’ इति तत्र ‘दृष्ट्वेमं स्वजनं कृष्ण...’ इत्याद्यर्जुनवाक्येषु कुत्रापि बुद्धिमद्वादः न विद्यते। कौरवपक्षे यः कोऽपि भागवत्प्रियः नासीत्। द्वेषिणः एव सर्वे। तेषां निग्रहः अधर्मः इति बुद्धिमन्तः न वदन्ति। किन्तु तेषां निग्रहः क्षत्रियाणां धर्म एव। तत्कथं अर्जुनवाक्यानि बुद्धिमद्वाक्यानि भवन्ति॥

अतः तानि वाक्यानि स्वस्या एव मनीषायाः उत्थितानि। न तु शास्त्रावमर्शनेन उत्थितानि। अतः आचार्योक्त एवार्थः साधुः भवति। प्रज्ञायाः वादाः प्रज्ञावादाः स्वबुद्धिमात्रकल्पिताः वादाः। अथवा प्रकर्षेण जानन्ति इति प्रज्ञाः। तेषां अवादाः प्रज्ञावादाः। प्रज्ञविरुद्धवादा इत्यर्थः। तान् प्रभाषसे इति समीचीनार्थः भवति। अपूर्वार्थोऽयम्। श्रीमदान्दतीर्थभगवत्पादैः कृतं अनुसन्धानमपि समीचीनमेव।

इतोऽपि द्वादशतमे श्लोके श्लोकाभिप्रायं तावत् केचन एवं वदन्ति। अस्मिन् श्लोके ईश्वरनित्यत्वं साधयतीति। तद् असत्। कुतः इति चेत् ईश्वरः नित्यः इति पूर्वमेव सर्ववेदान्तैः साधितः प्रसिद्धश्चायमर्थः। पुनः तत्साधने सिद्धसाधनता तथा पुनरुक्तिरपि भवति। अतः अस्मिन् श्लोके न ईश्वरनित्यत्वं साध्यते। किन्तु जीवनित्यत्वं साध्यते इति समीचीनं भवति। अत्र भाष्यमेव वर्तते ‘‘ईश्वरनित्यत्वस्य अप्रस्तुतत्वात् दृष्टान्तत्वेनाह— यथा अहं नित्यः सववेदान्तेषु प्रसिद्धः एवं त्वं, एते जनाधिपाश्च नित्या’’ इति। जीवनित्यत्वे दृष्टान्तत्वेन अहं इत्युक्तं श्रीकृष्णेन। सर्वे स्वजनाः नित्याः एव। कुतः अन्वशोचः। अस्मिन् विषये शोकः ज्ञानिना न कार्यः इति कृष्णः अर्जुनम् उद्बोधयति।

एवं द्वितीयाध्याये ४८तमे श्लोके ''योगस्थः कुरु कर्माणि...'' इत्यत्र योगो नाम ज्ञानोपायः। तस्मिन् ज्ञानोपायलक्षणे योगे तिष्ठति इति योगस्थः इत्यर्थः। प्रथमं ज्ञानोपायं सम्प्राप्य तस्मिन्नेव स्थित्वा कर्माणि कुरु इति बोधयति। यतः ज्ञानोपायषट्के एव उक्तत्वात् सः एवार्थः समीचीनः। तत्र ज्ञानोपायम् अनुतिष्ठन् सङ्गं त्यज इत्युक्तम्। तत्र केचन सङ्गे त्यक्त्वा इत्यस्य कर्मसङ्गं त्यक्त्वा इत्यर्थं वदन्ति। तदसत्। सङ्गं नाम फलस्नेहः। तस्य त्यागः कर्तव्यः इति गीताचार्याभिप्रायः। अयमपि अपूर्वार्थ एव। फलरागत्यागं कृत्वा ज्ञानोपायमनुतिष्ठन् कर्माणि कुरु। तदा सिद्ध्यसिदध्योः समो भूत्वा ज्ञानी भवितुमर्हति। अभिप्रायस्तावत् फलं त्यक्त्वा, ईश्वरप्रीत्यै कर्माणि कुरु। स एव योगः इत्युच्यते इति संहृत्य श्रीकृष्णाभिप्रयं समुदघाटयदाचार्यमध्वः। एवं अनुभवसिद्धार्थः।

इतोऽपि सप्तमाध्याये ''मत्तः परतरं नान्यत्'' इत्यत्र परतर शब्दस्य अर्थः अहमेव इत्युक्तम्। एतावत्कालपर्यन्तं परापरतत्वयोः विवेचनमुक्त्वा, इदानीं परापरतत्वयोरपि उत्तमः अहमेव इति वदति। तथापि परतरान्तरस्य सत्वे अहम् इति न घटते इति प्राप्ते मत्तः अन्यत् न किश्चन इत्युत्तरम्। अत एव भाष्ये अन्ययोगव्यवच्छेदात्मक एव शब्दः प्रमाणान्तरेण अहमेव सर्वाधिकः। मत्तः परः कश्चन नास्ति इति उक्तम्। मत्तः इत्यस्य ''अहमेव परतरः। मदन्यः सर्वोत्तमः नास्त्येव'' इत्यर्थः सहजतया ज्ञायते। आचार्याणां भाष्ये एतत्सर्वं वर्तते। अत एव अस्मिन् ग्रन्थे एव पञ्चदशेऽध्याये ''यस्मात् क्षरमतीतोऽहं...'' इत्यादि

श्लोकेषु भगवत्परतरत्वस्यैव निरूपणं वर्तते। पूर्वोक्तस्यैव विशेषतया तृतीयषट्के प्रपञ्चनं सर्वशास्त्रसारभूतत्वेनोक्तं तत्र इति ज्ञायते। परापरतत्वयोः उत्तमत्वं नाम सर्वोत्तमत्वं स्वस्यैव सर्वशास्त्रप्रामाणिकतया वर्णितं वर्तते।

अतः श्रीमध्वाचार्याः स्वलिखितभाष्ये सर्वत्र अपूर्वत्वं प्राकाशयन्। अत एव सर्वज्ञत्वमपि द्योतते। यद् भाष्ये उक्तं पुनः तद् गीतातात्पर्ये नोच्यते। अतः सर्वत्र नाम गीतभाष्ये गीतातात्पर्ये च कृष्णस्य अभिप्रायानुसन्धानं सम्यग् वर्णितमस्ति। यदा आचार्यमध्वोक्तदिशा वयं गीताध्ययनं कुर्मश्चेत् गीताचार्यस्य अनुग्रहप्राप्तिविषये नास्ति संशीतिलेशः। अतः सर्वैः अध्येतव्यं श्रीमदानन्दतीर्थकृतं श्रीमद्भगवद्गीताभाष्यम् इत्युक्त्वा विरामामि।

**यः सर्वगुणसम्पूर्णः सर्वदोषविर्जितः।**
**प्रीयतां प्रीत एवालं विष्णुर्मे परमः सुहृत्॥**

शं नोऽस्तु॥

# पुराणानि प्रति श्रीमध्वाचार्यस्य योगदानम्

**डा.एस्. आनन्दतीर्थः**
संशोधकः, तत्वज्ञानविभागः,
मणिपालविश्वविद्यालयः
मणिपालः, उडुपि

इति ह शुश्रुम, यद् द्वापरे युगे मानुषमानसेषु तमः सम्बभूव। तन्निरसनार्थमेव भगवान् बादरायणभास्कर अवततार। उद्धार नष्टप्रायान् शास्त्रग्रन्थान्। वेदान् त्रेधा विभज्य वेदव्यासो बभूव। तेनैव महाभारतं नाम पञ्चमो वेदः, पुराणसंहिताश्च उज्जग्मुः। एतेषां निर्णयायैव श्रीमन्न्यायसूत्राण्यपि रचयाम्बभूव। एतान्येव ग्रन्थरत्नानि वैदिकविपश्चितां प्रमाणतमानीष्यन्ते।

किन्त्वत्र अयम् अवधेयांशः, अतीन्द्रियतत्वनिर्णये न प्रत्यक्षं प्रमाणं भवितुमर्हति, नापि च अनुमानम्। अत एव आस्तिकमताचार्याः अतीन्द्रियविषये शब्दप्रमाणस्यैव आधिक्यं समर्थयन्ते। वैदिक-मताचार्यैस्तु बह्वत्र स्वग्रन्थेषु वेदोपनिषदः आदय एव प्रमाण-तयोल्लिख्यन्ते। अत एव प्रायः सर्वैरपि मताचार्यैः श्रुतिप्रस्थानं (उपनिषत्प्रस्थानम्), सूत्रप्रस्थानम् एवं गीताप्रस्थानञ्च व्याख्यायन्ते। बहु विरलमुपलभ्यन्ते पुराणव्याख्यानानि। वेदोपनिषद्वचनान्येव उद्धृत्य स्वमतं प्रतिपादयन्ति। अत इयं संशीतिर्भवत्येव किमस्ति तत्वनिश्चये पुराणानामावश्यकत्वम् इति। अत एव वैदिकवाङ्मये पुराणानां स्थानं

कीदृशमिति न स्फुटीभवति ।

यदि च वैदिकवाङ्मये पुराणान्यपि प्राधान्यं भजन्ते, तर्हि तेषां प्रामाण्यमपि साधनीयम् । ग्रन्थानां तावत् आप्तवाक्यतयैव प्रामाण्यं वक्तव्यम् । अथ च पुराणानाम् आप्तवाक्यता कथं सिध्यति इत्यपि अवश्यं प्रतिपादनीयम् ।

तदत्र श्रीमध्वाचार्यस्योपायनम् अपूर्वम् । अस्य जिज्ञासाद्वयस्य उत्तररूपेण समग्रानां पुराणानां प्रधान्यं प्रदर्शितम् । तत्कथमिति सङ्क्षेपेणात्र पश्यामः ।

## पुराणानां प्राधान्यम्

श्रीमध्वचार्यः कदाऽपि स्वकपोलकल्पितं, प्रमाणातीतं न ब्रूते । नापि अनुमन्यते । नैव ग्रन्थे ग्रथ्नाति च । शास्त्रवचनान्यनुदाहृत्यैव स्वमतं स्थापयति । अत्र च इदं वैशिष्ट्यं यत्, श्रीमध्वाचार्यस्तु सर्वमूलग्रन्थेषु अत्यधिकतया पुराणवचनान्येव उदलिखत् ।

## सर्वमूलेषु १८ पुराणानां ९६२ वचनानि उल्लिख्यन्ते -

वैष्णवपुराणानां वचनानि - ४६१

ब्राह्मपुराणानां वचनानि - २८८

शैवपुराणानां वचनानि - १०७

## उपपुराणानि-

नरसिंहपुराणस्य वचनम् - २

आदित्यपुराणस्य वचनम् - ३

अत्र शिवपुराणस्य-लिङ्गपुराणास्य च वचनानि नोद्धृतानि । तथा च अनेन वैदिकप्रपञ्चे पुराणानामपि प्राधान्यं वर्तत एव इति श्रीमध्वाचार्येण परोक्षतया सूचितं भवति । न तावदेव, श्रीवेदव्यासवचनमेवोदाहृत्य सोदाहरणं प्रत्यपादयच्च ।

महाभारतस्यैव वचनमिदम्-

**इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।**
**बिभेत्यल्पश्रुताद् वेदो मामयं प्रतरिष्यति ।।**

म.भा. आदि प. ०१-२०४

तत्त्वनिर्धारणे वेदा एव परमप्रमाणानि । किन्तु वेदाः न केवलं मन्दधिषणनणानाम्, अपि तु प्रज्ञाप्रकाशेन तुलितधिषणानामपि दुरूहा एव । दुरधिगमा एव । अत एवेदं वचनं भगवतः बादरायणस्य 'इतिहासपुराणाभ्यां..' इति । तत्त्वज्ञानार्थं इतिहासोऽप्यावश्यकः, पुराणान्यपि । स्वतन्त्र्येण तेषामप्यध्ययनं निष्फलमिव भाति । अत एव इतिहासपुराणाभ्यां वेदं समपुबृंहयेत् । तदैव प्रतिभाति अमेयः प्रमेयः । इति हि भगवतः व्यासमहर्षेः आदेशः । केवलेन श्लोकैकेन नेदं स्फुटीभवति । उदाहरणेनैव विमृशामः-

याज्ञीयमन्त्रोपनिषदि प्राथम्येन पठ्यतेऽयं मन्त्रः-

**ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।**
**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् धद्धीनम् ।।**

ई. उ. १-१

'स्वायम्भुवो मनुः एतैर्मन्त्रैर्भगवन्तमाकूतिसूनुं यज्ञनामानं विष्णुं

तुष्टाव' इति श्रीमध्वाचार्य एव ब्रह्माण्डवचनमुद्धृत्य अस्य उपनिषदः पौर्वापर्यम् न्यरूरुपयात् । किन्त्वत्रेयं संशीतिर्जायते, स्वायम्भुवस्तु 'भुञ्जीथा', 'मा गृधः' इत्यादिभिः पदैः कं सम्बोधयति न तावत् भगवन्तमेव सम्बोधयति । स्तोत्रमध्ये 'भुञ्जीथा' इति आदेशस्या-प्रस्तुत्वात् । नान्यो जीवः तत्रासीत् । तत्स्पष्टीकारणार्थं भागवतपुराण-मवलोकनीयम् । भागवते अष्टमस्कन्धे अस्य इतिवृत्तं प्रस्तूयते । तत्र च समानं पद्यं किञ्चित् विभिन्नतया पठ्यते-

**आत्मावास्यमिदं विश्वं यज्जगत्यां जगन्मनः ।**
**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यचिद्धनम् ।।**

-भागवतम् ८-१-१०

अत्र तु सुविवृतम् । 'यज्जगत्यां जगन्मनः' इति मनः सम्बोध्य आदिशति मनुः । तथा च 'भुञ्जीथा', 'मा गृधः'इत्यादीनि वचनानि तु स्वकीयमेव मनः सम्बोध्य उपदिष्टानि इति भागवतवचनमनुसृत्य सुस्पष्टम् भवति । एवञ्च वेदस्याध्ययनमात्रेण तत्त्वविद्या न स्फुरति । नाऽपि पुराणेतिहासानामध्ययनमात्रेण । अपि तु सर्वानपि शास्त्रग्रन्थान् वेदेति-हासपुराणादीन् समुपबृंहणं कृत्वा अध्येतव्यम् इति तु अनेन स्पष्टीभवति ।

अवधेयमेतत् यत्, पूर्वमतर्कितमिमं प्रमेयम् ऐदम्प्राथम्येन श्रीमध्वाचार्यः प्रकटीचकार । स्वग्रन्थेषु च सर्वत्र सयुक्तिकं, सप्रमाणं समार्थयताऽपि । तदिदं पुराणानि प्रति प्रथममद्वितीयमुपायनम् श्रीमध्वाचार्यस्य ।

## पुराणनां ऐकार्थ्यसमर्थनम्

भवतु वा पुराणानां प्राधान्यम् । अस्तु च तेषां भगवत्प्रणीतत्वेन प्रामाण्यमपि । किन्तु अस्त्येव इतोऽपि संशीतिलेशः । अष्टादशपुराणेषु च बहुधा वैरुद्ध्यं दरीदृश्यते । उदाहरणार्थ- एकमेव नरसिंहावतारकथानकं पुराणेषु विभिन्नतया एव पठ्यते । स्कान्दे पुनः नरसिंहः हिरण्यकशिपोः वधार्थमेवावतरति । किन्तु तत्र प्रह्लादस्य नामापि नोल्लिख्यते । देवतानां प्रार्थनामनुसृत्य भगवान् नरसिंहरूपेण अवतीर्य हिरण्यकशिपुं अहन् । विष्णुपुराणे च प्रह्लादानुग्रहार्थमेव नरसिंहस्यावतारः । किन्तु नरसिंहो हिरण्यकशिपुं न जघान । एवं पुराणेषु निरूपितकथानकेषु वा प्रमेयेषु बहुधा वैरुध्द्यं दृश्यते । पूर्वोक्तदिशा नेतिहासे वैकल्प्यं घटते । विरुद्धेषु च प्रमेयेषु, इतिहासेषु वा एकमेव तथ्यं स्यात् । अन्यत् सर्वम् अयथार्थमेव भवितव्यम् । तर्हि तादृशानां अयथार्थपराणां पुराणानामपि अयथार्थत्वमेव सिध्यति । कथमत्र विरोधपरिहारः?

श्रीमध्वाचार्यस्तु एषां सन्देहानां परिहारं प्रादर्शयत् । पुराणानि च न लोकभाषया प्रावर्तन्त । तत्र च विशिष्टाः भाषाः, निरूपणे विशिष्टाः क्रमादयश्च उपयुक्ताः । तदनुसारमेव पुराणानि अनुसन्धेयानि इति हि श्रीमध्वाचार्यस्य मतम् ।

## २. भाषात्रयम्

पुराणेषु उपयुज्यमानं भाषात्रैविध्यं महाभारततात्पर्यनिर्णये एवं निरूप्यते -

**भाषास्तु त्रिविधास्तत्र मया वै सम्प्रदर्शिताः ।**

**उक्तो यो महिमा विष्णोः स तूक्तो हि समाधिना ।**

**शैवदर्शनमालम्ब्य क्वचिच्छैवी कथोदिता ।।**

**समाधिभाषयोक्तं यत् तत्सर्वं ग्राह्यमेव हि ।**

**अविरुद्धं समाधेस्तु दर्शनोक्तं च गृह्यते ।।**

**आद्यन्तयोर्विरुद्धं यद् दर्शनं तदुदाहृतम् ।**

**दर्शनान्तरसिद्धश्च गुह्यभाषाऽन्यथा भवेत् ।।**

-म.भा.ता.नि २.१२१-१२३

तत्र च स्पष्टं सर्वैर्यथा ज्ञायते तथा कथनं समाधिभाषा । यथा 'नास्ति नारायणसमं न भविष्यती'त्यादिकम् ।

शैवादि अवैष्णवं दर्शनमाश्रित्य क्वचित् दुर्गा-शिवादिमहिमावादिनी कथा निरूप्यते । यथा शान्तिपर्वणि रुद्रं प्रति कृष्णस्य तपश्चरणादि कथा । समाधेः विरुद्धं दर्शनोक्तं न याथार्थ्येन ग्राह्यम् । अविरुद्धश्चेत् ग्राह्यमेव तत् ।

अर्थं निगूह्य कथनं गुह्यभाषा । यथा 'नदीजलं केशवनारिकेतुर्नगा ह्वयो नाम नगारिसूनुः..इत्यादिकम् । हे नदीज- भीष्म, लङ्केशवनस्यारिः- हनूमान् केतौ यस्य सः-अर्जुनः इत्यादिक्रमेण अत्र अर्थं निगूह्य निरूप्यते ।

एवञ्च यः तिस्रः भाषाः न जनाति सः पुरणानामान्तर्यमपि न ज्ञातुं प्रभवति ।

## २. निरूपणे सप्तभेदाः

एवमेव पुराणानि सप्तक्रमेण निरूयन्ति इति सप्रमाणं प्रतिपादितं महाभारततात्पर्यनिर्णये-

**व्यत्यासः-प्रातिलोम्यश्च-गोमूत्री-प्रघसस्तथा ।**
**उक्षणः-सुधुरः-साधुः सप्तभेदाः प्रकीर्तिताः ।।**

-म.भा.ता.नि. ९.१३९

अत्रोक्तदिशा व्यत्यासादिनिरूपणप्रभेदाः पुराणेषु अनुसृताः । ग्रन्थविस्तरभिया एतेषां लक्षणं न प्रत्येकतयाऽत्र निरूप्यते ।

## ३. रीतीनां शतम्

एवमेव वैदर्भी, गौडी इत्यादिरीतीनां शतमपि पुराणेषु अन्वसरत् । तथा च इदमत्र श्रीमध्वाचार्यस्य वचनम्-

**त्रिभाषां यो न जानाति रीतीनां शतमेव च ।**
**व्यत्यासादीन् सप्तभेदान् वेदाद्यर्थं तथा वदेत् ।**
**स याति निरयं घोरमन्यथाज्ञानसम्भवम् ।।**

म.भा.ता.नि.९-१३८/१३९

इति भाषात्रैविध्यं, रीतीनां शतम् एवं व्यत्यासादि निरूपणप्रभेदान् अविदित्वा पुराणानां, वेदादिशास्त्राणां वा अभिप्रायः न स्फुटीभवितुमर्हति । अतः एतान् अविदित्वा पुराणानामध्ययनेन अन्यथाज्ञानमेव भवति । तत्तु नरकायैव भवतीति हि श्रीमध्वाचार्यस्य सप्रमाणं वचनम् । शास्त्राध्ययननिरताः इदमत्रावश्यमधारयन्तु । प्रथममितिहासानामधीतिः,

पुराणानाञ्च । तथा तदवलम्ब्य वेदोपनिषदां च अध्ययनम् । तदैव विजृम्भते तत्वसारः । इति ह माध्वी वाणी ।

न केवलमिदं श्रीमध्वाचार्यस्य वचनमात्रम् । भागवत-महाभारत-पुराणादीनां परस्परं वैरुद्ध्यं परिहृत्य समस्तवेदशास्त्रारूढतया समन्वीय निरणयत् सर्वमूलग्रन्थेषु विशिष्य महाभारततात्पर्यनिर्णय-भागवत-तात्पर्यनिर्णयग्रन्थेषु ।

## फलितार्थः

पुराणानि प्रति श्रीमध्वाचार्यस्य योगदानं कीदृशमिति परिमितपदैः, परिमितावकाशे निरूपणं दुष्करमेव । तथापि सङ्गृह्य एवं वक्तुं शक्यते, श्रीमध्वाचार्यस्तु

१. पुराणानां प्राधान्यं प्रादर्शयत् ।

२. पुराणानां प्रामाण्यं समर्थयत ।

३. पुराणानां ऐकार्थ्यं प्रकटयकुरुत ।

इति ह पुराणानि प्रति श्रीमध्वाचार्यस्य निरुपमानम् अपूर्वं योगदानम् ।

**References**


- Bannanje, Govindacharya, ed. 2009. *Sri Mahabharata Tatparyanirnaya of Sri Ananda Tirtha Bhagavatpada.* Udupi# Tattva Samshodhana Samsat.
- Krishnacharya, T R, and T R Vyasacharya, 1914. *Sriman Mahabharatam.* Kumbhakonam# Madhva Vilas Book Depot and Nirnayasagar Press

- Sheshgiri Acharya, P S, 2004, *SrimdBhagavatam of Sri Vedavyasa,* Bengaluru# Poornaprajna Samshodhana Mandiram
- Bannanje, Govindacharya, 2005, *Upnishatchandrika,* Bengaluru# Ishavasya Pratisthanam
- *Sarvamulagranthah##* 1969, Bengaluru# Akhilabharata madhvamahamandalam
- S Ananda teertha, 2016, *Tryambakam Yajamahe,* Kukke Subrahmanya# Vedavyasa Samshodhana Kendram

# मध्वमते भक्तिः

लेखकः- **डा.सुनीलः के.एस्**
संस्कृतसङ्कायप्रमुखः,
जैन महाविद्यालयः, बेङ्गळूरु

## आमुखम्

भारतीयवाङ्मये अगणितानि शास्त्राणि ज्ञान-भक्ति-कर्मप्रतिपादि-कानि यथा तारा नभोमण्डळे चकासति तथैव कानिचन पद्यबद्धानि गद्यबद्धानि सूत्रबद्धानि च सन्तीति नास्ति संशीतिलेशः ।

सूत्रभूतान्येव शास्त्राणि बहूपादेयानि सर्वहितकारीणि च वर्तन्त इति समेषां विद्वत्तल्लजानां समष्ट्या समस्वरः श्रूयते । बादरयणरचित ब्रह्मसूत्राण्येव गरिमवन्ति गौरवदायीनि च सन्ति शेखरायन्ते च गौतमग्रथितसूत्राणि, आपस्तम्भसूत्रापेक्षया । अष्टादशपुराणेषु भागवत-पुराणं सर्वश्रेष्ठमिति परिगणितमस्ति । तत्रापि सप्तमस्कन्धः विभिन्नं चित्रमित्येवामनन्ति विद्वांसः यतः साधकानां साधनाय समेषां अध्यात्मरहस्यानि अत्रैव घनपाक इव राराजन्ते । प्रह्लादस्य प्रसङ्गे तावत् अध्यात्मरसप्रवाह एव प्रवहित इति स्वयं श्रीमद्भागवतं प्रवक्ति[1] । परमात्मा तथा भागवतधर्माणां स्वरूपं कीदृशं भवति इत्यादिविषयान् प्रह्लादकथासु समीचीनतयाऽवगच्छामः । एवं प्रह्लादचरिते

---

१. धर्मो भागवतानां च भगवान् येन गम्यते ।
आख्यानेऽस्मिन् समाख्यातमाध्यात्मिकमशेषतः ।। भागवतम्

दरीदृश्यमान नवविधभक्तिस्वरूपं तावद् असदृशमेव। ननु कोऽसौ भगवान् यस्य भक्तिराद्रियते कथ्यते, योऽसौ ‘‘सर्वस्य वशी सर्वस्येशान सर्वमिदं प्रशास्ति’’ इत्यादिवाक्येषु यश्चैवं सर्वजनप्रसिद्धः स एव। ‘भगवति भक्तिं कुर्म’ इति प्रतिज्ञा साधकेन यत्र निश्चीयते सा भक्तिः साधना-फलेति द्विधा निर्णीता। यत्र संकीर्तन-श्रवण-स्मरण-आत्मनिवेदना-द्यनेक-प्रकारा तत्र यज्ञादीनां बहुवित्तव्ययायाससाध्यत्वाद् ध्यानादीनां चित्तैकसाध्यतवात् कलियुगे च तेषां अशक्यानुष्ठानत्वात् सङ्कीर्तन-भक्तिर्विधीयते। ज्ञानिनां सङ्कीर्तनतः सुखातिशयो भवत्येवेति तदभिप्रायेण मुक्तानां सङ्कीर्तनाधिकाराभिधानम्, अत एवोक्तं—

**आत्मारामाश्च मुनयो निर्ग्रन्था अप्युपक्रमे।**
**कुर्वन्त्यहैतुकीं भक्तिमीदृग्भूतगुणो हरिः॥** इति॥

सर्वज्ञेन परमकारुणिकेन नारायणावतारेण श्रीवेदव्यासेन पुरुषार्थसाधनं उपदिदिक्षुणा अशेषवेदार्थनिर्णायकन्यायनिबन्धनात्मकं ब्रह्ममीमांसेति नाम्ना शास्त्रं प्रणीतम्। वेदान्तशास्त्रमिति च प्राज्ञैर्व्यपदिश्यते। सत्येवं विदित एव प्राचीनैरखिलविद्वद्भिर्ज्ञानिभिश्च संसेवितः अभीष्टदस्सर्वज्ञकल्पः श्रितकल्पभूजः कलावपि वासिष्ठ-कृष्णसाक्षात्कारेण अन्यथाज्ञानतमःपटलपिहितनयनान् विदुषोऽविदुषश्च लोकान् सर्वमूलग्रन्थग्रथनेनोन्मीलितनयनान् कृत्वा प्राहर्षयत् अयं [2]वाय्ववतारी श्रीमन्मध्वाचार्यः। अयमेवाचार्यः पूज्यचरणः योग्यजनानां

२. श्रीमन्मध्वाचार्याणां वाय्ववतारत्वं ब्राह्मे क्षेत्रकाण्डे वेङ्कटेशमाहात्म्ये यथा;
अवतीर्य वसत्यत्र मध्वनामा वरे विभो।
स वायुस्तपसा पुण्यप्रीत्या चागस्त्ययोगिनः॥ तृतीयोऽध्यायः॥

स्वसिद्धान्तज्ञानाय दशप्रकरणानि उपनिषदां भाष्याणि सूत्रप्रस्थाने भाष्याणि इत्येवंरीत्या सप्तत्रिंशत् प्रबन्धवरान् ग्रथयामास । आचार्यनयमनुसृता ज्ञानिनः सर्वे मध्वाचार्यैः भक्तिस्वरूपं यन्निर्दिष्टं तदेन्तःसार प्रतिपादितवन्तश्च । अत्रेदं चिन्त्यम् । भक्त्याः मूलं तावत् शरीरेन्द्रियाणां या विषयेच्छा आसक्तिपदाभिधाना वर्तते सैव । आसक्तेः पूर्तये विभिन्नदेवानाम् उपासनारूपा या भक्तिः सा सकामा इति कथ्यते तस्या एवापरन्नाम भक्तिः इति । कश्चन ज्ञानिवरेण्यः मध्वसिद्धान्तस्य सारकथनावसरे सूचयति यत् 'मुक्तिर्नैजसुखानुभूतिः अमला भक्तिश्च तत्साधनम्' इति । अर्थात् मोक्षसाधनं भक्तिरेव नान्यत् । भक्तिं लक्षयन्तः एवं श्रीमध्वाचार्याः जगदुः स्वीयानुव्याख्याने—

**माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः ।**

**[3]स्नेहो भक्तिरिति प्रोक्तः तया मुक्तिर्न चान्यथा ।।** इति

भावस्त्वित्थं; भगवति स्त्रीसुताद्यपेक्षया दृढतरः स्नेहः एव भक्तिपदवाच्यः । अनयैव बन्धं तीर्त्वा जीवः मुक्तिभाग् भवति नान्यथा इत्याचार्याः कथयन्ति । मुक्तिसाधनारूपेण भक्तिमेव प्रायशः स्वग्रन्थेषु प्रतिपादयामासुः यथा गीताभाष्ये—

**योगिनां भिन्नलिङ्गानाम् आविर्भूतस्वरूपिणाम् ।**

**प्राप्तानां परमानन्दं तारतम्यं सदैव हि ।।**

अत्राचार्याणां अभिप्रायः इयानस्ति- ''परमात्मनि यावती दृढा

३. स्नेहो नाम : दर्शने स्पर्शने वापि शयने भोजनेपि च ।
यत्र द्रवत्यरङ्गः स स्नेह इति कथ्यते ।।

भक्तिः प्रवृद्धा भवति तावत्तैव जीवानां लिङ्गदेहः विनष्टो भवति । ततः मोक्षविशेषस्य अनूह्यानन्दस्यानुभवः सञ्जायते इति । तत्त्रैव भाष्ये ''विना ज्ञानं कुतो भक्तिः कुतो भक्तिं विना च तत्'' इत्यपि कथयित्त्वा ज्ञानपूर्विका भक्तिरेव मोक्षाय कल्पते इति संसाधितम् । स्वीये [४]गीतातात्पर्येऽपि मोक्षसारिणं भक्तिरित्येव जगदुः । मोक्षप्राप्तौ हेतुरूपा भक्तिः भगवतो विष्णोः तरतमभावबुद्ध्या भक्तिकरणमेव अवश्यं कर्तव्यमिति ब्रह्मसूत्रानुव्याख्याने—

**''अतो विष्णोः परा भक्तिः तद्भक्तेषु रमादिषु ।**
**तारतम्येन कर्तव्या पुरुषार्थमभीप्सिता ।।**

इत्यादिवाक्यपुञ्जेन सुसाधितमाचार्येण ।

भक्तिर्नाम न केवलं भजनं किन्तु प्रियत्वं यत्र प्रयोजनं सा भक्तिः वर्तते । भक्तिशब्दे क्तिन् प्रत्ययः प्रियसूचकः किल । अनेन हि भावेन श्रीमद्भागवते गोप्यो गावः मृगाः खगाः कृष्णाय प्रेमास्पदा अभवन् । भावशब्दार्थश्च प्रियेषु सम्पत्स्यमाना रतिरेव । रतिशब्दश्च पुनः धर्मः वा स्नेहो भवति एतस्मादेव ''सा परानुरक्तिरीश्वरे'' इति भक्तिसूत्रे शाण्डिल्यादिमुनिभिः भगवति स्नेहः एव भक्तिपदवाच्य इति प्रत्यपादि । अयमेव खलु श्रीमन्मध्वाचार्यैः सर्वादौ वेदान्तिषु कथितः । श्रीमद्भागवतोक्तनवधाभक्तिमेव लक्ष्यीकृत्यस्वीय श्रीकृष्णामृतमहार्णवे हरिमहिमावबोधके ग्रन्थे चर्चितवान् । यथा—

---

४. भक्त्यर्थान्यखिलान्येव भक्तिर्मोक्षाय केवलं । मुक्तानामपि भक्तिर्हि ...

**अर्चितः संस्मृतो ध्यातः कीर्तितः कथितः स्मृतः ।**

**यो ददात्यमृतत्वं हि स मां रक्षतु केशवः ।।** इति

निस्पृहस्य वा निष्कामस्य आत्मनः स्वतः तृप्तस्य स्वरूपस्य अनुभविनः भक्ताः परभक्तिवन्तः भवन्ति । अलसाः संसारस्य विषयभोगे सक्ताः रमन्ते ।

**उपसंहारः**

वेदोपनिषत्पुराणादिभिः प्रतिपादिता भक्तिः मध्वमते एवं प्रतिपादिता इति वक्ष्यामः—

- तारतम्यक्रमेण सर्वादौ परमात्मनि, ततः तत्पत्न्यां लक्ष्म्यां, तत प्रजापतौ वाय्वादिदेवतायां ततः गुरौ यथायोग्यं भक्तिः कर्तव्या ।।
- 'ज्ञानेनैवामृती भवति' ज्ञानेन मोक्षः भवति । तच्च ज्ञानं भक्तिसहकृतमेव मोक्षं साध्यति ।
- 'जीवाः भगवतः अनुचराः' इत्यस्य सार्वकालिकसत्यत्वम् अङ्गीकार्यम् ।
- ''हरिपादविनम्रधिया सततं हरिरेव परो हरिरेव गुरुः''... इत्यादिना द्वादशस्तोत्रे भगवतो अनन्यभावेन शरणं कामयमाना ईडिरे ।
- आचार्याः भगवत्तत्वनिर्णये श्रीहरिः प्रत्यक्षीभवति नान्यथा इति सर्वत्र प्रतिपादितवन्तः यथा- ''भक्त्यर्थान्यखिलान्येव भक्तिर्मोक्षाय केवलम्...''

एवं स्वराद्धान्ते मोक्षाय यस्य मनः प्रक्रमते तस्यावश्यं

भक्तिमार्गोऽयमनुसरणीय एव इति सप्रमाणम् साधयित्वा कार्णाटक्यां दाससाहित्यमुपायनीकृत्य श्रीपादराज - श्रीव्यासतीर्थ - पुरन्दरादिग्गजैः भक्तिमार्गस्य सशक्तत्वम् प्रभावं च प्रसारयामासुः श्रीमन्मध्वाचार्याः ।

अनेनैव मार्गेण वयमपि भगवतः गुरोः च प्रसादमवाप्तुं परमकारुणिकं परमात्मानं प्रार्थयामः

''यदवोचमहं तेन प्रीयतां कमलालयः''

।। श्रीकृष्णार्पणमस्तु ।।

# श्रीमन्मध्वसिद्धान्ते बन्धः मोक्षश्च

**डा.आनन्दतीर्थाचार्यः माळगी**
पूर्णप्रज्ञविद्यापीठम्
बेङ्गळूरु

मध्वसिद्धान्तानुसारेण बन्धमोक्षावधिकृत्य किञ्चिदिवात्र प्रस्तूयते ।

आदौ बन्धविषये किञ्चिद् वक्तुकामोऽस्मि ।

ईश्वरेच्छा, अविद्या, कामकर्म, लिङ्गशरीरं, त्रिगुणात्मकं मनः, स्थूलशरीरम् इति षट् सङ्ख्याकाः बन्धाः प्रमाणप्रमिताः ।

(१) ईश्वरेच्छा-

**''अशसीरस्य जीवस्य शरीरोत्पत्तिकारणम् ।**
**ईश्वरेच्छा प्राथमिकी तां विना न हि किञ्चन''**

इति (भा.ता.नि.२-९)

भागवतद्वितीयस्कन्धतात्पर्ये श्रीमन्मध्वाचार्यैः ईश्वरेच्छायाः बन्धकत्वम् उक्तम् । अत्रोदाहृताः सर्वेऽपि श्लोकाः सुलभार्थाः । अतः पुनस्ते न विव्रियन्ते ।

अपि च-

**अनादिमायया विष्णोः इच्छया स्वापितो यदा ।**
**तया प्रबोधमायाति तदा विष्णुं प्रपश्यति ।।**

इति (मां.उ.भा.२-८)

माण्डूकभाष्येऽपि ईश्वरेच्छायाः बन्धकत्वं आचार्यैः प्रतिपादितम् ।

२. अविद्या—“अज्ञानेनाऽवृतं ज्ञानं तेन मुह्यन्ति जन्तवः।” इति भगवद्गीतायां भगवता कृष्णेन अविद्यायाः बन्धकत्वं समर्थितम् ।

“अविद्या पाञ्चपर्वणी । पञ्च पर्वाणि तु मोहः, महामोहः, तामिस्रम्, अन्धतामिस्रं, तमश्चेति। पुनः चतुर्विधा-जीवाच्छादिका, परमाच्छादिका, शैवला, माया चेति । सर्वाप्यविद्या जीवाश्रया” इति पदार्थसङ्ग्रहे श्रीपद्मनाभसूरिभिः अविद्याप्रकरणे अविद्यायाः बन्धकत्वं प्रतिपादितम् ।

(३) कामकर्म—“कर्मणा बध्यते जन्तुः विद्यया च विमुच्यते”। (ब्र.सू.भा.३-३-३०-५०) इति कामकर्मणः बन्धकत्वमुक्तम् ।

**अनादिकर्मणा बद्धः जीवः संसारमण्डले ।**

**वासुदेवेच्छया नित्यं भ्रमतीति हि तद्वचः ।।**

(अनु.२-२-८६०) इति ।

अनुव्याख्याने द्वितीयाध्याये समयपादे श्रीमदानान्दतीर्थ-भगवत्पादाचार्यैः काममर्मणः संसारबन्धकत्वम् उपवर्णितम् ।

(४) लिङ्गशरीरम्—लिङ्गशरीरस्वरूपन्तु मध्वसिद्धान्तसारे श्रीपद्मनाभसूरिभिः एवमुक्तम्–“लिङ्गशरीरं च-दशेन्द्रियाणि सूक्ष्मरूपाणि, पञ्च प्राणाः सूक्ष्मरूपाः, मनश्च सूक्ष्मरूपम् आहत्य षोडशकलोपेतम्” इति। इदञ्च लिङ्गशरीरं मोक्षं प्रति जीवस्य बन्धकम्। लिङ्गशरीरभङ्गानन्तरमेव मोक्षः। तादृशभङ्गः कथं भविष्यतीति अग्रे वक्ष्यते।

(५) त्रिगुणात्मकं मनः– सत्वरजस्तमोगुणात्मकं मनः

बन्धकारणमिति ‘‘मन एव मनुष्याणां कारणं बन्धमोक्षयोः’।। (भ.गी.६-६) इत्यत्र प्रसिद्धमेव । ‘त्रिगुणात्मकं मनोऽस्त्येव यावन्मुक्तिः सदातनम्’ (अनु.३-२-९८५)इति अनुव्याख्याने भक्तिपादे श्रीमध्वाचार्यैः त्रिगुणात्मकमनसः बन्धकत्वमुक्तम् ।

(६) स्थूलशरीरम् । परिदृश्यमानं स्थूलशरीरं नानाविधपुण्य-पापकारणत्वेन बन्धकमिति तु प्रत्यक्षसिद्धम् इति न पुनरत्र प्रमाणान्तरापेक्षा ।

एते षड्विधा अपि बन्धाः परमेश्वराधीनाः । एवं बन्धविषयमनूद्य इदानीं मोक्षविषये किञ्चिदिव वक्तुकामोऽस्मि ।

**मोक्षः**

उक्तषड्विधबन्धात् मोचनमेव मोक्षः । यदा बन्धनिवृत्तिर्भवति तदा जीवः स्वरूपभूतम् आनन्दमनुभवति । तथाच स्वरूपानन्दाविर्भाव एव मोक्षः । श्रीमद्व्यासतीर्थैः एवमेवोक्तम् ‘‘मुक्तिः नैजसुखानुभूतिः’’ ।

भगवतः साक्षात्कारानन्तरं भगवति परमभक्तिर्जायते । तया परमभक्त्या भगवतः अत्यर्थप्रसादः। तस्मात् प्रसादात् बन्धादीनां निवृत्तिर्जायते । स एव मोक्षः ।

परमभक्तिस्वरूपं श्रीमन्न्यायसुधायां श्रीटीकाकृद्भिः एवं वर्णितम्- ‘‘परमेश्वरभक्तिर्नामनिरवधिक-अनन्त-अनवद्य-कल्याणगुणत्व-ज्ञानपूर्वकः, स्व-आत्मात्मीयसमस्तवस्तुभ्योऽप्यनेकगुणाधिकः, अन्त-रायसहस्त्रेणाप्यप्रतिबद्धः, निरन्तरप्रेमप्रवाहः’’। इति ।

परमेश्वरस्य अपरोक्षज्ञानानन्तरमेव एतादृशी परमभक्तिर्जायते । तया च परमभक्त्या भगवतः अत्यर्थप्रसादो भवति । ''एतं भक्तं मोचयामि'' इति भगवदिच्छा प्रसादः ।

''जिज्ञासेमोत्थज्ञानजात् तत्प्रसादादेव मुच्यते''(अ.नु.१-१-१२) इति श्रीमध्वाचार्यैः ब्रह्मसूत्राव्याख्याने अपरोक्षज्ञानजन्यप्रसादस्यैव मोक्षसाधनत्वं समर्थितम्।

''यस्य प्रसादात् परमार्तिरूपात् अस्मात् संसारान्मुच्यते नापरेण'' इति श्रुतिरपि मोक्षस्य प्रसादसाध्यत्वमाह–

**''प्रसादात्त्वधमाद् विष्णोः स्वर्गलोकः प्रकीर्तितः ।**
**मध्यमाज्जनलोकादिः उत्तमस्त्वेव मुक्तिदः ।।''**

(ब्र.सू.भा.१-१-१-१) इति

ब्रह्मसूत्रभाष्ये श्रीमध्वाचार्यैः भगवतः उत्तमप्रसादस्यैव मोक्षकारणत्वं प्रतिपादितम् ।

तथाच प्रथमतः श्रवणमनननिदिध्यासनानि । ततः भक्तिः । ततः उपासना । ततः अपरोक्षज्ञानम् । ततश्च परमा भक्तिः । ततश्च परमप्रसादः । ततः प्रकृत्यादिबन्धनां निवृत्तिरूपः मोक्षः । इत्येवं क्रमः ।

स च मोक्षः चतुर्विधः । कर्मक्षयः, उत्क्रान्तिः, अर्चिरादिमार्गः, भोगश्चेति । तदुक्तम् अनुव्याख्याने उत्क्रान्तिपादे श्रीमध्वाचार्यैः—

**''कर्मक्षयः तथोत्क्रान्तिः मार्गो भोगः चतुष्टयम् ।**
**फलं मोक्ष इति प्रोक्तः क्रमात् पादेषु चोदितः''** ।।

(अनु.४-२-१७५४) इति ।

फलाध्यायस्य प्रथमपादः– कर्मक्षयपादः। द्वितीयः पादः- उत्क्रान्तिपादः। तृतीयः पादः– मार्गपादः। चतुर्थः पादः– भोगपादः। एतेषां चतुर्णं पादानां विषयाः किञ्चिदिवात्र निरूप्यन्ते ।

(१) तत्र प्रथमः कर्मक्षयरूपः मोक्षः—— भगवतः अपरोक्षज्ञाने जाते सञ्चितस्य सर्वस्यापि अनिष्टस्य पापस्य अनिष्टस्य पुण्यस्य च सर्वात्मना नाशः । अनिष्टपुष्यं नाम मोक्षानुपयोगिपुण्यम् । पापपुण्ययोः नाशो नाम अनिष्टपुण्यस्य केभ्याश्चित् सुहृद्भ्यो दानम् । पापस्य केभ्याश्चिद् द्वेषिभ्यो दानम् । केषाञ्चिद् भगवदनुग्रहेण स्वरूपत एव नाशः ।

''प्रारब्धकर्मणस्तु भोगेनैव परिक्षयः।'' ब्रह्मादिदेवानां स्वस्वयोग्यतानुसारेण कर्मभोगकालेऽपि तारतम्यं वर्तते एव । स च विषयः कर्मक्षयपादीयानुव्याख्याने स्पष्टीकृतः श्रीमध्वाचार्यैः ।

**ब्रह्मणां शतकालात् तु पूर्वमारब्धसङ्क्षयः ।**

**ब्रह्मणस्त्वेव तावत्त्वं पञ्चाशद् ब्रह्मणस्तथा ।।**

(ब्र.सू.भा.४-१-८-१९) इति ।

(२) द्वितीयः उत्क्रान्तिरूपः मोक्षः

भगवतः अपरोक्षज्ञानानन्तरं प्रारब्धकर्मानुभवः। ततश्च देह लयाधिकारिव्यतिरिक्तानां जीवानां ब्रह्मनाड्या देहादुत्क्रान्तिः ।

तदुक्तम् षट्प्रश्नोपनिषदि–

**शतं चैका च हृदयस्य नाड्यः मूर्धानमभिनिःसृतैका ।**

**तयोर्ध्वमायन् अमृतत्वमेति विष्वगन्या उत्क्रमणे भवन्ति ।।**

इति ।

सुषुम्ना नाडी एव ब्रह्मनाडीति कथ्यते । तदुक्तं तन्त्रसारसङ्ग्रहे श्रीमध्वाचार्यैः–

**“मध्ये सुषुम्ना विज्ञेया वज्रिकाऽऽर्या प्रकाशिनी ।**

**वैद्युता ब्रह्मनाडीति सैव पञ्चप्रभेदिनी ” ।।**

(तं.सा.सं. ४-१५०) इति ।

तया ब्रह्मनाड्या ब्रह्मज्ञानी उत्क्रामति । सा च ब्रह्मनाडी मूलाधारमारभ्य मूर्धपर्यन्तं ऋजुरूपेण दीर्घशलाकावद् देहे वर्तते ।

**“मूलाधारं समारभ्य त्वामूर्धानं ऋजुस्थिता ।**

**मध्ये सुषुम्ना विज्ञेया”**

इति श्रीमध्वाचार्यैः तन्त्रसारसङ्ग्रहे सुषुम्नानाडीस्थानं निरूपितम् । सा च सुषुम्नानाडी–

**इडा च पिङ्गला चैव वज्रिका धारिणी तथा ।**

**सुषुम्नायाः चतुर्दिक्षु वज्रिकाद्यासु तत्र च ।।**

(तं.सा.सं.४-१५५) इति ।

सुषुम्नानाड्या उत्क्रान्तानां केषाञ्चित् परमात्मप्राप्तिः । केषाञ्चित् वायुद्वारा चतुर्मुखप्राप्तिः इति न सर्वेषामेकरूपता।

तथाहि–अपरोक्षज्ञानिनो द्विविधाः प्रतीकालम्बनाः, अप्रतीका-लम्बनाश्चेति । देहादिप्रतिके अपरोक्षज्ञानवन्तः प्रतीकालम्बनाः । तदन्दत्र अपरोक्षज्ञानवन्तः अप्रतीकालम्बनाः । तत्र अप्रतीकालम्बनानां केषाञ्चित् सुषुम्नानाडीमध्यात् उत्क्रमणम् । तत्काले हृदयस्याग्रं प्रद्योतते । तत्प्रकाशितद्वारा निष्क्रामति । तदा प्रज्ञेनात्मना अन्वारूढो भवति ।

तत्परमात्मनः उपरि अग्रतो वायुर्गच्छति । (वायुद्वारा) वायुना सहितः जीवः अर्चिरादिमार्गेण गच्छति । गमनकाले तत्र तत्र लोकेषु तस्य पूजा भवति । ततः क्रमेण वैकुण्ठलोकं प्राप्नोति । तत्र विद्यमानं तुरीयनामक भगवन्तम् आप्नोति ।

प्रतीकालम्बनानान्तु अन्तकाले नियमतो भगवतः स्मरणं जायते । तदा ते सुषुम्नानाडीपार्श्वस्थनाड्या भगवत्प्रकाशयुक्तद्वारा गत्वा अर्चिरादिलोकं प्राप्नुवन्ति । क्रमेण वायुलोकं प्राप्नुवन्ति । स च वायुरेव तान् चतुर्मुखलोकं नयति । स च चतुर्मुखः स्वशरीरलयानन्तरं तान् वैकुण्ठं नयति । एवं प्रतीकालम्बनानां अप्रतीकालम्बनानां च उत्क्रान्तिः शास्त्रे प्रतिपादिता ।

(३) तृतीयः मार्ग (लय) रूपः मोक्षः ।

ब्रह्मसूत्रे चतुर्थाध्यायतृतीयपादे मार्गः लयश्च एवं निरूपितः ।

देवादीनां नोत्क्रमणं न वा अर्चिदरादिमार्गः । अनुव्याख्याने श्रीमध्वाचार्यैः विषयोऽयम् एवं निरूपितः—

**उत्क्रान्तिमार्गौ देवानां न प्रायेण भविष्यतः ।।**

(अनु.४-२-१) इति ।

मनुष्यादिषु जातानां देवादीनान्तु उत्क्रमणं मार्गश्च भवतः । किन्तु तेषां तदा न मुक्तिः । किन्तु स्वोत्तमेषु देहलयानन्तरमेव तेषां मोक्षः देवानां देहलयक्रमस्तु किञ्चिदिवात्र प्रस्तूयते ।

मार्गद्वयमनुसृत्यैव लयक्रमः । मार्गौ द्विविधौ गरुडमार्गः शेषमार्गश्चेति । सर्वेषां देवानां गरुडमार्गशेषमार्गाभ्यामेव लयः इति श्रीमन्न्यायसुधायां श्रीमट्टीकाकृत्पादैः स्पष्टम् उपवर्णितम् । तथाहि–तत्र,

गरुडः, सौपर्णी, इन्द्रः, गुरुः, सूर्यः, अग्निः इति गरुडमार्गः । शेषः वारुणी, कामः, अनिरुद्धः, सोमः, वरुणः इति शेषमार्गः । अग्नेः सूर्ये लयः । सूर्यस्य गुरौ लयः । गुरोः इन्द्रे लयः । इन्द्रस्य सौपर्ण्यां लयः । सौपर्ण्याः गरुडे लयः इति गरुडमार्गेण लयक्रमः ।

एवमेव, वरुणस्य सोमे लयः । सोमस्य अनिरुद्धे लयः । अनिरुद्धस्य कामे लयः । कामस्य वारुण्यां लयः । वारुण्यास्तु शेषे लयः । इति शेषमार्गेण लयः सृष्टिक्रमविपर्ययेण लयक्रमः । अन्येषान्तु देवानां केषाञ्चित् गरुडमार्गे केषाञ्चित् शेषमार्गे प्रवेशः । तथाच सर्वेषां देवानां गरुडशेषमार्गेणैव लयः ।। गरुडशेषयेस्तु सरस्वत्यां लयः । सरस्वत्याः चतुर्मुखे लयः । चतुर्मुखस्य लक्ष्मीद्वारा परमात्मनि लयः ।

उमायाः रुद्रे लयः । रुद्रस्य भारत्यां लयः । भारत्याश्च वायौ लयः । वायोश्च लक्ष्यां लयः । तेषां एतद्ब्रह्मकल्पे न मुक्तिः । किन्तु एतद् ब्रह्मकल्पानन्तरं एष्यत्कल्पे वायोः ब्रह्मपदप्राप्तिः । भारत्याः सरस्वतीत्वप्राप्तिः । रुद्रस्य शेषपदप्राप्तिः । उमायाः वारुणीत्वप्राप्तिः । एवं वायु, भारती, रुद्र, पार्वतीनां चतुर्णां ब्रह्मादिभावानन्तरमेव मुक्तिः ।

द्वितीयस्कन्धभागवततात्पर्ये श्रीमध्वाचार्यैः—

**''एषां पदान्तराकाङ्क्षा वाय्वादीनां महात्मनाम् ।**

**आवर्त्य ते पुनर्यान्ति ज्ञानिनोऽपि निरामयाः '' ।**

(भा.ता.नि.२-२) इति वाय्वादीनां चतुर्णां ब्रह्मादिभावानन्तरमेव मोक्षः प्रतिपादितः ।

गीताभाष्येऽपि आचार्यैः—

**स्थितप्रज्ञोऽपि यस्तूर्ध्वः प्राप्य रौद्रपदं पुनः ।**
**साङ्कर्षणं ततो मुक्तिमगाद् विष्णुप्रसादतः ।।**

(गी.भा.२-७२) इति ।

रुद्रस्य शेषभावानन्तरमेव मुक्तिरुक्ता ।

(४) चतुर्थः सुखभोगरूपः मोक्षः ।

एतस्मिन् कल्पे, लयानन्तरं चतुर्मुखं प्रविष्टानां लिङ्गभङ्गयोग्यानां मुक्तियोग्योनां जीवानां ब्रह्मणा सह विरजानदीस्नानेन लिङ्गशरीरभङ्गो भवति । लिङ्गशरीरभङ्गानन्तरमेव मोक्षः ।

**प्रधानपरमव्योम्नोः अन्तरा विरजानदी ।।** इति प्रमाणानुसारेण विरजानदी तु प्रधान-अव्याकृताकाशयोर्मध्ये वर्तते । सा च विरजानदी लक्ष्म्यात्मिका ।

लिङ्गशरीरं पुनः– सूक्ष्मरूपाणि दशेन्द्रियाणि, सूक्ष्मरूपाः पञ्चप्राणाः, सूक्ष्मरूपं मनश्च इति आहत्य षोडशकलात्मकम् । तच्च चतुर्थस्कन्धभागवततात्पर्ये श्रीमध्वाचार्यैः एवमुक्तम्—

**प्राणेन्द्रियान्तःकरणभेदेन त्रिविधं मतम् ।**
**पञ्च पञ्चैव ते प्राणाः सर्वे बुद्धीन्द्रियाणि च ।।**
**कर्मेन्द्रियाणि च तथा तस्मात् पञ्चविधं स्मृतम् ।**
**लिङ्गं षोडशकं प्राहुः मनसा सह तत्पुनः ।।**

(भा.ता.नि. ४-४९) इति ।

एतादृशस्य षोडशकलात्मकस्य लिङ्गशरीरस्य भङ्गो नाम जीवसम्बन्धनाशः । सर्वेषां जीवानां लिङ्गशरीराणि विरजानदीस्नानकाले

जीवान् परित्यज्य नद्यां प्लवन्ति । नद्यामेव प्लवन्ते इति एकः पक्षः । श्रीमन्न्यायसुधायां जिज्ञासाधिकरणे टीकाकृत्पादाः—"अनादेः कीदृशः विनाशः ? इति चेत् स्वरूपध्वंस एव" इति अवदन् ।

चतुर्मुखेन साकं विरजानदीस्नानानन्तरं प्रलयकालारम्भः । तदा सर्वेषां जीवानां भगवदुदरे प्रवेशः । तदा न कस्यापि भोगः । किन्तु पुनः सृष्ट्यनन्तरं वैकुण्ठलोकप्राप्तानां मुक्तानां विविधसुखभोगाः शास्त्रेषु वर्णिताः । तत्र केचन भोगा अत्र प्रस्तूयन्ते ।

भोगाः चतुर्विधाः—सालोक्यभोगः, सामीप्यभोगः, सारूप्यभोगः सायुज्यभोगः इति ।

(१) प्रथमः सालोक्यभोगः– केचन मुक्ताः भगवल्लोके यत्र कुत्रचित् स्थित्वा यथेष्टभोगवन्ताः सुखमनुभवन्ति ।

(२) द्वितीयः सामीप्यभोगः– केचन मुक्ताः भगवतः समीपे एव स्थित्वा सुखमनुभवन्ति ।

(३) तृतीयः सारूप्यभोगः– केचन मुक्ताः चतुर्भुजाः शङ्खचक्रगादापद्मायुधवन्तः भगवतः सरूपाः मोक्षे यथेष्टभोगवन्तः ।

(४) चतुर्थः सायुज्यभोगः– केचन मुक्ताः भगवतः शरीरमेव प्रविश्य सुखमनुभवन्ति । "आदत्ते हरिहस्तेन हरिपादेन गच्छति" इति प्रमाणानुसारेण भगवच्छरीरे स्थित्वा हरिकरचरणाद्यवयवैरेव स्वकीयान् भोगान् भुञ्जते ।

अपि च केचन क्षीरसागरगाः, केचन अश्वत्थवनगाः, केचन अरण्याख्यसुधासमुद्रगाः, केचन बाह्योपवनगाः सुखभोक्तारो भवन्ति ।

केचन स्त्रीभोगं कुर्वन्ति । केचन गजतुरगादीनारुह्य क्रीडन्ति । केचन दिव्याभरणादिमन्तः स्त्रीभिः सह जलक्रीडां कुर्वन्ति । केचन स्फटिकेन्द्रनीलमण्यादिनिर्मित - विचित्रसद्मप्राव्यादेषु रमन्ते । केचन ऋगादिवेदोच्चारणेन भगवन्तं स्तुवन्ति । केचन सुखोद्रेकेण नृत्यन्ति । केचन लीलाशरीराण्युपादाय क्रीडन्ते । मुक्तावपि सर्वे तारतम्यवन्तः । सर्वेऽपि इर्ष्याऽसूयादिदोषरहिताः मोदन्ते ।

अपरोक्षज्ञानानन्तरं अनुष्ठितकर्मोपासनादिवशात् मोक्षे आनन्दातिशयवन्तो भवन्ति । अणवोऽपि जीवाः भोगार्थं भवगता स्वेच्छयैव दत्तेन महद्रूपेण सुखमनुभवन्ति ।

**श्रीरेव लोकरूपेण विष्णोस्तिष्ठति सर्वदा ।**

**अतो हि वैष्णवा लोकाः नित्यास्ते चेतना अपि ॥**

(गी.ता.१८-६२) इति ।

गीतातात्पर्यनिर्णये आचार्योक्तदिशा श्वेतद्वीपअनन्तासन वैकुण्ठादिलोकाः, तत्र विद्यमानाः सर्वेऽपि पदार्थाः लक्ष्म्यात्मकाः । मुक्तब्रह्मादीनां जगत्सृष्ट्यादिव्यापारो नास्ति । मुक्ताः संसारे न पुनरावर्तन्ते । मुक्तावपि मुक्तब्रह्मपुरस्सराणां मुक्तावरनियन्तृता तु अस्त्येव ।

मुक्तब्रह्मादिभिरीड्यमानः पूर्णानन्दोऽपि सकलभोगयुक्तः परमात्मा नारायणः मोक्षे लक्ष्म्यात्मके रमते भगवद्गुणान् गायन्ती लक्ष्मीः भगवतः बहुमानं करोति ॥

# स्तोत्रसाहित्ये श्रीमध्वाचार्याणां योगदानम्

**डा.बि.गोपालाचार्यः,**
निदेशकः,
श्रीवादिराजसंशोधनप्रतिष्ठानम्,
उडुपिः

भगवता वेदव्यासेन प्रणीतानां ब्रह्मसूत्राणां व्याख्यातारः भाष्यकाराश्च अनेके सन्ति । शङ्कर-रामानुज-वल्लभ-मध्वाचार्यादयः । तेषु अन्यतमः 'द्वैतमतप्रतिष्ठापनाचार्यः' इति लोके प्रसिद्धः श्रीमध्वाचार्यः । स तु वायोः अवतारभूतः । मध्वदर्शनं तु अस्माकं कर्नाटकभूमावेव वैदिकमार्ग-मनुसृत्यैव आरब्धम् । अस्य दर्शनस्य अग्रिमग्रन्थकाराः सर्वेपि प्रायः कर्नाटकदेशीयाः । दर्शनप्रपञ्चे एव कर्नाटकराज्यस्य विशिष्टं योगदानं विद्यते । यद्यपि सर्वाणि दर्शनानि वैदिकानि, तथापि स्पष्टतया सकलश्रुतिस्मृतिपुराणसम्मततया द्वैतदर्शनस्य प्रकाशनं श्रीमध्वाचार्यः चकार इति सर्वसम्मतम् । ''दशप्रमतिः-पूर्णबोधः-सर्वज्ञः-पूर्णप्रज्ञः-मध्वः आनन्दतीर्थः'' इत्यादीनि श्रीमध्वाचार्यस्य नामानि अन्वर्थानि बभूवुः । ज्ञानभास्करः पूर्णप्रज्ञः स्वतेजसा शास्त्रप्रपञ्चं प्रकाशितवान् ।

कर्नाटकराज्यस्य समुद्रप्रदेशः अतीव रमणीयः प्रदेशः । अयं प्रदेशः भगवता परशुरामेण निर्मितः । कर्नाटकमातुः आभरणमिव विराजते अयं प्रदेशः । अस्मिन् प्रदेशे अनेकानि देवायतनानि अनेकानि प्रसिद्धानि क्षेत्राणि च वर्तन्ते । तेषु मोक्षदायकानि क्षेत्राणि सुविदितानि । तानि च

**‘‘रौप्यपीठं कुमाराद्रिः कुम्भासिश्च ध्वजेश्वरः ।**
**क्रोडगोकर्णमूकाम्बाः सप्तैताः मोक्षदायिकाः’’** इति ।

तत्र रौप्यपीठं रजतपीठपुरम् इति विश्रुतम् । ‘‘अब्जारण्यम्’’ इति अयं प्रदेशः पुराणे वर्णितो वर्तते ।

अस्यामेव भूमौ उडूनां पतिः चन्द्रः शिवं प्रति तपस्तेपे । तेन अयं प्रदेशः ‘‘उडुपि’’ इति कर्नाटकभाषायां प्रथितः। अस्मिन् रजतपीठे शिवळ्ळि इति ग्रामो वर्तते ।

**‘‘वेदाद्रिसद्रजतपीठपुरेश्वराभ्याम्**
**ग्रामो विभूषिततरः शिवरूप्यनामा’’** इति

मध्वविजये वर्णितम् । वेदाद्रिः इत्ययं प्रदेशः इदानीं मणिपाल् इति कथ्यते । उडुपि-मणिपालयोः मध्ये अयं ग्रामः विद्यते । अत्रैव मध्यगेहकुलजाः वसन्ति स्म । ते तपोधनाः ज्ञानधनाः कृतिनिपुणाः परोपकारिणश्च आसन् । तेषां कुलस्वामी श्रीभगवान् अनन्तासनः । अत्र भगवान् परशुरामः लिङ्गरूपेण विराजते । अस्मिन्नेव कुले वायुदेवः क्रिस्तशकत्रयोदशशतके कर्नाटकप्रदेशे उडुपीति मण्डलान्तर्गत-पाजकाभिधाने क्षेत्रे आविरभूत् । मध्यगेहभट्टनामधेयस्य ब्राह्मणस्य गृहे समजायत । वेदवती इत्यभिधेया माता । बाल्यावस्थायाम् अयम् अतीव तीक्ष्णमतिः आसीत् । अत्यल्पीयसा कालेन सर्वाण्यपि वेदवेदान्तादीनि तेन समधीतानि ।

उडुपिक्षेत्रस्य पार्श्वे एव विराजते पाजकक्षेत्रम् ।

**''क्षेत्रं स पाजकपदं त्रिकुलैककेतुः ।**

**कं यद् दधाति सततं खलु विश्वपाजात्''** (मध्व-वि-२/११) इति मध्वविजयवचनेन अस्य महत्त्वे ज्ञायते। अस्मिन्नेव प्रदेशे मध्यगेहदम्पत्योः पुत्रत्वेन वायुदेवः अवातरत्। **''ज्ञानार्थमेव यदभूदसुदेव एषः''** मध्व-वि-२/२९ वार्थं जातः असुदेवः वासुदेवः। तत्त्वज्ञानप्रसारार्थं वायोः अवतारः, अतः वासुदेव इति नाम। ततः परमहंसपरिव्राजकैः अच्युतप्रज्ञाचार्यैः यत्याश्रमं स्वीचकार। प्रथमं तावत् प्रस्थानत्रय्यां भाष्यं विरच्य स्वमतम् उपस्थाप्य असौ क्रमशः भारतदेशं प्रदक्षिणीचकार। सज्जनहिताय द्वैतवादं प्रव्यरितवान्। तेन द्वैतमताचार्यः इति प्रसिद्धिं प्राप।

भगवता व्यासेन बदरीक्षेत्रे आज्ञप्तः श्रीमध्वाचार्यः तत्त्ववादस्थापनाय ग्रन्थान् व्यरचयत्। व्यासदेवहृदयातिवल्लभान् सकलदोषवर्जितान् ज्ञानभक्तिदान् अनन्तसौख्यदान् सप्तत्रिंशदधिकान् ग्रन्थान् निर्ममे। श्रीमध्वप्रणीताः इमे ग्रन्थाः ''सर्वमूलग्रन्थाः'' इति जगति प्रसिद्धाः बभूवुः। तस्य शिष्याश्च अष्टमठाधीशाः तथा श्रीपद्मनाभ-श्रीनरहरि-श्रीमाधव-श्रीअक्षोभ्यतीर्थाश्च आसन्। श्रीमध्वाचार्यस्तु बदरिकाश्रमात् प्रत्यावर्तनसमये अवश्यमेव उत्कलं आगतः स्यात् इति सम्भाव्यते। यतः आचार्यस्य चतुर्षु प्रधानशिष्येषु द्वितीयः श्रीनरहरितीर्थः उत्कलीयगजपतिराजस्य मन्त्री आसीद् इति शिलालेखेभ्यः ज्ञायते। सन्न्यासग्रहणानन्तरमपि अयं मन्त्रिपदे आसीत्। ततः किञ्चित्कालं गुरूणां सन्निधाने अवसत्। राज्ञि स्वर्गते सति अल्पवयस्कस्य

तत्पुत्रस्य प्रतिनिधित्वेन प्रायः द्वादशवर्षं यावत् राज्यं पर्यपालयत् । तस्मिन् काले निश्चयेन स्वमतप्रचारम् उत्कले राज्ये कृतवान् स्यात् । श्रीमध्वाचार्यः भुवि एकोनाशीतिवर्षाणि स्थित्वा भक्तान् अनुजग्राह इति अणुमध्वचरितं वर्णयति—

**एकोनाशीतिवर्षाणि नीत्वा मानुषदृष्टिगः ।**
**पिङ्गळाब्दे माघशुद्धनवम्यां बदरीं ययौ ।।** इति

**पारिव्राज्यं ततः प्राप्य कृत्वा सच्छास्त्रसञ्चयम् ।**
**रूप्ये कृष्णाकृतिं वायुः संस्थाप्यादात् सतां मुदम् ।।**

कर्नाटकराज्ये उडुपिक्षेत्रे सिद्धिविघ्नमुखदोषभेषजं श्रीकृष्णं प्रतिष्ठापयामास । श्रीकृष्णपूजार्थं तत्त्वज्ञानप्रसारार्थञ्च अष्टौ यतीन् नियोजयामास । श्रीकृष्णपूजानिरताः ते यतयः ज्ञानप्रसारनिरताश्च विलसन्ति ।

**श्रीमध्वाचार्यस्य योगदानम्**

दार्शनिकक्षेत्रे श्रीमध्वाचार्यस्य योगदानम् अपरिमितम् अनुपमं च ।

**''नानासुभाषित-स्तोत्रगाथादिकृतिसत्कृतीः ।**
**त्वयि रत्नाकरे रत्नश्रेणीः वा गणयन्ति के'' ।।**

इति मध्वविजये वर्णितम् । श्रीमध्वाचार्येण सप्तत्रिंशदधिकाः ग्रन्थाः विरचिताः । तेषां नामानि यथा भगवद्गीताभाष्यम् गीतातात्पर्यम्- ब्रह्मसूत्रभाष्यम् - अनुव्याख्यानम् - अणुभाष्यम् - न्यायविवरणम्- भागवततात्पर्यनिर्णयः - महाभारततात्पर्यनिर्णयः - प्रमाणलक्षणम्-

कथालक्षणम् - उपाधिखण्डनम् - मायावादखण्डनम्-प्रपञ्चमिथ्यात्वानुमानखण्डनम् - तत्त्वसङ्ख्यानम् - तत्त्वविवेकः - तत्त्वोद्योतः विष्णुतत्त्वविनिर्णयः - कर्मनिर्णयः - ईशावास्योपनिषद्भाष्यम्-केनोपनिषद्भाष्यम् - प्रश्नोपनिषद्भाष्यम् - मुण्डकोपनिषद्भाष्यम्-माण्डूकोपनिषद्भाष्यम्-तैत्तिरीयोपनिषद्भाष्यम्-महैतरेयोपनिषद्भाष्यम्-छान्दोग्योपनिषद्भाष्यम्-द्वादशस्तोत्रम्-बृहदारण्यकोपनिषद्भाष्यम्-ऋग्भाष्यम्-यमकभारतम् - नृसिंहनखस्तुतिः - कृष्णामृतमहार्णवः - तन्त्रसारसङ्ग्रहः - सदाचारस्मृतिः - यतिप्रणवकल्पः - जयन्तीनिर्णयः ।

**स्तोत्रसाहित्ये विशिष्टं योगदानम् ।**

श्रद्धालुभक्तानां जगन्नियामकस्य नित्यानन्दप्रदातुः श्रीकृष्णस्य निरन्तरसेवनेन निरतिशयानुग्रहसम्पादनाय स्तोत्रग्रन्थानपि चकार । तथाहि-कन्दुकस्तुतिः-नखस्तुतिः-द्वादशस्तोत्रम् इति प्रसिद्धानि स्तोत्राणि । तत्र च कन्दुकस्तुतिः बाल्ये एव क्रीडासमये रचिता स्तुतिः । प्रासबद्धा च वर्तते ।

**अम्बरवाङ्गाचुम्बितपादः पदतलविदलितगुरुतरशकटः ।**
**कालियनागक्ष्वेळनिहन्ता सरसिजनवदलविकसितनयनः ।।**
**कालघनालीकर्बुरकायः शरशतशकलितरिपुशतनिवहः ।**
**सन्ततमस्मान् पातु मुरारिः सततगसमजवखगपतिनिरतः ।।**

नरसिंहनखस्तुतिस्तु-

**पान्तु-अस्मान् पुरुहूतवैरिबलवन्मतङ्गमाद्यद्धटा-**

**कुम्भोच्चाद्रिविपाटनाधिकपटुप्रत्येकवज्रायिताः ।**
**श्रीमत्कण्ठीरवास्यप्रततसुनखरादारितारातिदूर-**
**प्रध्वस्तध्वान्तशान्तप्रविततमनसा भाविता भूरिभागैः ।।**
**लक्ष्मीकान्त समन्ततोऽपि कलयन्नैवेशितुस्ते समम्**
**पश्याम्युत्तमवस्तु दूरतरतोऽपास्तम् रसो योऽष्टमः ।**
**यद्रोषोत्करदक्षनेत्रकुटिलप्रान्तोत्थिताग्निस्फुरत्**
**खद्योतोपमविस्फुलिङ्गभसिता ब्रह्मेशशक्रोत्कराः ।।**

-इति श्लोकद्वयात्मिका ।

अन्यत् द्वादशस्तोत्रम् । स्तोत्राभिदमिदं प्रबन्धरत्नं कौस्तुभरत्नमिव भाति । वस्तुतः अत्र पृथक् पृथक् स्तोत्राणि सन्ति । तथापि स्तोत्राणां गाथानां च एकीकरणेन द्वादशस्तोत्रम् इत्येव व्यवहारः । अन्यान्यक्षेत्रेषु यात्रायां समूहगानार्थं रचितानि इमानि स्तोत्राणि ।

एवम् अस्मिन् स्तोत्रग्रन्थे द्वादशस्तोत्राणि विद्यन्ते । ग्रन्थेऽस्मिन् सुभाषितम्-स्तोत्रम्-गाथा च विद्यते । अक्षरगणबद्धं स्तोत्रम् । मात्रागण-बद्धा या गीयते सा गाथा । ''वन्दे वन्द्यं सदानन्दम्'' इत्यादीनि स्तोत्राणि । ''अव नः श्रीपतिर'' ''आनन्दमुकुन्द अरविन्दनयन'' इत्याद्याः गाथाः । 'कुरु भुङ्क्ष्व च कर्म निजम्'' इत्यादीनि सुभाषितानि ।

अस्य स्तोत्रस्य रचनायाः विषये एका कथा वर्तते। एकदा श्रीमध्वाचार्यः सर्वाभीष्टप्रदम् श्रीकृष्णं प्रतिष्ठापितुं सङ्कल्पयामास । ''वन्दे वन्द्यम्'' इति स्तुवन् समुद्रं जगाम ।

**श्रेयोविघ्नविघातार्थं सज्जनानां दयाम्बुधिः ।**
**चिन्तयन् सर्वविन्मध्वः जगाम च तदन्तिकम् ।**

इति सम्प्रदायपद्धतिः ।

समुद्रतीरे प्रवहणद्वारे द्वारकातः समागतां गोपीचन्दसंलग्नां विश्वकर्मनिर्मितां श्रीरुग्मिणीकरकमलार्चितां श्रीकृष्णप्रतिमां दृष्ट्वा ''देवकीनन्दन नन्दकुमार'' इत्यादिना मन्थदामधारिणं श्रीकृष्णम् अस्तौत् ।

**तत्र मग्नां समादाय प्रतिमां द्वादशस्तुतीः ।**
**कुर्वन्नानीय तां रूप्ये ह्यस्थापयद् अनल्पधीः'' ।**

तदानीमेव अङ्कुरितभक्त्युद्रेकेण रचिता स्तुतिरियं स्तोत्रसाहित्ये एव परमोत्कृष्टा । राग-लयबद्धमिदं स्तोत्रं कर्नाटकसङ्गीतस्य प्रेरणादायकम् अभूत् । श्रीमध्वाचार्यः महान् सङ्गीतज्ञः । मध्वविजये ''अनुपम गानसम्पदा'' इति वर्णितम् । अत एव श्रीमध्वाचार्येण रचितानि स्तोत्राणीमानि सङ्गीतविशारदैः विशिष्टस्वरसंयोजनेन गातुमुचितानि ।

अस्मिन् स्तोत्रग्रन्थे एकैकस्यापि स्तोत्रस्य अध्यायत्वेन व्यवहारः अस्ति । विषादिबाधानिवर्तकानि इति हेतोः मठे मन्दिरे च विशेषतया नैवेद्यसमर्पणसमये गीतज्ञैः सताललयं द्वादशस्तोत्रमिदं उद्गीयते। तेन विषादिदोषनिवारणं भवतीति प्रतीतिः । अत एव अस्य स्तोत्रस्य ''विषहरस्तोत्रमि''त्यपि नाम ।

**एकैकशोऽङ्गानि धियाऽनुभावयेत्**
**पादादि यावद्धसितं गदाभृतः ॥**

इति श्रीमद्भागतवचनानुसारेण पादादिमस्तकान्तान् भगवदवयवान् स्तोतुकामः—

**वन्दे वन्द्यं सदानन्दं वासुदेवं निरञ्जनम् ।**
**इन्दिरापतिमाद्यादिवरदेशवरप्रदम् ।।**

इत्यारभ्य—

**सन्ततं चिन्तयेऽनन्तमन्तकाले विशेषतः ।**
**नैवोदापुर्गृणन्तोऽन्तं यद्गुणानामजादयः ।।**

इति पर्यन्तं प्रथमाध्याये श्रीहरेः पादादिशिरःपर्यन्तं अङ्गानां महत्वं वर्णयति ।

**यं यं वापि स्मरन् भावं त्यजत्यन्ते कळेवरम् ।**
**तन्तमेवैति कौन्तेय सदा तद्भावभावितः ।।**

इति वचनाद् भगवच्चिन्तनं सदा अवश्यं कर्तव्यम् इति सज्जनशिक्षार्थं चिन्तनक्रमम् आह—

**स्वजनोदधिसंवृद्धिपूर्णचन्द्रो गुणार्णवः ।**
**अमन्दानन्दसान्द्रो नः प्रीयतामिन्दिरापतिः ।।**

इत्यारभ्य—

**इन्दिरामन्दसान्द्राग्र्यकटाक्षप्रेक्षितात्मने ।**
**अस्मदिष्टैककार्याय पूर्णाय हरये नमः ।।**

इति पर्यन्तं द्वितीयाध्याये उपनिषत्सिद्धगुणविशेषविशिष्टतया श्रीहरेः स्वरूपं स्तौति ।

**कुरु भुङ्क्ष्व च कर्म निजं नियतं हरिपादविनम्रधिया सततम् ।**
**हरिरेव परो हरिरेव गुरुः हरिरेव जगत्पितृमातृगतिः ।।**

इत्यारभ्य—

**आनन्दतीर्थसन्नाम्ना पूर्णप्रज्ञाभिधायुजा ।**

**कृतं हर्यष्टकं भक्त्या पठतः प्रीतये हरिः ।।**

इति स्वकृतस्तुतेः महिमानिरूपणार्थं स्वमाहात्म्यप्रतिपादकत्वेन अन्वर्थं तत्पठनस्य फलमाह ।

पूर्णप्रज्ञाख्येन यतिना प्रणीतं शास्त्रं न अज्ञानमूलकम् । हरिविषयकश्लोकाष्टकात्मकस्य स्तोत्रस्य पठनेन श्रीहरिः प्रीयते । एवं तृतीयेऽध्याये भगवतः महिमानिरूपणपूर्वकं साधकम् उपदिदेश ।

**निजपूर्णसुखामितबोधतनुः परशक्तिरनन्तगुणः परमः ।**

**अजरामरणः सकलार्तिहरः कमलापतिरीड्यतमोऽवतु नः ।।**

**इति देववरस्य हरेः स्तवनं कृतवान् मुनिरुत्तममादरतः ।**

**सुखतीर्थपदाभिहितः पठतः तदिदं भवति ध्रुवमुच्चसुखम् ।।**

इति पर्यन्तं चतुर्थाध्याये श्रीहरेः महिमानिरूपणपूर्वकं साधकम् उपदिदेश । श्रीमध्वमुनिः आदरतः देवदेवोत्तमस्य वेदार्थगर्भितत्वेनोत्कृष्टं स्तवनं चकार । अस्य स्तोत्रस्य पठनेन मोक्षस्वरूपानन्दाविर्भावलक्षणोत्कृष्टसुखं भवतीति समर्थयति ।

**वासुदेवापरिमेय सुधामन् शुद्धसदोदित सुन्दरिकान्त ।**

**धराधरधारिण वेधुरधर्तः सौधृतिदीधितिवेधृविधातः ।।**

इत्यारभ्य—

**आनन्दतीर्थमुनीन्द्रकृता हरिगीतिरियं परमादरतः ।**

**परलोकविलोकनसूर्यनिभा हरिभक्तिविवर्धनशौण्डतमा ।।** इति

पर्यन्तं पञ्चमे अध्याये केशवादिद्वादशमूर्तीनां महिमननं स्तौति। अतिशयितभक्त्या पठिता सती हरौ भक्तिवर्धने अतिपटीयसी भवति।

**मत्स्यकरूप लयोदविहारिन् वेदविनेत्रचतुर्मुखवन्द्य।**

**कूर्मस्वरूपक मन्दरधारिन् लोकविधारक देववरेण्य''**

इत्यारभ्य—

**आनन्दतीर्थमुनीन्द्रकृता हरिगाथा पापहरा शुभनित्यसुखार्था।**

इति पर्यन्तं षष्ठे अध्याये श्रीहरेः दशावतारमहिमा निरूपितः। इयं हरिगीतिः गाथारूपस्तुतिः पापानां नाशिका। अस्य ''दशावतार-स्तुति''रित्यपि नाम।

**विश्वस्थितिप्रलसर्गमहाविभूतिवृत्तिप्रकाशनियमावृतिबन्ध-मोक्षाः।**

**यस्या अपाङ्गलवमात्रत ऊर्जिता सा श्रीः यत्कटाक्षबलवती अजितं नमामि॥**

इत्यारभ्य—

**''आनन्दतीर्थमुनिसन्मुखपङ्कजोत्थम्साक्षाद्रमाहरिमनः प्रियमुत्तमार्थम्।**

**भक्त्या पठत्यजितमात्मनि सन्निधाय यः स्तोत्रमेतदभियाति तयोरभीष्टम्''**

इति पर्यन्तं सप्तमे अध्याये महालक्ष्म्याः स्तुतिः कृता। प्राथम्येन स्वतन्त्रं श्रीहरिं नत्वा महालक्ष्म्याः वर्णनपूर्वकं लक्ष्मीनारायणौ स्तौति। अत एव श्रीस्तुतिरित्यपि प्रख्याता इयं स्तुतिः।

अन्तिमाध्यायेऽस्मिन् गाथाच्छन्दः । स्वस्मिन् श्रीकृष्णानुग्रहः विशेषेण वर्तते इति दर्शयन् इष्टप्रदं श्रीकृष्णं उत्कृष्टतया स्तौति ।

**आनन्दमुकुन्द अरविन्दनयन आनन्दतीर्थपरानन्दवरद ।**
**सुन्दरिमन्दिर गोविन्द वन्दे आनन्दतीर्थपरानन्दवरद ।।**
**चन्द्रकमन्दिरनन्दक वन्दे आनन्दतीर्थपरानन्दवरद ।**
**चन्द्रसुरेन्द्रसुवन्दित वन्दे आनन्दतीर्थपरानन्दवरद ।।**
**वृन्दारकवृन्दसुवन्दित वन्दे आनन्दतीर्थपरानन्दवरद ।**
**इन्दिरस्यन्दनस्यन्दक वन्दे आनन्दतीर्थपरानन्दवरद ।।**
**इन्दिरानन्दक सुन्दर वन्दे आनन्दतीर्थपरानन्दवरद ।**
**मन्दारस्यन्दितमन्दिर वन्दे आनन्दतीर्थपरानन्दवरद ।।**
**आनन्दचन्द्रिकास्यन्दक वन्दे आनन्दतीर्थपरानन्दवरद ।।**

तस्माद् भगवानेव स्तोतव्यः मन्तव्यः । तत्प्रीतिरेव सकलनिःश्रेयसादिश्रेयोनिदानमिति सिद्धम् । एवमेव अवशिष्टेषु अध्यायेषु श्रीहरेः स्वरूपं अवर्णयत् । एवं श्रीमध्वाचार्यः एतावद् विपुलं साहित्यं विधाय तत्त्ववादस्थापनं कृत्वा विरेजे । श्रीमध्वचरितम् अद्भुतमेवैतत् ।

**सहायकपुस्तकानि-**


१. श्रीमध्वविजयः संस्कृतम् – डा.बन्नञ्जे गोविन्दाचार्यः, उडुपि
२. श्रीमध्वविजय कन्नड डा.बन्नञ्जे गोविन्दाचार्यः, उडुपि
३. सुमध्वविजयः संस्कृतम् डा.एस्.आर.पाण्डुरङ्गी, बेङ्गळूरु
४. अणुभाष्यम् संस्कृतम् पं.आर्.जि.माळगि. प्रच्यविद्यासंशोधनालयः. मैसूरु
५. श्रीपूर्णप्रज्ञदर्शन कन्नड डा.व्यासनकेरे प्रभञ्जनाचार्यः, बेङ्गळूरु
६. द्वादशस्तोत्रम् संस्कृतम् विद्वान् नारायणाचार्यः

# श्रीमध्वाचार्यैः कृतं गायत्रीव्याख्यानम्

**डा. धनञ्जयरावः**

निदेशकः

वेद-वेदान्ताध्ययनशोधसंस्थानम्

नवदेहली

सत्सु नैकेषु वैदिकमन्त्रेषु पौराणिकमन्त्रेषु गुरुपरम्परागतमन्त्रेषु च गायत्रीमन्त्रस्य विशिष्टं स्थानम् अस्मिन् वैज्ञानिकेऽपि युगे अस्त्येव । बहोः कालाद् इमं मन्त्रम् अधिकृत्य नैकानि शोधकार्याणि विहितानि विधीयमानानि च दृश्यन्ते । अस्य मन्त्रस्य जपं कुर्वाणा जना अधुना अभीष्टं फलं प्राप्नुवन्ति । तादृशोऽयं मन्त्रः श्रीमध्वाचार्यैः स्वग्रन्थेषु तत्रतत्र व्याख्यातः । तत्प्रकारं च एकैकशः पश्यामः ।

- गायत्रीमन्त्रेण प्रतिपाद्या देवता का ?
- गायत्रीमन्त्रस्य अर्थः कः ?
- गायत्रीमन्त्रजपक्रमः
- जपसङ्ख्या
- द्वौ गायत्रीमन्त्रौ प्रोक्तौ
- ओङ्कारगायत्रीमन्त्रयोः सम्बन्धः
- गायत्रीमन्त्रः चतुर्विंशतिरूपाणि च

## गायत्रीमन्त्रेण प्रतिपाद्या देवता का

'गायत्री' इति शब्दः ईकारान्तः श्रूयत इति कारणेन गायत्री एका

स्त्रीदेवता इति केचन कथयन्ति । प्रायः सर्वेऽपि जानन्त्येव यत् संस्कृतभाषायां लिङ्गम् आधारीकृत्य व्यक्तेः निर्धारणं कर्तुं न शक्यते । कञ्चन पुरुषं निर्दिश्य 'एष मम मित्रम्' इति वदामः । न पुनः 'एष मम मित्रः' इति । यतः मित्रं=सुहृत् । मित्रः=सूर्यः । हिन्दीभाषायामपि एवमेव स्थितिरस्ति । अपि च नायं गायत्रीशब्दः रूढशब्दः । किन्तु यौगिकः । **'गायत्री वा इदं सर्वं भूतम्' (छां. उ. ३-२-१)** इत्यारभ्य छान्दोग्योपनिषद् एवं प्रतिपादयति **'गायति त्रायति च या वै सा' ।** यो वेदं गायति यश्च लोकान् त्रायति=रक्षति स गायत्री भवति। भगवान् सृष्टेः आदौ चतुर्मुखब्रह्मणे वेदमुपदिशति । स एव लोकानपि रक्षति इति कारणेन स परमात्मा नारायण एव गायत्रीशब्दवाच्यो भवति ।

अपि च,

**'गायन्तं त्रायसे यस्माद् गायत्री त्वं ततः स्मृता'** इति स्मृतौ गायत्रीजपकर्तारं भक्तं रक्षतीति हेतोः सः नारायणः गायत्रीशब्देन प्रतिपाद्यो भवति ।

कित्र्य ब्रह्मसूत्रभाष्ये प्रथमाध्यायस्य प्रथमपादे गायत्र्यधिकरणे 'छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणमिगदात् तथा हि दर्शनम्' इति सूत्रे गायत्रीशब्धवाच्यो विष्णुरेवेति समर्पयाति श्रीमध्वाचार्यः श्रुतिस्मृतिप्रदर्शनपूर्वकम् ।

गायत्रीमन्त्रे 'सवितुः' इति शब्दः अस्ति । सवितृशब्दस्य सूर्यः अर्थः इति कोशेषु प्रतिपादितम् । तथापि नायं सवितृशब्दः सूर्यं प्रतिपादयतीति श्रीमध्वाचार्याणाम् अभिप्रायः । आकाशे परिदृश्यमानं सूर्यमण्डलं दृष्ट्वाऽपि लोकाः 'सूर्यः' इति कथयन्ति । किन्तु सूर्यमण्डलमेव

सूर्यो न । सौरमण्डले विद्यमाना देवता एव सूर्यः । एवं सूर्ये स्थितः सन् सृष्टिं कुर्वन् नारायण एव 'सवितृ' शब्देन प्रतिपाद्य इति प्रतिपादयन्ति ।

**............ सविता जनार्दनः।**

**तस्माद्धि सूयते सर्वम्............ ।**

**आदित्यस्तत्प्रतीकत्वात् सवितेति प्रकीर्तितः ।**

**प्रतिमायां तु तच्छब्दः प्रयोज्यो ह्युपचारतः ।।**

**(बृ.उ.भा.३-१९-५)**

अपि च विषये चास्मिन् भगवद्गीतावाक्यमेव प्रमाणम्-

**यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।**

**यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ।।**(भ.गी.१५-१२)

## गायतीमन्त्रस्य अर्थः कः ?

'मननात् त्रायते इति मन्त्रः' इतीयं निष्पत्तिरेव अस्मान् बोधयति यद् यस्य कस्यचन मन्त्रस्य जपः एवमेव निमील्य चक्षषी न कर्तव्यः । परन्तु तस्य अर्थं मनसि चिन्तयन् मन्त्रप्रतिपाद्यदेवतां च ध्यायन् जपं कुर्यादिति । अतो मन्त्रस्य व्याख्यानमेवं कुर्वन्ति श्रीमध्वाचार्याः ऋग्भाष्ये—

**गुणैस्ततः प्रसविता वरणीयो गुणोन्नतेः ।**

**भारतिज्ञानारूपत्वाद् भर्गो ध्येयोऽखिलैर्जनैः ।**

**प्रेरकोऽशेषबुद्धीनां स गायत्र्यर्थ ईरितः ।।(ऋ.भा.२,३)**

गायत्रीमन्त्रे विद्यमानानेव शब्दान् उपयुज्य केषाञ्चन शब्दानाम् आवापोद्वापौ च कृत्वा अत्यन्तं सरलतया मध्वाचार्यैः अर्थः निरूपितः ।

**मन्त्रः व्याख्यानम् भावार्थः**

तत् - गुणैः ततः - गुणैः पूर्णः

सवितुः - प्रसविता - जगतः सृष्टिकर्ता

वरेण्यम् - वरणीयो गुणोन्नतेः - गुणैः पूर्ण इति हेतोः भजनीयः

भर्गः - भारतिज्ञानरूपत्वात् - प्रकाशरूपी सुखरूपी च

धीमहि - ध्येयोऽखिलैर्जनैः - स्पष्टम्

धियो यो नः प्रचोदयात् - प्रेरकोऽशेषबुद्धीनाम् - सर्वेषां चेतनानां बुद्धीनां प्रेरक इति ।

अत्र गायत्रीमन्त्रे विद्यमानस्य 'देवस्य' इति पदस्य व्याख्यानं न कृतमिति भाति । किन्तु पूर्वं अग्निसूक्तस्य व्याख्यानसमय एव 'देव' शब्दस्य व्याख्यानं कृतमिति न पुनरुक्तम् ।

**द्योतनात् विजयात् कान्त्या स्तुत्या व्यवतेरपि ।**

**गत्या रत्या च देवाख्यम् । (ऋ.भा.११)**

द्युति - विजय - कान्ति - इच्छा - स्तुति - व्यवहार - गति-रति-क्रीडा-आदिगुणैः विशिष्ट इति हेतोः सूर्यनारायणो देवशब्दवाच्यो भवति ।

**गायत्रीमन्त्रजपक्रमः**

श्रीमध्वाचार्यैः गायत्रीमन्त्रस्य जपक्रमः निरूपितः सदाचारस्मृतौ——

**आसूर्यदर्शनात् तिष्ठेत् ततस्तूपविशेत वा ।**

**पूर्वां सन्ध्यां सनक्षत्रामुत्तरां सदिवाकराम् ।**

**उत्तरामुपविश्यैव वाग्यतः सर्वदा जपेत् ।। (स.स्मृ.८)**

प्रतिदिनं त्रिषु कालेषु सन्ध्यावन्दनं कर्तव्यमिति 'सन्ध्यात्रयं तु कर्तव्यं द्विजेनात्मविदा सदा' इत्यादयः स्मृतयः कथयन्ति । किन्तु अत्र आचार्यो वदति यद्, यदा नभोमण्डले नक्षत्राणि दृष्टिगोचराणि भवन्ति तदा प्रातस्तरां प्रबुध्य शुचिर्भूतेन गायत्रीमन्त्रजपः कर्तव्यः । यद्यपि भगवता बादरायणेन 'आसीनः सम्भवात्' इति ब्रह्मसूत्रे जप उपविश्यैव कर्तव्य इति सामान्यवया प्रतिपादितम् । गायत्रीजपे तु आचार्यः मध्वः प्रातः कालीनसन्ध्यावन्दने सूर्योदयपर्यन्तं स्थित्वा एव गायत्रीजपः कार्य इति विशेषविधिं प्रतिपादयति । सूर्योदयानन्तरं तथा माध्याह्निकादिसन्ध्या-वन्दनेषु उपविश्यैव जपः कार्यः ।

**वाचिकश्च उपांशुश्च मानसस्त्रिविधः स्मृतः ।**
**त्रयाणां जपयज्ञानानां श्रेयान् स्यादुत्तरोत्तरः ।।**

इति स्मृतौ मानसजपस्यैव प्राधान्यमुक्तमिति हेतोः आचार्योऽत्र 'वाग्यतः' इति मौनी सन् जपं कुर्यादिति विदधाति ।

## गायत्रीजपसङ्ख्या

विना सङ्ख्यया कृतो जपो निरर्थक इति स्मृतयः प्रतिपादयन्ति **असङ्ख्यातं तु यज्जप्तं तत्सर्वं स्यान्निरर्थकम्** इति । गायत्री जपसङ्ख्यायामपि विशेषमाह मध्वाचार्यः-

**अर्कमण्डलगं विष्णुं ध्यात्वैव त्रिपदीं जपेत् ।**
**सहस्रपरमां देवीं शतमध्यां दशावराम् ।। (स.स्मृ.७)**

सौरमण्डले स्थितं परमात्मानं ध्यायन् त्रिपदात्मिकां गायत्रीं जपेत् । सहस्रं जपः उत्तमकल्पः । शतवारं मध्यमः । दशसङ्ख्याकः जपः अधम इति ।

सहस्रसङ्ख्या एव अधिका इत्युक्तं आचार्यमध्वेन। विषये चास्मिन् विद्वांस एवमभिप्रयन्ति - मनुष्यस्य शरीरे दक्षिणपार्श्वे ३६००० नाड्यः विद्यन्ते । वामपार्श्वे ३६००० नाड्यः सन्ति । आहत्य ७२००० नाड्यः वर्तन्ते। गायत्रीमन्त्रे च २४ अक्षराणि सन्ति। सहस्रवारं गायत्रीजपकरणे २४००० अक्षराणां जपः भवति। कालात्रये सहस्रसङ्ख्यया गायत्रीजपकरणेन (२४०००X३=७२०००) इति क्रमेण प्रतिदिनं ७२००० अक्षराणां जपः भविष्यति । अस्माकं शरीरे विद्यमानानां ७२००० नाडीनां ७२००० अक्षराणां जपकरणे एव सामर्थ्यमस्ति । हठेन इतोऽल्प्यधिकजपकरणे देहे निश्शक्तिः उन्मादादिर्वा उत्पद्येत इति कारणेन 'सहस्रपरमाम्' इति प्रतिपादयति आचार्यः ।

जपकाले न केवलं मन्त्रस्य उच्चारणम्। न केवलं मन्त्रार्थानुसन्धानम्। अपितु किञ्चिद्रूपविशिष्टस्य भगवतः मनःपटले ध्यानमपि आवश्यकमिति भावेन ध्येयस्य सवितृनामकस्य नारायणस्य स्वरूपमपि प्रतिपादयति आचार्यः ।

**ध्येयः सदा सवितृमण्डलमध्यवर्ती**
**नारायणः सरसिजासनसन्निविष्टः ।**
**केयूरवान् मकरकुण्डलवान् किरीटी**
**हारी हिरण्मयवपुः धृतशङ्खचक्रः ।। (स.स्मृ.९)**

अन्यच्च ध्येयरूपं प्रतिपादयति आचार्यो मध्वः तन्त्रसारसङ्ग्रहे–

**प्रोद्यदादित्यवर्णश्च सूर्यमण्डलमध्यगः ।**
**चक्रशङ्खधरोऽङ्कस्थदोर्द्वयो ध्येय एव च ।।(तं-सा-सं.१-४०)**

सूक्ष्मेक्षिकया परीक्ष्यमाणे पूर्वोक्तयोः ध्येयरूपयोः वैलक्षण्यं दृश्यते । प्रतिपिपादयिषोः मध्वाचार्यस्य को वा आशय इति किञ्चिद् विव्रियते- गायत्रीमन्त्रः न केवलं सन्ध्याङ्गत्वेन उक्तः स्मृतिषु परन्तु नैकेषु कार्यकलापेषु । यथा धर्मसिन्धौ सर्वसाधारणभोजनप्रकरणे **'व्याहृतिभिः गायन्त्र्या चाभिमन्त्र्य'** इत्यादि । तथाच आचार्येण गायत्रीमन्त्रे द्वैविध्यं स्वीकृतम् । एकः सन्ध्यायाम् उपयुज्यमानः । अपरश्च तदन्यत्र उपयुज्यमान इति । प्रथमस्य विश्वामित्रगायत्री इति नाम कृतम्। द्वितीयस्य पुनः ब्रह्मगायत्री इति । तदुक्तं— **विश्वामित्रस्तु सन्ध्यार्थे तदन्यत्र प्रजापतिः (तं-सा-सं.९) ।** विश्वामित्रगायत्री आदौ व्याहृतिसहिता भवति । अस्याः ऋषिः विश्वामित्रः । अन्या च आदौ व्याहृतिरहिता भवति । या च सन्ध्याया अन्यत्र उपयुज्यते । अस्याः गायत्र्याः ब्रह्मा ऋषिः । अतो ब्रह्मगायत्री इत्युच्यते । ब्रह्मगायत्र्याः जपकाले तन्त्रसारसङ्ग्रहे प्रतिपादितस्य भगवतो ध्यानं कर्तव्यम् । विश्वामित्रगायत्र्याः जपे च सदाचारस्मृत्युक्तस्य भगवतो ध्यानं कर्तव्यम् ।

### ओङ्कार-गायत्रीमन्त्रयोः सम्बन्धः

गायत्रीमन्त्रेण प्रतिपाद्यो नारायण एव इति आचार्यमध्वस्य मतमिति प्रतिपादितं प्राक् । तच्च मध्वाचार्येण एवं निरूपितम् अनुव्याख्याने—

**ओतत्वावाची ह्योङ्कारो वक्त्यसौ तद्गुणोतताम् ।**
**स एव ब्रह्मशब्दार्थः नारायणपदोदितः ।।**

**स एव भर्गशब्दार्थोः व्याहृतीनां च भूमतः ।**
**भावनाच्चैव सुत्वाच्च सोऽयं पुरुष इत्यपि ।।**
**स एव सर्ववेदार्थः (अनु.१-१-१-९ )**

अयमर्थः– 'ओं' शब्दस्तु अव-रक्षा-गति कान्ति-प्रीति-तृप्ति - अवगम-प्रवेश-श्रवण-स्वाम्य-अर्थयाचन-इच्छा-दीप्ति-अवाप्ति-आलिङ्गन-हिंसादानभागवृत्तिषु इति धातुना निष्पन्नः । तत्रभवता यास्केन रचिते निरुक्तेऽपि प्रतिपादितम् **'ओं' इति पुनः कस्य वक्ता?** प्रश्नपूर्वकं– **'अवतिर्नामाऽयं धातुः गतिकर्मा प्रवेशनकर्मा च'** इति । तथाच ओङ्कारस्य आनन्दाद्यनन्तकल्याणगुणैः पूर्ण इत्यर्थः सिध्यति । ब्रह्मशब्दस्यापि पूर्वोक्त एव अर्थः । यतः 'अथ कस्मादुच्यते ब्रह्मेति । बृहन्तो ह्यस्मिन् गुणाः' इत्यस्ति श्रुतिः तथाच ओङ्कारब्रह्मशब्दयोः एक एवार्थः अस्तीति सिध्यति ।

अकार-उकार-मकरात्मकैः त्रिभिः वर्णैः निष्पन्न ओङ्कार इति सर्वैरपि विदितप्रायम् । तादृशः ओङ्कारः भगवतो नारायणस्य वाचकः । **'ओमिति ब्रह्म'** इति श्रुतेः । **'प्रणवार्था व्याहृतयः'** इत्यागमः भूः भुवः स्वः इति व्याहृतिः वर्णत्रयात्मकस्य ओङ्कारास्य व्याख्यानरूपा अस्तीति ज्ञापयति । त्रिपदात्मिका गायत्री व्याहृतेः व्याख्यानरूपा विद्यते । वर्गत्रयात्मकं पुरुषसूक्तं त्रिपदात्मिकाया गायत्र्याः व्याख्यानमस्ति । **'वेदाः पुरुषसूक्तगा'** इत्यागमः पुरुषसूक्तस्य व्याख्यारूपाः सर्वे वेदा इति प्रतिपादयति ।

तथा चायं समुदितार्थः— ओङ्कारस्य व्याख्यानं व्याहृतिः । व्याहृतेः व्याख्यानं गायत्री । गायत्र्याः व्याख्यानं पुरुषसूक्तम् ।

पुरुषसूक्तस्य व्याख्यानं त्रयो वेदा इति। व्याख्यान - व्याख्येययोः एकरूपत्वं तु वर्तत एव। अतो गुणपूर्णः नारायणः सर्ववेदैः प्रतिपाद्यः। स एव गायत्रीमन्त्रेणापि प्रतिपाद्यते।

## गायत्रीमन्त्रः चतुर्विंशतिरूपाणि च

मध्वाचार्यस्य गायत्रीमन्त्रे महान् आदरः दृश्यते। गायत्रीमन्त्रे तावत् चतुर्विंशति-अक्षराणि सन्ति। प्रत्यक्षरमपि केशवादि-चतुर्विंशतिरूपाणि प्रतिपादयति इति कथयति मध्वाचार्यः–

**चतुर्विंशन्मूर्तयोऽस्याः कथिता वर्णदेवताः**(तं- सा सं १-१५)

**तद्यथा—**

- तत् = केशवः
- स = नारायणः
- वि = माधवः
- तुः = गोविन्दः
- व = विष्णुः
- रे = मधुसूदनः
- णि = त्रिविक्रमः
- यं = वामनः
- भरुर = श्रीधरः
- गो = हृषीकेशः
- दे = पद्मनाभः
- व = दामोदरः

- स्य = वासुदेवः
- धी = सङ्कर्षणः
- म = प्रद्युम्नः
- हि = अनिरुद्धः
- धि = पुरुषोत्तमः
- यः = अधोक्षजः
- यः = नारसिंहः
- नः = अच्युतः
- प्र = जनार्दनः
- चो = उपेन्द्रः
- द = हरिः
- यात् = कृष्णः

एकैकस्मात् अक्षराद् भगवतः एकैकं रूपं कथं वा प्रतिपाद्यत इति तन्त्रसारसङ्ग्रहस्य व्याख्यानेषु विस्तरेण निरूपितम् । विस्तरभिया नाऽत्र प्रतन्यते ।

एवं गायत्रीमन्त्रो अनेकार्थगर्भितो विद्यते । स चार्थो न सर्वैः ज्ञातुं शक्यः । यथा यशोदामाता श्रीकृष्णस्य अल्पे मुखे विश्वरूपं ददर्श तथैव श्रीमध्वाचार्यः अल्पीयसि गायत्रीमन्त्रे समग्रमर्थं स्वयं ददर्श अस्मान् दर्शयामास चेति वक्तुं शक्यते ।

## शोधकार्ये उपयुक्ताः ग्रन्थाः—

१. सदाचारस्मृति . डा.ए.वि.नागसम्पगि, पूर्णप्रज्ञसंशोधनट्रस्ट, बेङ्गलूरु, २०१८

२. ऋग्भाष्यम् - डा.कृष्णाचार्य उपाध्यायः, द्वैतवेदान्ताध्ययनसंशोधनप्रतिष्ठा नम्, बेङ्गलूरु, २०१७
३. तन्त्रसारसङ्ग्रहः - डा.प्रह्लादाचार्यः जोशी, द्वैतवेदान्ताध्ययनसंशोधनप्रतिष्ठानम्, बेङ्गलूरु, २०१७
४. मैत्र -कर्णाटकभाष्याम् उडुपि रामनाथ आचार्यः, तत्त्वसंशोधनसंसत्, उडुपि, १९९९.
५. गायत्रीदर्शन कर्णाटकभाष्याम् - सग्रि राघवेन्द्रउपाध्यायः, तत्वसंशोधनसंसत्, उडुपि, २०११.

# तन्त्रशास्त्रे श्रीमध्वाचार्याणां योगदानम्

लेखकः - **श्रीनिधिः प्याटि**
पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु

**पीठिका-**

श्रीमध्वाचार्यैः प्रतिपादितः सिद्धान्तः तत्त्ववाद इत्युच्यते । श्रीमध्वाचार्या अपि पूर्वसिद्धान्तप्रतिष्ठापनाचार्या इव प्रस्थानत्रयस्य भाष्याण्यारचयन् । अन्यैरस्पृष्टे पुराणप्रपञ्चेऽपि स्वयोगदानं विदधुः । तथैव अतिविशाले गहने तन्त्रशास्त्रेऽपि आचार्याणां योगदानं वर्तत इति बहूनां तन्त्रशास्त्रविदुषामपि अज्ञातप्रायः विषयः । अतः अस्मिन् लेखने आचार्याणां तन्त्रशास्त्रे योगदानं प्रस्तूयते । आचार्यैः तन्त्रशास्त्रसम्बद्धः तन्त्रसारसङ्ग्रहाख्यः ग्रन्थः प्रणीतः। ग्रन्थस्यास्य विषये नारायण-पण्डिताचार्यैः इत्थमभ्यधायि-

**कस्तन्त्रसारं सम्प्राप्य न स्यात् पर्याप्तवाञ्छितः ।**
**अमरैराश्रितच्छायं कल्पद्रुममिवोत्तमम् ।।**[१]

अस्य अयभिप्रायः- लोके हि तापदग्धाः जनाः वृक्षस्य छायमाश्रयन्ते । लौकिका वृक्षाः छायादानेन ऊष्मतापनिवारणे एव समर्थाः । अलौकिकः स्वर्गतः कल्पद्रुमस्तु न केवलं आतपनिवारणे किन्तु अपूर्णकामानां कामनातापवारणेऽपि समर्थः। तमाश्रित्य देवताः

१. श्रीमध्वविजयः १५-७८

चिन्तादूराः सन्तः स्वापेक्षितानि लभमानाः सुस्था भवन्ति । एवमेव महीसुरा अपि यदि तन्त्रसारसङ्ग्रहं सम्यगाश्रयन्ते, अधीत्य चानुतिष्ठन्ति तेषामपि वाञ्छाबाधा न स्याद् इति । एतादृशस्य ग्रन्थस्य वैशिष्ट्यमत्र प्रस्तौमि।

## तन्त्रशास्त्रम्

तन्त्रसारसङ्ग्रहग्रन्थस्य वैशिष्ट्यस्य अध्ययनात् प्राक् तन्त्रं नाम किम्? तन्त्रशब्दः कस्मिन्नर्थे प्रयुज्यते? इति आदौ विवेचनीयम्। तन्त्रशब्दस्य कोशेषु अयमर्थः निरूपितः—

**तन्त्रं प्रधाने सिद्धान्ते तन्तुवाये परिच्छदे**[२] **।**

**तन्त्रं कुटुम्बकृत्ये स्यात् सिद्धान्ते चौषधोत्तमे ।**

**प्रधाने तन्तुवायेऽपि शास्त्रभेदे परिच्छदे ।।**[३]

कोशानां परिशीलनेन शास्त्रविशेषे तन्त्रशब्दः वर्तत इति ज्ञायते । तत् शास्त्रं तन्त्रशास्त्रमिति व्यवह्रियते । अयं तु सामान्यार्थः । परन्तु तन्त्रग्रन्थेषु कस्मिन्नर्थे स शब्दः प्रयुक्त इति विचार्यः । श्रीमध्वाचार्यैः भागवततात्पर्ये उल्लिखितायां विष्णुसंहितायां कथितम्—

**सर्वार्था येन तन्यन्ते त्रायते च भयाज्जनान् ।**

**इति तन्त्रस्य तन्त्रत्वं तन्त्रज्ञाः परिचक्षते ।।**[४]

अस्य आशयः एवमस्ति- तन्त्रशब्दे 'तन्' एवं 'त्र' इति

---

२. अमरकोशः.३-३-१८४

३. मेदिनीकोशः

४. भागवततात्पर्यनिर्णयः २-१०

भागद्वयमस्ति । तत्र तन् इति भागस्य अर्थः सर्वथा येन तन्यन्ते इति । त्र इति भागस्य अर्थः त्रायन्ते च भयाज्जना इति । एवञ्च तन्=इष्टप्रापकं, त्र=अनिष्टनिवर्तकं शास्त्रमिति भावः सिध्दयति ।

## तन्त्रशास्त्रस्य महत्वम्

शास्त्राणामुद्देश्यं ज्ञानम् । अर्जितस्य ज्ञानस्योपयोगः कथं करणीयः? ज्ञानस्य अन्वयः कुत्र? इति जिज्ञासा सर्वस्यापि कदाचिन्नूनं भवति । आधुनिककाले न्यूटन्,ऐन्स्टीन् इत्यादिविज्ञानिभिः विहितानामाविष्काराणां जीवने उपयोगः अस्तीति महत्त्वमस्ति । तथा तत्त्वज्ञानस्य (philosophy) उपयोगः (Application) कुत्र कथम् इति जिज्ञासा सर्वानपि साधकान् कदाचिद् बाधते । यथा अधुना (Applied science) इति प्रयोगभागः ज्ञानभागस्य सार्थक्यं समर्थयते तथा (Applied philosophy) भूतं तन्त्रशास्त्रं शास्त्रीयज्ञानस्य प्रयोगभागः सत् तस्य सार्थक्यमादधाति । आधुनिकविज्ञानस्य मूलभूतनियमान्वयेन गृह-यन्त्र-वाहनादिनिर्माणं भवति । तेन च तेषां नियमानां महत्त्वं स्फुटं भवति । तथैव शास्त्रज्ञानस्य अन्वयेन किं साधनीयम् कथं साधनीयमित्येतत् तन्त्रशास्त्रेण प्रदर्श्यते ।

## तन्त्रशास्त्रस्य विषयः

भगवत्तत्त्वं, तत्प्रतिपादकाः विविधाः मन्त्राः, तत्पूजाक्रमः, तद्देवालयनिर्माणविधिः, देवालयेष्वर्चनाप्रणाली इत्येते नैकविधाः तन्त्रशास्त्रविषयाः । अपरश्च यमनियमाद्यष्टाङ्गोपेतः योगः, योऽद्य समग्रप्रपञ्चे भारतीययोगदानत्वेन प्रथितः, सोऽपि तन्त्रशास्त्रस्य विषयः।

तथा हि नेत्रतन्त्राख्ये शैवतन्त्रे— 'अष्टाङ्गेन तु योगेन प्राप्नुयान्नान्यतः क्वचित्[५]' । एवं द्विविधा विषयाः तन्त्रग्रन्थेषु प्रतिपाद्यन्ते ।

### तन्त्रसारसङ्ग्रहः-

तन्त्रशास्त्रं सात्त्विकराजसतामसभेदेन त्रिधा भिन्नम् । तत्र सात्त्विकं तन्त्रं अनर्थदूरां स्वपरहितोभयकारिणीं सफलतरां सिद्धिं विधास्यति । सात्त्विकसिद्धिसम्पन्नैः शापानुग्रहशक्त्या शिष्टरक्षणदुष्टशिक्षणे विधीयेते । तद्व्यतिरिक्ताः तामससिद्धिमन्तः जनाः वामाचारादिना अनर्थपरम्परां सृजन्ति। सात्त्विकग्रन्थेषु साक्षाद् विष्णुना रचितः ग्रन्थः कालेन नष्टः, तदर्थं श्रीमध्वाचार्यैः तन्त्रसारसङ्ग्रहाख्या कृतिः विरचिता । तन्त्रसारसङ्ग्रह इति नाम्ना अयं ग्रन्थः तन्त्रसाराख्यस्य कस्यचन ग्रन्थस्य सङ्ग्रह इति ज्ञायते । कोऽयं तन्त्रसारः? इति जिज्ञासायामाचार्यैः एतद्विषये उक्तमस्ति । तथा हि- ग्रन्थादौ द्वितीयश्लोके एवमुक्तम्—

**विधिं विधाय सर्गादौ तेन पृष्टोऽब्जलोचनः।**
**आह देवो रमोत्सङ्गविलसत्पादपल्लवः ।।**[६]

**ब्रह्मणे कथितात् तन्त्रसारादुद्धृत्य सादरम् ।**
**आनन्दतीर्थमुनिना कृतो ग्रन्थोऽयमञ्जसा ।।**[७]

अस्यायमभिप्रायः— सृष्टौ बह्व्यः अवस्थाः सन्ति । तत्र ब्रह्माण्डसृष्टेः प्राक् चतुर्मुखस्य सृष्टिः एका अवस्था । भगवान् विष्णुः चतुर्मुखं सृष्ट्वा

५. अधिकरणम्-८-श्लोक-९ इति

६. तन्त्रसारसङ्ग्रहः १-३

७. तन्त्रसारसङ्ग्रहः ४-१५८

अग्रेतनं सर्जनं विधातुम् आदिदेश । तदा ब्रह्मा सृष्टिविषये सृष्ट्यर्थमपेक्षितायाः विशिष्टशक्त्याः विषये तदर्जनोपायविषये च विष्णुं प्रार्थयामास । तदा विष्णुः ब्रह्माणं यद् बोधयामास तस्य सङ्कलनं तन्त्रसार इति कथ्यते । न केवलं सृष्ट्यादौ किन्तु अन्यदपि भगवान् तत्र तत्र अन्यान्यान् प्रति तन्त्रमार्गमुपदिशतीति । तेषां सर्वेषां गणने तन्त्रग्रन्था असङ्ख्या भवन्ति। परन्तु तेषु ग्रन्थेषु कथिता अर्थाः कष्टेनानुष्ठेयाः भवन्ति । मन्दाधिकारिणः अनुष्ठातुं न प्रभवन्ति। अतः सुगमतया यत्र तन्त्रमार्गसम्बन्धिनः अर्थाः प्रतिपादिताः तादृशः ग्रन्थः तन्त्रसार-सङ्ग्रहः ।

**ग्रन्थसङ्ख्या, अध्यायादिविभागः**

अस्मिन् ग्रन्थे चत्वारः अध्यायाः सन्ति । चतुःशताधिकाः श्लोकाः सन्ति ।

प्रथमाध्याये– प्रणवलक्षणं तन्माहात्म्यं, पञ्चाशन्मातृकामूर्तयः, अष्टमहामन्त्राणां निरूपणं, भगवत्पूजाकथनं, पीठपूजा, आवरणपूजा, जपध्यानहोमादीनां फलनिरूपणं, विष्णुसर्वोत्तमत्वज्ञानस्य आवश्यकता ।

द्वितीयाध्याये- मातृकान्यासविधिः, प्राणायामः, शौचम्, कलशे आवाह्यरूपविशेषाः, होमविधिः, होमकुण्डपरिमाणं, होमद्रव्याणि ।

तृतीयाध्याये- प्रतिमाद्रव्यं, प्रतिमालक्षणं, षण्णवत्यङ्गुलानाम् अवयवविशेषः, बहुविस्तारेण अवयवपरिमाणनिरूपणम्, शिलापरीक्षापूर्वकं प्रतिमानयनप्रकारः, वास्तुपुरुषोपरि देवतापूजा, प्रतिष्ठाबलिः, मण्डलविचारः, कलशसङ्ख्यादिविचारः, कलशद्रव्य-विचारः,

कलशाभिषेकः, प्रतिमायामनुसन्धानम्, उत्सवकालविधिः, अवभृतस्नानं, जीर्णदेवालयोद्धारप्रकारः, सम्प्रोक्षणविधानं, अन्यदेवता-प्रतिमाप्रतिष्ठापनविधिः।

चतुर्थाध्याये- द्वासप्ततिमहामन्त्राणां निरूपणम्, यन्त्रविधिः, विद्या-गुरुः, उपासनाविधिः, आसनम्, प्राणायामः, नाडीचक्रं, धारणा-ध्यानं-समाधिः, भक्तेरत्यावश्याकता, भक्तितारतम्येन फलतारतम्यम् ।

**तन्त्रसारसङ्ग्रहे निरूपिताः अपूर्वाः विषयाः-**

* बहुषु तन्त्रग्रन्थेषु बहवः मन्त्राः निरूपिताः किं पुनः ग्रन्थेऽस्मिन् निरूपितानां मन्त्राणां वैशिष्ट्यमिति प्रश्ने समुदिते आचार्यैः उत्तरमभ्यधायि– प्रायः कलियुगे मन्त्राणां सवीर्यत्वं फलप्रदत्वं नष्टं विद्यते । अतः अस्मिन् ग्रन्थे येषां मन्त्राणां सवीर्यत्वं कलियुगेऽपि विद्यते तादृशानां मन्त्राणामेव निरूपणं कृतमिति।

* प्रायः सर्वेषु तन्त्रग्रन्थेषु ध्यानादिना एव साक्षात्कार इति निरूपितम्। परन्तु आचार्यैः अन्योऽपि मार्गः प्रदर्शितः 'अथवा सततं शास्त्रविमर्शेन भविष्यति'[८] इति । सततं शास्त्राध्ययनाध्यापनेनापि दर्शनं साध्यमिति अभिप्रायः ।

* शिल्पशास्त्रविषये, मूर्तिनिर्माणविषये देवताप्रतिष्ठापनविषये, शिलाभेदविषये अपूर्वाः विषयाः निरूपिताः ।

८. त-सा-४-१५८

अत्र केवलं अध्ययनकौतुकोत्पादनार्थं केचन एव विषयाः निरूपिताः । ग्रन्थाध्ययनेन विषयाणामपूर्वता ज्ञायते ।

'रोचनार्थं फलश्रुतिः' इति वचनेन श्रोतॄणां श्रवणानुष्ठानादौ प्रवृत्त्यर्थं फलकथनं प्रमुखं साधनम्। अनया दृष्ट्या परिशील्यमाने तन्त्रसारसङ्ग्रहे श्रीमध्वाचार्यैः कण्ठतः अस्य ग्रन्थस्य महत्ता कथिता—

**यावतो ह्यननुष्ठाने कर्मपूर्तिर्न विद्यते ।**

**तावत् समस्तं कथितमस्मिंस्तन्त्रे यथाविधि ।।**

**प्रीयतेऽनेन मार्गेण पूजितो मुक्तिदो भवेत् ।**

**कामदश्च स्वभक्तानां भगवान् पुरुषोत्तमः।।**[९]

**ग्रन्थोऽयं पाठमात्रेण सकलाभीष्टसिद्धिदः ।**

**किमु ज्ञानादनुष्टुनादुभयस्मात् पुनः किमु ।।**[१०]

एवञ्च सुगमः सफलः अवश्यकर्तव्यश्च विषयोऽत्र प्रतिपादितः । यस्य कस्यापि ग्रन्थस्य तत्रापि तन्त्रशास्त्रसम्बन्धिग्रन्थस्येतः किमन्यद् वैशिष्ट्यं भवितुं शक्यते । यस्य पठनं पारायणमपि महाफलप्रदं किमधिकं वक्तव्यं तस्य विषये।

---

९. तं.सा.३-१४०-१४१

१०. तं.सा.३-१५

# माध्वव्याख्यानपरम्परा

**श्रीनिधिः वि**

सहायसंशोधकः,

वेद-वेदान्ताध्ययनशोधसंस्थानम्, नवदेहली

Email : sanju.srinidhi@gmail.com

भारतीयतत्त्वज्ञानेतिहासे द्वैतसिद्धान्तः अन्ते सिद्धोऽभूत् । वेदवादवीथ्यम् उत्क्रान्तिमवाप्य पूर्णतया विकासं लब्ध्वा सर्वाङ्गसुन्दरं निर्दुष्टस्वरूपं प्राप्तमिदं द्वैततत्त्वज्ञानम् । अपूर्वस्यास्य सिद्धान्तस्य प्रवर्तकाः प्रायशः ८०० वर्षेभ्यः प्राक् मध्यगेहवेदवतीदम्पत्योः प्राप्तजन्मानः आचार्यमध्वाः जगत्यस्मिन् श्रेष्ठदार्शनिकाः, समाजोद्धारकाः, संशोधकाः, तत्त्वोपदेशकाश्च ।

**पाजकाख्ये शुचिक्षेत्रे दुर्गया चाभिवीक्षिते ।**

**जातो मध्याह्नवेलायां बुधवारे मरुत्तनुः ।।**

-वायुपुराणोक्तं अणुमध्वचरितम्।

ते सकलसज्जनबान्धवानां तत्त्वोपदेशार्थं अभूवन्निति कारणतः, नामकरणसमये वासुदेव इति यन्नामोदितं, तत्सार्थकं जातम्। उक्तञ्च मध्वविजये—

**''ज्ञानार्थमेव यदभूदसुदेव एष**

**यद्वासुदेवपदभक्तिरतः सदासौ''**

वेदान्तसाम्राज्यस्य परिपालनार्थमेव ते तुरीयाश्रमं स्व्यकुर्वन् । अत एव पूर्णप्रज्ञ इति नाम अन्वर्थतां प्राप्नोत् ।

**गुणानुरूपोन्नतिपूर्णबोध इत्यमुष्य नाम द्विजवृन्दवन्दितः ।**

यथा दिवाकरोदयेन अन्धकारः विनश्यति सर्वत्र प्रकाशः व्याप्नोति, तथैवाचार्यमध्वानां तत्त्वज्ञानोपदेशेन अज्ञानमिथ्याज्ञानादीनि विनश्यन्ति। मुमुक्षूणां प्रमोदः जयते । अत एव गुरूदितं आनन्दतीर्थ इति नामापि सार्थकमजायत। विश्वमान्याः आनन्दतीर्थभगवत्पादाः तत्त्वप्रसारणसमये स्वीयज्ञानवैशाल्येन, अगाधपाण्डित्येनान्यमतानि निराकुर्वन्तः त्रिविक्रम-पण्डितादिप्रकाण्डपण्डितानपि वादे विजित्य, तान् स्वशिष्यत्वेन जगृहुः। विश्वगुरवः अध्यात्मनेतारः मध्वाचार्यः यतिशिष्यान् स्वीकृत्य द्वैतमतप्रतिष्ठापनार्थं अनेकानि वैष्णवपीठान्यासेतुहिमाचलं स्थापयामासुः। एकोनचत्वारिंशत् ग्रन्थांश्च रचयामासुः।

**नानासुभाषितस्तोत्रगाथादिकृतिसत्कृतीः ।**

तान् सर्वमूलग्रन्थाः इति नाम्ना व्यवहरन्ति। प्रकरणग्रन्थाः, उपनिषत्प्रस्थानग्रन्थाः, गीताप्रस्थानग्रन्थाः, सूत्रप्रस्थानग्रन्थाः, श्रुति-प्रस्थानग्रन्थाः इति विभजन्ति च। श्रीपूर्णप्रज्ञादारभ्य विश्वेशतीर्थ-श्रीपादपर्यन्तं अष्टशतवर्षेषु क्रमशः व्याख्यागङ्गाप्रवाहः असदृशः अभूतपूर्वश्च । मध्वाचार्याणां ग्रन्थानां भावं स्वीयशिष्याः प्रकटीकर्तु-मनेकान् व्याख्यानग्रन्थानुल्लेखिषुः। ते निखिलाः ग्रन्थाः पण्डित-वाङ्मयप्रपञ्चे नितरामादरणीयाश्च विद्यन्ते। तादृशानां व्याख्यानानां व्याख्यातृणाञ्च प्रस्तुतिरत्र क्रियतेऽधुना ।

अध्यात्मप्रपञ्चे तत्त्वनिर्णयार्थं दुर्मतानां निराकरणपूर्वकं सत्सिद्धान्तस्थापनार्थं दशप्रकरणग्रन्थांश्च व्यररचन् ।

## प्रमाणलक्षणम्

तत्रादौ दशप्रकरणेष्वन्यतमः प्रमाणलक्षणग्रन्थः। तस्याहत्य प्रमाणलक्षणटीका इति नाम्ना नारायणपण्डिताचार्यैः, रोट्ट वेङ्कटाद्रिभट्टैः, श्रीजयतीर्थभिक्षुभिश्च विरचितं टीकात्रयं वर्तते। जयतीर्थभिक्षूणां टीकाग्रन्थस्य दश व्याख्यास्सन्ति।

| **व्याख्यातॄणां नाम** | **व्याख्यानाम** |
|---|---|
| १. श्रीविजयीन्द्रतीर्थाः | प्रमाणलक्षणटीका व्याख्या |
| २. वराहसेवि श्रीनिवासाचार्याः | प्रमाणलक्षणटिप्पणी |
| ३. श्रीराघवेन्द्रतीर्थश्रीपादाः | भावदीपः |
| ४. बिदरहळ्ळि श्रीनिवासाचार्याः | श्रीनिवासतीर्थीया |
| ५. श्रीवेदेशतीर्थश्रीपादाः | वेदेशतीर्थीया |
| ६. कल्लापुररामचन्द्राचार्याः | प्रमाणलक्षणटीकाटिप्पणी |
| ७. पाण्डुरङ्गिकेशवाचार्याः | गुरुराजीया |
| ८. श्रीमुष्णं अनन्ताचार्याः | अनन्तभट्टीया |
| ९. श्रीनिवासाचार्याः लिङ्गेरी | लिङ्गेरीया |
| १०. श्रीविद्याधीशतीर्थाः | प्रमाणलक्षणटीकाटिप्पणी |

## तत्वोद्योतः

तत्त्वोद्योतग्रन्थस्य श्रीमज्जयतीर्थैः रोट्टवेङ्कटभट्टैश्च विरचितं टीकाद्वयं विद्यते। जयतीर्थीयटीकाग्रन्थस्य चतुर्दश टिप्पणीग्रन्थाः सन्ति।

| | **व्याख्यातॄणां नाम** | **व्याख्यानाम** |
|---|---|---|
| १. | श्रीविजयीन्द्रतीर्थाः | विजयीन्द्रीयगूढभावप्रकाशिका |
| २. | श्रीवेदेशतीर्थाः | तत्त्वोद्योतपञ्चिका |
| ३. | श्रीराघवेन्द्रतीर्थश्रीपादाः | भावदीपः |
| ४. | बिदरहळ्ळि श्रीनिवासाचार्याः | श्रीनिवासतीर्थीया |
| ५. | काशीतिम्मण्णाचार्याः | काशिका |
| ६. | श्रीराघवेन्द्रस्वामिनां शिष्याः | तत्त्वोद्योतटीकाटिप्पणी |
| ७. | श्रीहुलिगिश्रियःपत्याचार्याः | द्वैतद्युमणिः |
| ८. | पाण्डुरङ्गिकेशवाचार्याः | गुरुराजीया |
| ९. | श्रीव्यासराजतीर्थाः | तत्त्वोद्योतटीकाटिप्पणी |
| १०. | श्रीमुष्णं अनन्ताचार्याः | अनन्तभट्टीया<br>तत्त्वोद्योतटीका टिप्पणी |
| ११. | लिङ्गेरि श्रीनिवासाचार्याः | लिङ्गेरीया |
| १२. | वादीन्द्रतीर्थाः | तत्त्वोद्योतटीकाटिप्पणी |
| १३. | श्रीकुण्डलगिरि आचार्याः | तत्त्वोद्योतटीकाटिप्पणी |

अन्ते केवलं आद्यश्लोकस्य श्रीकञ्ची सुब्रह्मण्याचार्याः तत्त्वोद्योत-प्रथमश्लोकविचारः इति नाम्ना व्याख्यानं चक्रुः।

## प्रपञ्चमिथ्यात्वानुमानखण्डनम्

अथ प्रपञ्चमिथ्यात्वानुमानखण्डनग्रन्थस्य, वादिराजमुनिभिः उपन्यासरत्नमाला इति नाम्ना, पूर्ववच्छ्रीजयतीर्थैः रोट्टवेङ्कटभट्टैश्चोल्लिखिताः त्रयः टीकाग्रन्थाः विद्यन्ते। श्रीजयतीर्थमुनिटीकायाः सप्तव्याख्यानानि वर्तन्ते।

| व्याख्यातॄणां नाम | व्याख्यानाम |
|---|---|
| १. श्रीव्यासतीर्थाः | मन्दारमञ्जरी |
| २. श्रीसत्यनाथतीर्थाः | परशुः |
| ३. श्रीनिवासतीर्थाः | पञ्चिका |
| ४. पाण्डुरङ्गिकेशवाचार्याः | गुरुराजीया |
| ५. श्रीमुष्णं अनन्ताचार्याः | अनन्तभट्टीया |
| ६. लिङ्गेरी श्रीनिवासाचार्याः | लिङ्गेरीया |
| ७. अज्ञातकर्तृका | दीपिका |

## मायावादनखण्डनम्

मायावादखण्डनग्रन्थस्य जयतीर्थपूज्यचरणैः वादिराजतीर्थैश्च विरचिते द्वे टीके स्तः। जयतीर्थटीकायाः पूर्ववत् सप्त व्याख्यास्सन्ति। एवमेव उपाधिखण्डनग्रन्थस्यापि प्रपञ्चमिथ्यात्वानुमानखण्डनग्रन्थस्येव टीकात्रयं, सप्तटिप्पण्यश्च पण्डितैः विरचिताः।

तत्त्वविवेकग्रन्थस्य जयतीर्थैः प्रणीतैका टीका वर्तते। तस्याः सप्तटिप्पणः विद्यन्ते ।

| **व्याख्यातॄणां नाम** | **व्याख्यानाम** |
|---|---|
| १. श्रीव्यासतीर्थाः | मन्दारमञ्जरी |
| २. बिदरहळ्ळि श्रीनिवासाचार्याः | टीकविवरणम् |
| ३. पाण्डुरङ्गिकेशवाचार्याः | गुरुराजीया |
| ४. श्रीमुष्णं अनन्ताचार्याः | अनन्तभट्टी |
| ५. लिङ्गेरी श्रीनिवासाचार्याः | लिङ्गेरीया |
| ६. कम्बालूरु रामचन्द्रतीर्थाः | तत्त्वविवेकटीकाटिप्पणी |
| ७. रोट्ट वेङ्कटभट्टाः | रोट्टवेङ्कटभट्टीया |

## तत्त्वसङ्ख्यानम्

आचार्यमध्वस्य तत्त्वसङ्ख्यानग्रन्थस्य श्रीजयतीर्थमुनिभिः विरचिताया अद्वितीयाया टीकायाः आहत्य पञ्चदशव्याख्यानानि विलसन्ति।

| **व्याख्यातॄणां नाम** | **व्याख्यानाम** |
|---|---|
| १. श्रीराघवेन्द्रतीर्थश्रीपादाः | भावदीपः |
| २. बिदरहळ्ळिश्रीनिवासतीर्थाः | विवरणम् |
| ३. काशी तिम्मण्णाचार्याः | काशिका |
| ४. श्रीसत्यधर्मतीर्थाः | तत्त्वसङ्ख्यानटीकाटिप्पणी |

| | |
|---|---|
| ५. श्रीयादवाचार्याः | यादुपत्यम् |
| ६. श्रीविजयीन्द्रतीर्थाः | टीकाव्याख्याभाववर्णनम् |
| ७. पाण्डुरङ्गीकेशवभट्टारकाः | गुरुराजीयभावचन्द्रिका |
| ८. रोट्टवेङ्कटभट्टाः | वेङ्कटभट्टीया |
| ९. श्रीमुष्णं अनन्ताचार्याः | अनन्तभट्टीया |
| १०. चिक्कोडि भगवन्तरायाः | टीकाटिप्पणी |
| ११. श्रीविद्याधीशतीर्थानां शिष्यः श्रीनृसिंहसूरिः | भावचन्द्रिका |
| १२. लिङ्गेरी श्रीनिवासाचार्याः | तत्त्वसङ्ख्यानटिप्पणी |
| १३. वानिवाल विठ्ठलाचार्याः | तत्त्वसङ्ख्यानटिप्पणी |
| १४. छलारी नरसिंहाचार्याः | तत्त्वसङ्ख्यानटिप्पणी |

## विष्णुतत्त्वनिर्णयः

पूर्णप्रज्ञैर्विरचितस्य विष्णुतत्त्वनिर्णयग्रन्थस्य जयतीर्थैः नारायण-पण्डिताचार्यैश्च प्रणीते द्वे टीके स्तः । जयतीर्थटीकयाः आहत्य अष्टादश व्याख्यास्सन्ति।

| **व्याख्यातॄणां नाम** | **व्याख्यानाम** |
|---|---|
| १. श्रीराघवेन्द्रतीर्थश्रीपादाः | भावदीपः |
| २. श्रीसत्यधर्मतीर्थाः | तत्त्वनिर्णयटिप्पणी |
| ३. रोट्टवेङ्कटभट्टाः | वेङ्कटभट्टीया |
| ४. ताम्रपर्णीकृष्णाचार्याः | ताम्रपर्णीया |

| | |
|---|---|
| ५. श्रीविजयीन्द्रतीर्थाः | विजयीन्द्रीया टीकाव्याख्या |
| ६. श्रीनिवासाचार्याः | श्रीनिवासतीर्थीया |
| ७. गूढनाम | गूढटिप्पणी |
| ८. श्रीमुष्णं अनन्ताचार्याः | अनन्तभट्टीया |
| ९. श्रीविद्याधीशतीर्थाः | विष्णुतत्त्वनिर्णयटिप्पणी |
| १०. पाण्डुरङ्गिकेशवाचार्याः | गुरुराजीया |
| ११. अनन्ताचार्याः | अनन्तभट्टीया |
| १२. आयी सत्यनाथाचार्याः | आयीटिप्पणी |
| १३. लिङ्गेरी श्रीनिवासाचार्याः | लिङ्गेरीया |
| १४. उमर्जिप्रह्लादकृष्णाचार्याः | विष्णुतत्त्वनिर्णयटीकाव्याख्यानम् |
| १५. अज्ञातकर्तृका | विष्णुतत्त्वनिर्णयटिप्पणी |
| १६. श्रीव्यासतत्त्वज्ञाः | लघुप्रभा |
| १७. आनेप्पाचार्याः | तत्त्वनिर्णयटीकाटिप्पणी |
| १८. श्रीव्यासतत्त्वज्ञाः | गुरुप्रभा |

**कर्मनिर्णयः**

कर्मनिर्णयग्रन्थस्य उत्तरादिमठीयैः श्रीसत्यनाथतीर्थैः विरचिता कर्मप्रकाशिका (कर्मनिर्णयटीका) टीकैकास्ति। एवं मूलग्रन्थस्य सप्तव्याख्यान्यपि प्रणीतान्यासन्।

| व्याख्यातॄणां नाम | व्याख्यानाम |
|---|---|
| १. पाण्डुरङ्गिकेशवाचार्याः | गुरुराजीया (कर्मनिर्णयव्याख्यानम्) |
| २. श्रीनिवासतीर्थाः | श्रीनिवासतीर्थीया |
| ३. श्रीमुष्णं अनन्ताचार्याः | अनन्तभट्टीया |
| ४. लिङ्गेरी श्रीनिवासाचार्याः | लिङ्गेरीया |
| ५. उत्तरादिमठीयाः सत्यप्रियतीर्थाः | |
| ६. छलारि शेषाचार्याः | कर्मनिर्णयव्याख्या |
| ७. व्यासराजमठीयाः श्रीरघुनाथतीर्थाः | कर्मनिर्णयव्याख्यानम् |

## कथालक्षणम्

आनन्दतीर्थानां कथालक्षणग्रन्थस्य जयतीर्थैः रोट्टवेङ्कटभट्टैश्च विरचिते टीके द्वे विद्येते। अन्यान्यष्ट व्याख्यानानि श्रीवेदेशतीर्थैः, श्रीराघवेन्द्रतीर्थैः, रोट्टवेङ्कटभट्टैः, विजयीन्द्रतीर्थैः, पाण्डुरङ्गिकेशवाचार्यैः, श्रीमुष्णं अनन्ताचार्यैः, लिङ्गेरी श्रीनिवासाचार्यैः विद्याधीशतीर्थैश्च प्रणीतान्यभवन् ।

## महाभारततात्पर्यनिर्णयः

इतिहासपुराणानां सारं अवगन्तुं, ज्ञापयितुं, तेषां सन्देशानपि सूचयितुं महाभारततात्पर्यनिर्णयः, भागवततात्पर्यनिर्णयः, यमकभारत-मिति च नाम्ना कृतित्रयं निर्मितवन्तः। श्रीमदाचार्याणां पुराणप्रस्थाने अन्यतमस्य मह्हाभारततात्पर्यनिर्णयग्रन्थस्य आहत्य त्रयोदशटिप्पण्यः विरचिताः।

| व्याख्यातॄणां नाम | व्याख्यानाम |
|---|---|
| १. श्रीवादिराजतीर्थाः | भावप्रकाशिका |
| २. आद्यश्रीवरदराजाचार्यः | वरदराजीयसुबोधिनी |
| ३. श्रीजनार्दनभट्टाः | पदार्थदीपिका |
| ४. बिदरहळ्ळिश्रीनिवासतीर्थाः | श्रीनिवासतीर्थीया |
| ५. सोदेवादिराजमठीयाः वेदाङ्गतीर्थाः | महाभारततात्पर्यनिर्णयव्याख्यानम् |
| ६. श्रीराघवेन्द्रतीर्थाः | तात्पर्यनिर्णयसारसङ्ग्रहः |
| ७. छलारिश्रीनारायणाचार्याः | तात्पर्यनिर्णयव्याख्यानम् |
| ८. श्रीतिरुमलः | तात्पर्यनिर्णयप्रमाणसङ्ग्रहः |
| ९. श्रीराघवेन्द्रतीर्थाः | तात्पर्यनिर्णयभावसङ्ग्रहः |
| १०. श्रीविजयध्वजतीर्थाः | महाभारततात्पर्यनिर्णयव्याख्यानम् |
| ११. व्यासतीर्थाः (टीकाचार्याणां शिष्याः) | महाभारततात्पर्यनिर्णयव्याख्यानम् |
| १२. उत्तरादिमठीयाः श्रीसत्याभिनवतीर्थश्रीपादाः | महाभारततात्पर्यनिर्णयव्याख्यानम् |
| १३. श्रीसर्वज्ञनारायणः | भारततात्पर्यदीपिका |

## भागवततात्पर्यनिर्णयः

श्रीमदानन्दतीर्थोः विरचितस्य श्रीभागवततात्पर्यनिर्णयग्रन्थस्य नव व्याख्या-नानि सन्ति।

| | व्याख्यातॄणां नाम | व्याख्यानाम |
|---|---|---|
| १. | श्रीनरहरितीर्थाः | भागवततात्पर्यदीपिका |
| २. | बिदरहळ्ळि श्रीनिवासतीर्थाः | भागवततात्पर्यनिर्णयप्रकाशः |
| ३. | श्रीयादवाचार्याः | यादुपत्यम् |
| ४. | श्रीविजयध्वजतीर्थाः | विजयध्वजीया |
| ५. | श्रीकट्टि तिम्मण्णाचार्याः | भागवततात्पर्यविवरणम् |
| ६. | श्रीछलारिनरसिंहाचार्याः | भागवततात्पर्यटिप्पणी |
| ७. | श्रीछलारीशेषाचार्याः | भागवततात्पर्यटिप्पणी |
| ८. | श्रीछलारिनारायणाचार्याः | भागवततात्पर्यनिर्णयप्रबोधिनी |
| ९. | श्रीचिक्कोडिभगवन्तरायाः | भागवततात्पर्यभावदीपः |

## यमकभारतम्

श्रीपूर्णप्रज्ञकृतस्य यमकभारतग्रन्थस्य अष्टग्रन्थाः व्याख्यानरूपेण विरचिताः।

| | व्याख्यातॄणां नाम | व्याख्यानाम |
|---|---|---|
| १. | श्रीनारायणपण्डिताचार्याः | यमकभारतव्याख्यानम् |
| २. | श्रीविजयध्वजतीर्थाः | यमकभारतव्याख्यानम् |
| ३. | श्रीतिम्मण्णाचार्याः | तिम्मण्णभट्टीया |
| ४. | श्रीवेङ्कटेशाचार्याः | वेङ्कटेशीया |
| ५. | श्रीनरहरितीर्थाः | नरहरितीर्थीया |
| ६. | श्रीयादवाचार्याः | यमकभारतव्याख्यानम् |

| | |
|---|---|
| ७. श्रीछलारिनरसिंहाचार्याः | यमकभारतव्याख्यानम् |
| ८. श्रीचिक्कोडिभगवन्तरायाः | यमकभारतव्याख्यानम् |

**ऋग्भाष्यम्**

श्रुतिप्रस्थानेऽद्वितीयस्य ऋग्भाष्यग्रन्थस्य श्रीजयतीर्थभिक्षुभिः जयतीर्थीया, व्यासराजमठीयैः श्रीजगन्नाथतीर्थैर्जगन्नाथतीर्थीया, एवं कैश्चिदनामकैः ऋक्सूची इतीमाः त्रयः टीकाः प्रणीता अभूवन्। जयतीर्थीयटीकायाः एकादशव्याख्याः भवन्ति।

| **व्याख्यातॄणां नाम** | **व्याख्यानाम** |
|---|---|
| १. श्रीछलारिनरसिंहाचार्याः | टीकाविवृतिः |
| २. बिदरहळ्ळि श्रीनिवासतीर्थाः | श्रीनिवासतीर्थीया ऋगर्थमञ्जरी |
| ३. कम्बालरू श्रीरामचन्द्रतीर्थाः | कम्बालरुव्याख्या (ऋग्भाष्यटीकाविवृत्तिः) |
| ४. श्रीविजयीन्द्रतीर्थाः | ऋक्प्रस्थानम् |
| ५. श्रीपाण्डुरङ्गिकेशवाचार्याः | गुरुराजीयऋग्भाष्यटीकाव्याख्यानम् |
| ६. श्रीराघवेन्द्रतीर्थाः | मन्त्रार्थमञ्जरी |
| ७. श्रीराघवेन्द्रतीर्थाः | वेदत्रयविवृत्तिः |
| ८. श्रीसुमतीन्द्रतीर्थाः | ऋग्भाष्यव्याख्यानभावरत्नकोशः |
| ९. आरोग्यनामकहरिः | ऋग्भाष्यटिप्पणी |
| १०. श्रीसत्यनाथतीर्थाः | ऋग्भाष्यटीकाप्रकाशः |
| ११. श्रीमुष्णंसेतुमाधवाचार्याः | ऋग्भाष्यटीकाव्याख्यानम् |

## ब्रह्मसूत्रभाष्यम्

बादरायणेन प्रणीतानां ब्रह्मसूत्राणां बादरायणसम्मतमर्थं प्रकटीकर्तुं, सूत्राणां महत्वं ज्ञापयितुं च ब्रह्मसूत्रभाष्यम्, अनुव्याख्यानम्, अणुभाष्यम्, न्यायविवरणं चेतीमान् ग्रन्थान् व्यररचन् ।

सूत्रप्रस्थानेऽन्यतमस्य ब्रह्मसूत्रभाष्यग्रन्थस्य त्रिविक्रमपण्डिताचार्यैः तत्त्वप्रदीपिका, श्रीजयतीर्थैः तत्त्वप्रकाशिका, श्रीगोविन्दविद्याभूषणैः गोविन्दभाष्यम्, श्रीत्रिविक्रमपण्डिताचार्याणां सहोदरैः श्रीशङ्कराचार्यैः सम्बन्धदीपिका इति टीकाचतुष्टयं विरचितं वर्तते । टीकाकृत्पादानां श्रीमज्जयतीर्थानां टीकायाः आहत्य एकचत्वारिंशद् व्याख्यानग्रन्थाः सन्ति ।

| | **व्याख्यातॄणां नाम** | **व्याख्यानाम** |
|---|---|---|
| १. | श्रीराघवेन्द्रतीर्थाः | तन्त्रदीपिका |
| २. | जगन्नाथतीर्थाः | भाष्यदीपिका |
| ३. | श्रीविजयीन्द्रतीर्थाः | तत्त्वमाणिक्यपेटिका |
| ४. | श्रीवादिराजतीर्थाः | ब्रह्मसूत्रार्थनिबद्धनामावली |
| ५. | आयी नरसिंहाचार्याः | सूत्रार्थः |
| ६. | चिक्कोडि भगवन्तरायाः | ब्रह्मसूत्रार्थयुक्तिसङ्ग्रहः |
| ७. | कल्लापुर अण्णय्याचार्याः | अधिकरणार्थसङ्ग्रहः |
| ८. | रामकृष्णः (पाण्डुरङ्गिकेशवाचार्याणां शिष्यः) | ब्रह्मसूत्रभाष्योक्तश्रुत्यर्थप्रकाशः |
| ९. | तोनसीश्रीनिवासाचार्याः | श्रुत्यर्थरत्नमाला |

१०. श्रीविजयीन्द्रतीर्थाः न्यायमालासङ्ग्रहः
११. श्रीजगन्नाथतीर्थाः सूत्रदीपिका
१२. पाण्डुरङ्गिहुच्चाचार्याः सूत्रप्रमेयावलिः
१३. चिक्कोडिभगवन्तरायाः ब्रह्मसूत्रपूर्वपक्षसिद्धान्तयुक्तिसङ्ग्रहव्याख्या
१४. श्रीवसुधेन्द्रस्वामिनां शिष्यः सूत्रभाष्यगतविषयवाक्यसङ्ग्रहः
१५. श्रीसुमतीन्द्रतीर्थाः सूत्रभाष्यभावरत्नकोषः
१६. श्रीसुमतीन्द्रतीर्थाः अधिकरणरत्नमाला
१७. बलदेवविद्याभूषणः सिद्धान्तरत्नम्
१८. कोच्चि रङ्गप्पाचार्याः न्यायमालिका
१९. कोच्चिमध्वरायाचार्याः न्यायमालिकाटिप्पणी
२०. पाङ्गि श्रीनिवासाचार्याः ब्रह्मसूत्रनामावली
२१. चिक्कोडिभगवन्तरायाः ब्रह्मसूत्रपञ्चिका
२२. वेदगर्भनारायणाचार्याः ब्रह्मसूत्रभाष्यार्थमञ्जरी
२३. श्रीसत्यध्यानतीर्थाः भेदपराण्येव खलु ब्रह्मसूत्राणि
२४. श्रीमुष्णंसुब्बरायाचार्याः ब्रह्मसूत्रभाष्यव्याख्या
२५. पाङ्गि श्रीनिवासाचार्याः ब्रह्मसूत्रभाष्यार्थः
२६. काळूरमहिदासाचार्याः ब्रह्मसूत्रार्थकौमुदी
२७. श्रीराघवेन्द्रतीर्थाः न्यायमुक्तावली
२८. श्रीदासाचार्याः अधिकरणार्थसङ्ग्रहः
२९. श्रीधीरेन्द्रस्वामिनः विषयवाक्यसङ्ग्रहः
३०. श्रीमुष्णंसुब्रायाचार्याः सूत्रार्थमणिमञ्जरी

| | |
|---|---|
| ३१. श्रीनरहरितीर्थाः | सूत्रभाष्यटीका |
| ३२. श्रीविजयीन्द्रतीर्थाः | मध्वतन्त्रनयमञ्जरी |
| ३३. श्रीविजयीन्द्रतीर्थाः | ब्रह्मसूत्रार्थसङ्ग्रहः |
| ३४. छलारीनरसिंहाचार्याः | ब्रह्मसूत्रार्थाधिकरणसङ्ग्रहः |
| ३५. सत्यनाथानां शिष्यः | सूत्रवृत्तिः |
| ३६. शर्करा श्रीनिवासाचार्याः | सूत्रार्थमञ्जरी |
| ३७. गूढकर्तृकः | सूत्रार्थसारःङ्ग्रहः |
| ३९. गूढकर्तृकः | सूत्रार्थप्रबन्धः |
| ४०. गूढकर्तृकः | सूत्रार्थमञ्जरी |
| ४१. गूढकर्तृकः | भाष्यघटकश्रुत्यर्थरत्नमाला |

## अनुव्याख्यानम्

श्रीमध्वाचार्यैः विरचितस्य श्रीमदनुव्याख्यानग्रन्थस्य सप्त टीकाः अधोनिर्दिष्टाः सन्ति।

| **टीककाराः** | **टीकानाम** |
|---|---|
| १. श्रीनारायणपण्डिताचार्याः | न्यायचन्द्रिका |
| २. श्रीपद्मनाभतीर्थाः | सन्न्यायरत्नावली |
| ३. श्रीत्रिविक्रमपण्डितानां शिष्याः श्रीशङ्कराचार्याः | अनुव्याख्यानव्याख्यानम् |
| ४. श्रीजयतीर्थाः | श्रीमन्न्यायसुधा |
| ५. श्रीविजयीन्द्रतीर्थाः | अनुव्याख्यानटीका |
| ६. श्रीलिङ्गेरिस्वामिरायाचार्याः | अनुव्याख्यानदीपिका |

७. श्रीरघूत्तमतीर्थाः न्यारत्नसम्बन्धदीपिका

श्रीजयतीर्थविरचितायाः टीकायाः श्रीमन्न्यायसुधायाः व्याख्यानानि अधोनिर्दिष्टानि ।

| **व्याख्यातॄणां नाम** | **व्याख्यानाम** |
|---|---|
| १. श्रीवादिराजतीर्थाः | गुर्वर्थदीपिका |
| २. श्रीराघवेन्द्रतीर्थाः | परिमळः |
| ३. श्रीयादवाचार्याः | यादुपत्यम् |
| ४. श्रीविध्याधीशतीर्थाः | वाक्यार्थचन्द्रिका |
| ५. पाण्डुरङ्गिकेशवाचार्याः | शेषवाक्यार्थचन्द्रिका |
| ६. बिदरहळ्ळिश्रीनिवासाचार्याः | श्रीनिवासतीर्थीया सुधावाक्यार्थविवृतिः |
| ७. श्रीनिधितीर्थाः | श्रीनिधितीर्थीया |
| ८. श्रीकुण्डलगिरिआचार्याः | कुण्डलगिरीया |
| ९. काशीतिम्मण्णाचार्याः | काशिका |
| १०. कम्बालूरुरामचन्द्राचार्याः | कम्बालूरुटिप्पणी |
| ११. गार्लपाडुश्रीनिवासाचार्याः | चषकः |
| १२. श्रीविठ्ठलाचार्याः | विठ्ठलभट्टीया |
| १३. श्रीगलगलिगोविन्दाचार्याः | पञ्चरत्नस्तबकम् |
| १४. श्रीअडविविष्णुतीर्थाचार्याः | विष्णुतीर्थीया |
| १५. श्रीमुष्णम् अनन्ताचार्याः | अनन्तभट्टीया |
| १६. श्रीमुष्णम् आचार्याः | पञ्चाधिकरिणी टिप्पणी |

| | |
|---|---|
| १७. आयिसत्यनाथाचार्याः | विषयवाक्यार्थः |
| १८. लिङ्गेरीश्रीनिवासाचार्याः | लिङ्गेरीसिद्धान्तप्रभा |
| १९. उमर्जिप्रह्लादकृष्णाचार्याः | सुधाटिप्पणी |
| २०. श्रीपाण्डुरङ्गिकेशवाचार्याः | सुधावाक्यार्थविनोदः |
| २१. श्रीपाण्डुरङ्गिकेशवाचार्याः | सुधावाक्यार्थमञ्जरी |
| २२. श्रीमहेश्वरसूरिः | सुधाटिप्पणी |
| २३. श्रीसत्यनाथतीर्थाः | सुधादुर्घटवाक्यार्थविचारः |
| २४. श्रीश्रीपादराजतीर्थाः | न्यायसुधोपन्यासवग्वज्रः |
| २५. पुत्तिगेमठीयाः श्रीराघवेन्द्रतीर्थाः | न्यायसुधाटिप्पणी |
| २६. श्रीसत्यनाथतीर्थाः | परशुः |
| २७. सत्यव्रततीर्थाः | श्रीमन्यायसुधाविवृतिः |
| २८. श्रीसुमतीन्द्रतीर्थाः | न्यायसुधाभावरत्नकोशः |
| २९. ऐजि श्रीव्यासतत्त्वज्ञाः | सुधारञ्जिनी (लघु) |
| ३०. ऐजि श्रीव्यासतत्त्वज्ञाः | सुधारञ्जिनी (गुरु) |
| ३१. श्रीपण्डुरङ्गिनरसिंहाचार्याः | वाक्यार्थरत्नमाला |
| ३२. कुम्बारगेरि श्रीभीमरावकुलकर्णी | सुधाटिप्पणी |
| ३३. श्रीसत्यपराक्रमतीर्थाः | सुधाफक्किका |
| ३४. श्रीहुलिगिश्रियःपत्याचार्याः | सुधाटिप्पणी (अंशतः) |
| ३५. श्रीवरखेडितिम्मणाचार्याः | सुधानादरणीयखण्डनम् |
| ३६. गूढकर्तृकः | हुघ्घीटिप्पणी |

| | |
|---|---|
| ३७. गूढकर्तृकः | सुधासारसङ्ग्रहः |

## न्यायविवरणम्

श्रीमदानन्दतीर्थविरचितस्य न्यायविवरणग्रन्थस्य श्रीत्रिविक्रमपण्डिताचार्याणाम् अनुजैः श्रीशङ्कराचार्यैः न्यायविवरणसम्बन्धदीपिका, श्रीरघूत्तमतीर्थैः भावबोधटीका, श्रीमज्जयतीर्थैः न्यायविवरणपञ्चिका इत्येवं टीकात्रयं वर्तते।

श्रीटीकाकृत्पादानां टीकायाः टिप्पणचतुष्टयमस्ति।

| व्याख्यातॄणां नाम | व्याख्यानाम |
|---|---|
| १. श्रीविश्वोत्तमतीर्थाः | विश्वोत्तमतीर्थीया |
| २. श्रीविजयीन्द्रतीर्थाः | न्यायविवरणव्याख्यानम् |
| ३. श्रीरघूत्तमतीर्थाः | न्यायविवरणोद्धारः |
| ४. गूढकर्तृकः | प्रदीपः |

## अणुभाष्यम्

श्रीपूर्णप्रज्ञविरचितस्य अणुभाष्यग्रन्थस्य आहत्य द्वादशव्याख्याः विद्यन्ते।

| व्याख्यातॄणां नाम | व्याख्यानाम |
|---|---|
| १. श्रीनारायणपणण्डिताचार्याः | अणुभाष्यार्थसङ्ग्रहः |
| २. श्रीराघवेन्द्रस्वामिपादाः | तत्त्वमञ्जरी |
| ३. श्रीबिदरहळ्ळि श्रीनिवासाचार्याः | अणुभाष्यविवरणम् |
| ४. श्रीरघुनाथतीर्थाः | अणुभाष्यव्याख्यानम् |
| ५. श्रीविजयीन्द्रतीर्थाः | अणुभाष्यव्याख्यानम् |

६. श्रीछलारिशेषाचार्याः छलारी

७. श्रीआयी नहरि आचार्याः अणुभाष्यव्याख्यानम्

८. श्रीविद्याधीशतीर्थानां शिष्याः नरसिंहयतयः अणुभाष्यटिप्पणी

९. श्रीसत्यसन्तुष्टानां शिष्याः रामशब्दार्थगर्भिताणुभाष्यविवरणम्

१०. श्रीत्रिविक्रमदासाः आनन्दमाला

११. श्रीभीमाचार्याः अणुभाष्यप्रकाशिका

१२. गूढकर्तृकः अणुभाष्यप्रदीपः

## गीताभाष्यम्

भगवद्गीतां व्याख्यातुं गीताभाष्यम् एवं गीतातात्पर्यनिर्णयः इतीमे ग्रन्थरत्ने यथा सूर्यचन्द्रौ जगदेतत्प्रकाशयतः, तथा अज्ञानेनान्धीभूतं साधनपथं प्रकाशयन्ती स्तः। गीताप्रस्थाने गीताभाष्यग्रन्थस्य श्रीनरहरितीर्थैः गीताभावप्रकाशिका, एवं टीकाकृत्पादैः प्रमेयदीपिका इति नाम्ना टीकाद्वयं प्रणीतं भवति। टीकाकृत्पादानां टीकायाः व्याख्यानानि अधोनिर्दिष्टानि ।

| व्याख्यातृणां नाम | व्याख्यानाम |
|---|---|
| १. श्रीरघूत्तमतीर्थाः | भावबोधः |
| २. श्रीराघवेन्द्रतीर्थाः | गीताभाष्यटीकाव्याख्यानम् |
| ३. श्रीसुमतीन्द्रतीर्थाः | भावरत्नकोशः |
| ४. ताम्रपर्णिकृष्णाचार्याः | प्रमेयदीपिकाभावप्रकाशः |
| ५. श्रीमुष्णंसुब्बरायाचार्याः | गीताभाष्यव्याख्या |
| ६. बिदरहळ्ळिश्रीनिवासतीर्थाः | गीताभाष्यटीकाव्याख्यानम् |

माध्वभाष्यानुसारिणः गीताभाष्यग्रन्थस्यान्ये ग्रन्थाः अधोनिर्दिष्टाः

| | व्याख्यातॄणां नाम | व्याख्यानाम |
|---|---|---|
| १. | जयतीर्थानां साक्षाच्छिष्याः विद्याधिराजतीर्थाः | गीताविवृतिः |
| २. | श्रीराघवेन्द्रतीर्थाः | गीताविवृतिः |
| ३. | कोयम्बत्तूरुपद्मनाभाचार्याः | गीताभावचन्द्रिका |
| ४. | आयिनरहरितीर्थाः | गीताविवृतिः |
| ५. | श्रीविजयीन्द्रतीर्थाः | प्रमेयदीपिकाटिप्पणी |
| ६. | श्रीपाण्डुरङ्गिकेशवाचार्याः | गुरुराजीया |
| ७. | श्रीगौडेश्वरमठाधिपतयः विद्याधिराजतीर्थाः | गीताविवृतिः |
| ८. | उम्मर्जि प्रह्लादकृष्णाचार्याः | गीताभाष्यटीकाप्रमेयदीपिकाव्याख्यानम् |

## गीतातात्पर्यनिर्णयः

गीतातात्पर्यग्रन्थस्य टिप्पण्यः अधोलिखिताः।

| | व्याख्यातॄणां नाम | व्याख्यानाम |
|---|---|---|
| १. | श्रीजयतीर्थाः | न्यायदीपिका |
| २. | श्रीराघवेन्द्रतीर्थाः | न्यायदीपिकाटिप्पणीविवरणम् |
| ३. | श्रीबिदरहळ्ळिश्रीनिवासतीर्थाः | न्यायदीपकिरणावलिः |
| ४. | श्रीविजयीन्द्रतीर्थाः | न्यायदीपिकाटिप्पणी |
| ५. | श्रीवादिराजतीर्थाः | गीताव्याख्यानविवरणम् |
| ६. | सत्यप्रज्ञतीर्थाः | न्यायदीपिकाभावप्रकाशः |
| ७. | श्रीबिदरहळ्ळिश्रीनिवासतीर्थाः | श्रीनिवासतीर्थीया भावप्रदीपिका |
| ८. | श्रीवरदाचार्याः | वरदराजीया |

९. गूढकर्तृकः दुर्बोधस्थलीयटिप्पणी

सदाचारपद्धतिं, कर्मानुसन्धानं, पूजाविधानम्, एकादशी-महत्वमित्यादीन् विषयान् अवबोधयितुं सदाचारस्मृतिः, जयन्तीनिर्णयः, तन्त्रसारसङ्ग्रहः, कृष्णामृतमहार्णवः इतीमान् ग्रन्थान् प्रणिन्युः। सङ्कीर्णग्रन्थेषु स्तोत्रविभागे अन्यतमस्य द्वादशस्तोत्रस्य व्याख्याः।

**द्वादशस्तोत्रम्**

**व्याख्यातॄणां नाम**

१. उडुपिश्रीविश्वपतितीर्थाः
२. श्रीपुण्यश्रवणतीर्थाः
३. श्रीजनार्दनभट्टाः
४. श्रीछलारिनरसिंहाचार्याः
५. कोयम्बत्तूरुपद्मनाभाचार्याः
६. पङ्क्तिश्रीनिवासाचार्याः

कृष्णामृतमहार्णवस्यास्य ग्रन्थस्य काशीतिम्मणाचार्यैः श्री श्रीनिवासाचार्यैश्च कृते द्वे टिप्पण्यौ स्तः।

जयन्तीनिर्णयग्रन्थस्य एकं टिप्पणग्रन्थं श्रीवरखेडितिम्मण्णाचार्याः व्यरचयन्।

**सदाचारस्मृतिः**

सदाचारस्मृतिग्रन्थस्य दशटिप्पण्यः अधोलिखिताः।

| **व्याख्यातॄणां नाम** | **व्याख्यानाम** |
|---|---|
| १. श्रीश्रीनिवासाचार्याः | शर्करा |

| | |
|---|---|
| २. श्रीनारायणाचार्याः | वैष्णवाचारपद्धतिः |
| ३. आयिनरहरि आचार्याः | वाक्यार्थविवृतिः |
| ४. श्रीछलारिनरसिंहाचार्याः | सदाचारस्मृतिव्याख्या |
| ५. श्रीश्रीनिवासभट्टाः | श्रीनिवासभट्टीया |
| ६. श्रीनरहरि आचार्याः | भावप्रबोधिनी |
| ७. श्रीश्रीनिवासतीर्थाः | आह्निककौस्तुभम् |
| ८. श्रीयादवाचार्याः | सदाचारस्मृतिव्याख्यानम् |
| ९. श्रीपाङ्गिश्रीनिवासाचार्याः | सदाचारस्मृतिटीका |
| १०. श्रीबल्लाळनारायणाचार्याः | सदाचारस्मृतिव्याख्या |

**तन्त्रसारसङ्ग्रहः**

तन्त्रसारसङ्ग्रहग्रन्थस्य टिप्पण्यः अधोनिर्दिष्टाः

| **व्याख्यातॄणां नाम** | **व्याख्यानाम** |
|---|---|
| १. श्रीजयतीर्थाः | पद्यमाला |
| २. श्रीसुमतीन्द्रतीर्थाः | सुमतीन्द्रतीर्थीया |
| ३. श्रीतम्मण्णाचार्याः | तम्मण्णीया |
| ४. श्रीछलारिशेषाचार्याः | छलारीटीका |
| ५. श्रीवेदव्याससूरयः | पदभावप्रबोधिनी |
| ६. श्रीवेङ्कटपतयः | वेङ्कटपतीया |
| ७. श्रीश्रीनिवासाचार्याः | शर्करा |
| ८. श्रीवादिराजतीर्थाः | तन्त्रसारटीका |
| ९. श्रीबिदरहळ्ळिश्रीनिवासाचार्याः | मन्त्रोद्धारः |

| | |
|---|---|
| १०. श्रीगङ्गोदमिश्रः | तन्त्रसारव्याख्या |
| ११. श्रीवेदवेद्यतीर्थाः | तन्त्रसारव्याख्या |
| १२. श्रीरघुनाथतीर्थाः | तत्त्वकणिका |
| १३. श्रीसुव्रतीन्द्रतीर्थाः | तन्त्रसारव्याख्यानम् |
| १४. श्रीमुष्णं सुब्बरायाचार्याः | तन्त्रसारव्याख्या |

## उपनिषद्भाष्यम्

एवमेव श्रीमदानन्दतीर्थाः उपनिषदां रहस्यं, भावगर्भितार्थं प्रशयितुं सर्वेषामानुकूल्याय प्रमुखानि दश उपनिषदां भाष्याणि प्रणिन्युः। तेषां टीकाटिप्पणयः अधोलिखिताः।

### अथर्वणोपनिषद्भाष्यम्

| व्याख्यातॄणां नाम | व्याख्यानाम |
|---|---|
| १. श्रीवादिराजतीर्थाः | अथर्वणभाष्यटिप्पणी |
| २. श्रीव्यासतीर्थाः | अथर्वणभाष्यटीका |
| ३. श्रीराघवेन्द्रतीर्थाः | अथर्वणखण्डार्थः |
| ४. उमर्जिप्रह्लादकृष्णाचार्याः | अथर्वणभाष्यविवरणम् |
| ५. नृसिंहभिक्षवः | श्रुत्यर्थप्रकाशिका |
| ६. श्रीवरदाचार्याः | वरदतीर्थीया |
| ७. गूढकर्तृकः | प्रमेयसङ्ग्रहः |
| ८. श्रीविजयीन्द्रतीर्थाः | अथर्वणोपनिषद्व्याख्यानम् |
| ९. श्रीश्रीनिवासतीर्थाः | अथर्वणोपनिषद्भाष्यविवृतिः |
| १०. श्रीविद्याधीशतीर्थानां शिष्याः नरसिंहयतयः | अथर्वणखण्डार्थः |

| | |
|---|---|
| ११. आयी श्रीनरहरितीर्थाः | अथर्वणोपनिषत्खण्डार्थः |

## ऐतरेयोपनिषद्भाष्यम्

| **व्याख्यातॄणां नाम** | **व्याख्यानाम** |
|---|---|
| १. श्रीराघवेन्द्रतीर्थाः | ऐतरेयखण्डार्थः |
| २. श्रीताम्रपर्णि आचार्याः | ऐतरेयभाष्यरत्नमाला |
| ३. श्रीरामचन्द्रतीर्थाः | रामचन्द्रतीर्थीया |
| ४. श्रीवरदतीर्थाः | वरदतीर्थीया |
| ५. श्रीविश्वेशतीर्थाः | विश्वेशतीर्थीया |
| ६. श्रीमुष्णम् अनन्ताचार्याः | अनन्तभट्टीया |
| ७. श्रीकृष्णाचार्याः | कृष्णाचार्यटिप्पणी |
| ८. श्रीजयतीर्थानां शिष्याः श्रीव्यासतीर्थाः | ऐतरेयभाष्यटीका |
| ९. श्रीविजयीन्द्रतीर्थाः | ऐतरेयव्याख्यानम् |
| १०. श्रीराघवेन्द्राचार्याः | ऐतरेयव्याख्या |
| ११. श्रीवेङ्कटवराहः | ऐतरेयखण्डार्थः |
| १२. श्रीकृष्णावधूतपण्डिताः | ऐतरेयखण्डार्थः |
| १३. श्रीकम्बालूरुरामचन्द्रतीर्थाः | ऐतरेयभाष्यटीकाव्याख्यानम् |
| १४. श्रीचिक्कोडिभगवन्तरायाः | ऐतरेयखण्डार्थव्यरख्यानम् |

## तलवकारोपनिषद्भाष्यम्

| **व्याख्यातॄणां नाम** | **व्याख्यानाम** |
|---|---|
| १. श्रीवेदेशतीर्थाः | तलवकारोपनिषत्खण्डार्थः |
| २. श्रीराघवेन्द्रतीर्थाः | तलवकारोपनिषत्खण्डार्थः |

| | |
|---|---|
| ३. श्रीव्यासतीर्थाः (श्रीजयतीर्थानां शिष्याः) | |
| | तलवकारोपनिषद्भाष्यविवरणम् |
| ४. श्रीवरदाचार्याः | वरदतीर्थीया |
| ५. गूढकर्तृकः | सर्वसारसङ्ग्रहः |
| ६. श्रीविद्याधीशतीर्थाः | तलवकारोपनिषत्खण्डार्थः |
| ७. श्रीनारायणपण्डितस्य शिष्याः श्रीत्रिविक्रमदासाः | |
| | तलवकारोपनिषद्भाष्यव्याख्यानम् |
| ८. श्रीनृसिंहभिक्षवः | खण्डार्थप्रकाशकः |

## ईशावास्योपनिषद्भाष्यम्

| व्याख्यातॄणां नाम | व्याख्यानाम |
|---|---|
| १. श्रीजयतीर्थाः | विवरणम् |
| २. श्रीराघवेन्द्रतीर्थाः | ईशावास्योपनिषत्खण्डार्थः |
| ३. श्रीवरदतीर्थाः | वरदतीर्थीया |
| ४. श्रीरघुनाथतीर्थाः | टीकाविवृतिः |
| ५. श्रीविजयीन्द्रतीर्थाः | ईशावास्यव्याख्यानम् |
| ६. श्रीवादिराजतीर्थाः | ईशावास्यटिप्पणी गुर्वर्थदीपिका |
| ७. छलारि नरसिंहाचार्याः | भाष्यटिप्पणी |
| ८. श्रीश्रीनिवासतीर्थाः | ईशावास्योपनिषद्भाष्यव्याख्यानम् |
| ९. श्रीनरसिंहयतयः | ईशावास्यखण्डार्थः |
| १०. श्रीसत्यप्रज्ञतीर्थाः | ईशावास्यटिप्पणी |

## मण्डूक्योपनिषद्भाष्यम्

| व्याख्यातॄणां नाम | व्याख्यानाम |
|---|---|
| १. श्रीवदिराजतीर्थाः | मण्डूकोपनिषद्भाष्यटिप्पणी |
| २. श्रीराघवेन्द्रतीर्थाः | खण्डार्थः |
| ३. श्रीश्रीनिवासतीर्थाः | खण्डार्थः |
| ४. श्रीव्यासतीर्थाः | मण्डूक्योपनिषद्भाष्यटीका |
| ५. श्रीनिवासतीर्थाः | मण्डूक्योपनिषद्भाष्यव्याख्या पदार्थदीपिका |
| ६. श्रीवरदाचार्याः | वरदतीर्थीया |
| ७. गूढकर्तृकः | प्रमेयसङ्ग्रहः |
| ८. श्रीविजयीन्द्रतीर्थाः | मण्डूक्योपनिषद्व्याख्यानम् |
| ९. श्रीत्रिविक्रमदासाः | मण्डूक्योपनिषद्भाष्यटीका |
| १०. श्रीसत्यप्रियतीर्थाः | मण्डूक्योपनिषद्व्याख्या |

## छान्दोग्योपनिषद्भाष्यम्

| व्याख्यातॄणां नाम | व्याख्यानाम |
|---|---|
| १. श्रीव्यासतीर्थाः | छान्दोग्योपनिषद्व्याख्या |
| २. श्रीमुष्णम् अनन्ताचार्याः | अनन्तभट्टीया व्याख्या |
| ३. श्रीवेदेशतीर्थाः | छान्दोग्यभाष्यव्याख्या |
| ४. श्रीराघवेन्द्रतीर्थाः | खण्डार्थः |
| ५. श्रीविद्याधिराजतीर्थाः | छान्दोग्यभाष्यटीका |

## तैत्तिरीयोपनिषद्भाष्यम्

| व्याख्यातॄणां नाम | व्याख्यानाम |
|---|---|
| १. श्रीवादिराजतीर्थाः | तैत्तिरीयोपनिषद्भाष्यटिप्पणी |
| २. श्रीराघवेन्द्रतीर्थाः | खण्डार्थः |
| ३. श्रीनरसिंहयतयः | खण्डार्थः |
| ४. श्रीव्यासतीर्थाः (जयतीर्थानां शिष्याः) | तैत्तिरीयोपनिषद्भाष्यविवरणटीका |
| ५. श्रीश्रीनिवासतीर्थाः | तैत्तिरीयोपनिषद्भाष्यविवृतिः टीकापदार्थदीपिका |
| ६. श्रीवरदाचार्याः | वरदतीर्थीया |
| ७. उमर्जि प्रह्लादकृष्णाचार्याः | उमर्जिटिप्पणी |
| ८. गूढकर्तृकः | प्रमेयसङ्ग्रहः |

## षट्प्रश्णोपनिषद्भाष्यम्

| व्याख्यातॄणां नाम | व्याख्यानाम |
|---|---|
| १. श्रीजयतीर्थाः | षट्प्रश्नटीका |
| २. श्रीवादिराजतीर्थाः | षट्प्रश्नभाष्यटीकाटिप्पणी |
| ३. श्रीराघवेन्द्रतीर्थाः | खण्डार्थः |
| ४. बिदरहळ्ळि श्रीश्रीनिवासतीर्थाः | षट्प्रश्नोपनिषद्भाष्यटीकाटिप्पणी |
| ५. श्रीशेषाचार्याः छलारि | छलारिव्याख्यानम् |
| ६. श्रीनरसिंहाचार्याः | छलारी |
| ७. श्रीविद्याधीशतीर्थानां शिष्याः नरसिंहयतयः | षट्प्रश्नखण्डार्थः |

## बृहदारण्यकोपनिषद्भाष्यम्

| व्याख्यातॄणां नाम | व्याख्यानाम |
|---|---|
| १. श्रीरघूत्तमतीर्थाः | बृहदारण्यभावबोधः |
| २. श्रीराघवेन्द्रतीर्थाः | खण्डार्थः |
| ३. श्रीवरदतीर्थाः | वरदतीर्थीया |
| ४. श्रीव्यासतीर्थाः | बृहदारण्यकोपनिषद्व्याख्या |
| ५. श्रीविजयीन्द्रतीर्थाः | बृहदारण्यव्याख्यानम् |
| ६. श्रीमुष्णम् अनन्ताचार्याः | बृहदारण्यकोपनिषद्भावबोधसङ्ग्रहः |
| | अनन्तभट्टीया |
| ७. उमर्जि प्रह्लादकृष्णाचार्याः | बृहदारण्यकोपनिषद्भाष्यव्याख्यानम् |

## काठकोपनिषद्भाष्यम्

| व्याख्यातॄणां नाम | व्याख्यानाम |
|---|---|
| १. श्रीवदिराजतीर्थाः | काठकोपनिषद्भाष्यटिप्पणी |
| २. श्रीविजयीन्द्रतीर्थाः | काठकोपनिषद्व्याख्यानम् |
| ३. श्रीवेदेशतीर्थाः | काठकोपनिषद्भाष्यटीका |
| ४. श्रीजयतीर्थानां शिष्याः व्यासतीर्थाः | काठकटीका |
| ५. श्रीवरदाचार्याः | वरदतीर्थीया |
| ६. श्रीराघवेन्द्रतीर्थाः | खण्डार्थः |
| ७. श्रीवेदेशतीर्थाः | खण्डार्थः |
| ८. श्रीविद्याधीशतीर्थानां शिष्याः श्रीनरसिंहसूरयः | काठलखण्डार्थः |
| ९. श्रीव्यासतीर्थाः | श्रीव्यासतीर्थीया |

श्रीराघवेन्द्रतीर्थाः श्रीवेदेशतीर्थाश्च प्रायशः सकलोपनिषदां खण्डार्थं अजेखिषुः। तथापि ते खण्डार्थाः सरळसंस्कृते भाष्यानुगुणं उपनिषदां भावं प्रकाशयन्ति। अतः तेऽपि उपनिषदां टीकात्वेनैव परिगण्यन्ते। सर्वज्ञाचार्याणां मध्वाचार्याणां ग्रन्थाः असदृशाः अध्यात्ममयाः ब्ग ग्रन्थानां पद्मनाभतीर्थादारभ्य इदानीन्तनानां प्रातस्मरणीयानां विद्वच्छिरोमणीनां निशितमतीनां श्रीविश्वेशतीर्थानाम् पर्यन्तं नैके विद्वज्जनाः मान्याः मध्वभक्ताः अनेकासु भाषासु व्याचख्युः, व्याख्यान्ति, व्याख्यास्यन्ति च। तादृशविस्तृतव्याख्यागङ्गप्रवाहे केचनैव ग्रन्थबिन्दवोऽत्र प्रस्तुताः। ॐ शम् ।।

# माध्वीयम् ऋग्भाष्यम्

**आशुतोषमणित्रिपाठी**
शोधच्छात्रः
श्री.ला.श.शा.श.विश्ववियालमः
नवदेहली

वेदयन्तीति वेदाः। विद-ज्ञाने इति मूलधातोः करणार्थे निष्पन्नोऽयं शब्दः। ये वेदयन्ति ये च ज्ञापयन्ति ते वेदशब्दाभिधेया भवन्ति। एवं तर्हि कुमारसम्भवादिकाव्यानि अपि वेदयन्तीत्यतः वेदशब्दवाच्यानि इति न च वाच्यम्। असाधारण्येन व्यपदेशाः भवन्ति इति नियमात्। असाधारणविषयो नाम य इन्द्रियैरगोचरः यश्च अनुमानागम्यः यश्च पौरुषेयवाचामगोचरः तादृशं विषयं ये वेदयन्ति तान् वेदा इति कथयन्ति मनीषिणः। अस्ति च पिप्पलादश्रुतिः **''नेन्द्रियाणि नानुमानं वेदा ह्येवैनं वेदयन्ति तस्मादाहुर्वेदा''** इति।

ताश्च प्रत्यक्षानुमानाद्यगोचरं धर्मं, अधर्मं, स्वर्गं, नरकं, मोक्षं विशिष्य परमात्मानं वेदयन्तीति वेदपदाभिधेया भवन्ति। ते ऋग्यजुः सामाथर्वभेदेन चतुर्धा विभक्ताः। ते च पुनः संहिताब्राह्मणारण्य-कोपनिषद्भेदेन च चतुर्धा विभक्ताः।

ऋग्वेदस्य विषये अनेके भाष्यम् अकार्षुः। वेदभाष्यरचयिता सायणाचार्य प्रसिद्ध एव। स न केवलं ऋचां व्याख्याश्चकार किन्तु सर्वेषां वेदभागानां व्याख्याश्चकार इति आसेतुहिमाचलं प्रसिद्धं तेषां भाष्यम्।

अन्यानि न्यपि भाष्याणि तत्र तत्र प्रसिद्धानि । तत्र अन्यतमं भाष्यं श्रीमन्मध्वाचार्यविरचितं ऋग्भाष्यम् । एते च दक्षिणभारते कर्णाटकस्य उडुपिक्षेत्रस्य समीपे पाजकक्षेत्रे अवातरन् ।

ऋचां भष्यमिदम् । अवश्यं तस्य व्याख्यानं कर्तव्यम् । यः गहनार्थः स व्याख्येयो भवति । ऋग्वेदस्य ज्ञानं तु क्लिष्टम् इत्यत्र नास्ति विप्रतिपत्तिः । ''मघवन् चित्रमर्च'' इति वेदे दृश्यते । तत्र मघशब्दस्य कोऽर्थ इति जिज्ञासायां मघशब्दो मखार्थ इति लभ्यते । तथा हि ''तृतीयोऽतिशये'' इति महाव्याकरणस्य सूत्रबलाद् रूपमिदं निष्पन्नं भवति । नेदं सूत्रं पाणिनीयव्याकरणे दृश्यते । अतः अत्र चतुर्दशमाहेश्वरसूत्राणि अननुसृत्य अज, आनन्द, इन्द्र इत्यादिक्रमेणैव वर्णक्रमः भवति । तत्र यदि अकारस्थाने इकारस्य उच्चारणं क्रियते तदा अतिशयद्योतकः भवति । हरशब्दः, हरिशब्दश्च दृश्यते । हरति प्राणान्, हरत्यनिष्टम् इति च व्युत्पतिः । अस्माकमनिष्टं स्वीयनामस्मरणमात्रेण हरतिति परशिवः हरशब्दाभिधेयो भवति । संहारकर्ता इत्यभिप्रायेण हरति प्राणान् इत्यर्थे रुद्र उच्यते । हरति हरमपि इत्यभिप्रायो यदा वक्तव्यो भवति (सर्वसंहारकर्ता), तदा हरतीति हरिः इति रूपनिष्पतिः भवति । अत्र अकारस्थाने य इकारः प्रयुक्तः सोऽतिशयद्योतकः इति ज्ञायते । वेदेष्वप्येवमेव, मखशब्दः ज्ञानम् आहुतिप्रदानरूपकर्म अपि वक्ति । इज्यत्वेन मखाः अस्य सन्ति इति मखवान् इति व्युत्पत्तिः । अतिशयेन मखवान् मघवान्, तत्सम्बुद्धौ मघवन् इति शब्दनिष्पत्तिः भवति । एवमेव पाणिनीयसूत्रेषु अदृष्टानि अनेकानि सूत्राणि महाव्याकरणे

लभ्यन्ते। तेषां ज्ञानाय अवश्यं व्याख्येया इत्यतः लोकोपकाराय व्याख्याश्चकार मध्वाचार्यः ।

श्रीमन्मध्वाचार्यः समग्रस्य ऋग्वेदस्य व्याख्यां न चकार। स ऋग्वेदस्य आदिमचत्वारिंशत् सूक्तानामेव व्याख्यां चकार । तावता एव व्याख्यानेन मार्गं प्रादर्शयत्। यः पुरुषः श्रद्धया श्रीमन्मध्वाचार्यविरचितं ऋग्भाष्यमधीते धारयति च स अवशिष्टानां वेदभागनाम् अर्थकरणे समर्थो भवति । किञ्चन वाक्यं वर्तते **''बिभेत्यल्पश्रुताद् वेदः मामयं प्रचलिष्यति''** इति । अल्पज्ञः पुरुषः यदा वेदार्थकरणे प्रवर्तते तदा वेदाभिमानिदेवता एव बिभ्यति। यतो हि प्रवृतः पुरुषः स्वशिरसि विद्यमानं मदपुरि आरोपयित्वा मां नाशयति इति। ततः ग्रन्थादौ सकलदोषदूरं भगवन्तम् एवं प्रणमति मध्वाचार्यः—

**नारायणं निखिलपूर्णगुणार्णमुच्च-**
**सूर्यामिद्युतिमशेषनिरस्तदोषम् ।**
**सर्वेश्वरं गुरुमजेशनुतं प्रणम्य**
**वक्ष्यामृगर्थमतितुष्टिकरं तदस्य ।।** इति

'उच्चैः ऋचा क्रियन्ते' इत्यनेन ऋक् शब्दः ऋग्वेदे रूढ इति ज्ञायते। वेदेषु ऋग्वेदस्य प्राधान्यं स्वभाष्यादौ ज्ञापयति श्रीमन्मध्वाचार्यः। ऋग्वेदस्य एका उपनिषत् दशोपनिषत्सु अन्तर्भवति ऐतरेयोपनिषित् इति । तत्र ऋग्वेदीयोपनिषदि इदमेकं वाक्यं प्रथितम्—

**ता वा एताः सर्वा ऋचः सर्वे वेदाः सर्वे घोषा**
**एकैव व्याहृतिः प्राण एव प्राणऋच इत्येव विद्यात् ।।**

इत्येकं वाक्यं ऐतरेयारण्यके पठ्यते । सर्वा ऋचः सर्वे वेदाः सर्वे ध्वन्यात्मकाः शब्दाः एकमेव व्याहरन्ति स प्राण एव । प्रणयति सर्वम्= प्राणः इति व्युत्पत्त्या सर्वोत्तमशक्तिरित्यर्थः लभ्यते। अत्र वेदानामित्युक्त्या एव ऋचां सर्वोमापि ग्रहणे सम्भवे सर्वाः ऋचः सर्वे वेदाः इति वेदात् पृथग्ग्रहणं यद् वर्तते तद् ज्ञापयति वेदेषु ऋचां प्राधान्यं वर्तत इति । ऋग्वेदस्य व्याख्यानं भगवतः अत्यन्तं प्रियकरम्। अतः ऋचां व्याख्यां करोमीति प्रतिजानीते मध्वाचार्यः। यजुर्वेदस्य उपनिषदादिषु व्याख्याञ्चकार परन्तु साक्षात् 'इषे त्वोर्जे त्वा' इत्यादि मन्त्राणां व्याख्यां न चकार ।

अतितुष्टिकरं यतः, अतो व्याख्यां करोमि इति आरभ्य, प्रथमतः प्रणवस्य व्याख्यानं, ततः व्याहृतेः व्याख्यानं, ततश्च गायत्रीमन्त्रस्य व्याख्यानं, ततः पुरुषसूक्तस्य व्याख्यानं कृत्वा ततः ऋग्वेदस्य प्रथमसूक्तस्य व्याख्यानं प्रारभते श्रीमन्मध्वाचार्यः । कुत एवं क्रम आश्रित इति चेदित्थम् - सर्वेषां शब्दराशीनां मूलं प्रणवः । प्रकर्षेण नौति परमात्मानमिति च व्युत्पतिः। तारयत्यस्मात् संसारसागराद् इत्यभिप्रायेण तारशब्दाभिधेयोऽपि भवति प्रणवः। यथा दोहदसहिताद् बीजात् शाखोपशाखासहितः महान् वटवृक्षो जायते तद्वत् प्रणवाख्याद् वर्णबीजात् सर्वेऽपि वर्णा उद्भिन्ना इति। वेदमूलमिति प्रणवस्य नाम । एतादृशात् प्रणवात् 'भूः भुवः स्वः' इति व्याहृतिः उद्भिन्नः। अकारोकारमकारात्मकोऽयम् ओङ्कारः। तत्र अकाराद् भूरिति व्याहृतिः, उकाराद् भुवरिति व्याहृतिः, मकारात् स्वरिति व्याहृतिरिति

व्याहृतित्रयमुद्भिन्नम् । अभिव्यक्ताः इति यावत् । वर्णानां नित्यत्वस्य अभ्युपगतत्वात् ।

व्याहृतिभिः पादत्रयात्मकगायत्रीमन्त्रः अभिव्यक्तः। पादत्रयात्मकात् गायत्रीमन्त्रात् वर्गत्रयात्मकः पुरुसूक्तमन्त्रः अभिव्यक्तः । वर्गत्रयात्मकात् पुरुसूक्तमन्त्रात् वेदत्रयमुत्पन्नमिति सर्वत्र त्रित्वमनुवृत्तम्।

**ओमशेगुणाधार इति नारायणो ह्यसौ ।।**

ओंशब्दस्य अशेगुणाधार इत्यर्थः । अयमेवार्थोः नारायणशब्देनापि लभ्यते । नारायणशब्दो न केवलं रूढः न केवलं संज्ञा किन्तु नाराणां अयनमिति अर्थे यौगिकः । **''अराः दोषाः समुद्दिष्टाः''** इति कोशबलात् अरशब्दः दोषवाचक इति तु सर्वत्र प्रथित एव । एवमेव नारायणशब्दोऽपि अरविरुद्धा नाराः, तेषामयनमिति व्युत्पत्तिकः । गुणाश्रय इति यावत् । सकलगुणपूर्णता यथा प्रणवस्य अर्थः तथैव नारायणशब्दस्यापि वर्तते ।

तत्र ओङ्कारस्य कथं सकलगुणवाचकत्वमिति चेद् अस्मिन् विषये पतञ्जलिरपि व्याख्याञ्चकार । यदा अव-प्रवेशने इति धातोः कर्मणि मनिन् प्रत्ययः भवति तदा ओंशब्दो निष्पन्नो भवति । ''अथ कस्मादुच्यते'' इत्यादि श्रुतिभिः गुणैः प्रविष्टः इत्यर्थो लभ्यते ।

नारायणः गुणपूर्णः इत्यस्मात् कारणादेव नारायणशब्देन प्रथितः । ओतत्त्ववाची ओङ्कारोऽपि सकलगुणश्रयत्वमेव वक्ति अतः सोऽपि नारायणमेव प्रतिपादयति । ''प्रणवार्था हि व्याहृतयः'' इति वचनानुसारेण प्रणवस्य अर्थभूतं नारायणमेव व्याहृतयः उद्गिरन्ति ।

प्रणवस्य अ उ म् इति अक्षरत्रयस्य भूः भुवः स्वः इति व्याहृतित्रयं व्याख्यानरूपमेव इति ज्ञायते ।

भूः इत्यत्र भू बहौ इति धातुः । ''बहुः पूर्णतायाम्'' इति वचनबलात् बहुशब्दः पूर्णत्वे शक्तः । अतो भूशब्दो गुणपूर्णत्वं वक्तीति ज्ञायते । तस्य पर्यायभूतौ भूः भूर् इति अव्ययेऽपि तमेवार्थं प्रतिपादयतः ।

भुवः इत्यत्र 'भूत्या वरः' इति निर्वचनम् । अणिमादि-अश्वर्यवत्त्वात् श्रेष्ठः इति । महैश्वर्यवान्, गुणपूर्णत्वमेव ऐश्वर्यम्। भुवर् इति तु निरुक्त्या सिध्यति । सुवः इत्यत्र सुशब्दः शोभनार्थकः, वशब्दः सुखार्थकः । अनन्तसुखवान् इति यावत् । वशब्दस्य सुखार्थकत्व-मित्थम्:—

**वः पुमान् वरुणे कुम्भे विकल्पे गगने गुरौ ।**

**कलभे खगगर्भे च मदे बाल्ये च कर्मणि ।।**

इति एकाक्षरमालायां सुखार्थकत्वं प्रतिपादितं तस्य। एवं रीत्या व्याहृतयः गुणपूर्णत्ववाचकाः इत्यत एव नारायणमपि ते वदन्तीति ज्ञायते ।

गायत्रीमन्त्रोऽपि गुणपूर्णं नारायणमेव प्रतिपादयति । तदित्थम् :–

- तत् = पूर्णः, गुणपूर्ण इति यावत् ।
- सवितुः = सृष्टिकर्ता ।
- वरेण्यम्= पूज्यः, गुणपूर्णत्वात् सर्वैरपि पूज्यः ।

- भर्गः = भा = कान्तिमान्
- र = रमणः
- ग = ज्ञानस्वरूपम्
- यः नः धियः प्रचोदयात् = अस्माकं सर्वेषां सन्मार्गे बुद्धिं प्रेरयति ।

तथा च गुणपूर्णं, सृष्टिकर्तारं, पूज्यं, कान्तिमन्तं, रमणं, ज्ञानस्वरूपं, सवितृनामकरूपधारिणं नारायणं धीमहि = ध्यायेम इत्यर्थः । एवं गायत्रीमन्त्रोऽपि नारायणमेव स्तौति । अत्र धीमहि इति तु ध्यायेम इत्यस्य छान्दसरूपम्। एवं वेदस्य व्याख्यानं कृत्वा सन्मार्गं प्रादर्शयत् श्रीमन्मध्वाचार्यः ।

वेदस्य अन्तिमे एवं वाक् श्रूयते—

**सङ्गच्छध्वं संवददध्वं सं वो मनांसि जानताम् ।**

**देवा भागं यथा पूर्वे संजानाना उपासते ।।** इति

**शोधाकार्ये उपयुक्ताः ग्रन्थाः–**

ऋग्भाष्य - हयवदन पुराणिकः, अखिलभारतमाध्व महामंडल, बेङ्गलूरु.

# माध्वसिद्धान्ते जीवेश्वरभेदः

**Santhosh kumar D.S**
Research scholar[1]
Adm.no.RSVP/1062/11/2/16
DvaitaVedanta Department
National Sanskrit University
Tirupathi - 17507

सर्वे वेदा विष्णुसर्वोत्तमत्वज्ञानप्रकाशकाः । पैङ्गिश्रुतिस्तु-

[१]**सर्वे वेदा युक्तयः सुप्रमाणा ब्राह्मं ज्ञानं परमं त्वेकमेव ।**

**प्रकाशयन्ते न कुतश्चिद् विरोधो वेदेषु सर्वेषु तथेतिहासे**'' ।।

इति

परन्तु कदाचित् ''**स आत्मा तत्त्वमसि**'' इत्यादिवेदा जीवेश्वरैक्यं वदन्त इव भान्ति । तस्मादेव बहवः सिद्धान्तिनो 'भेदस्तु भ्रान्तिदृष्ट' इत्युक्त्वा जीवपरमात्मैक्यं प्रतिपादयन्ति । यद्यपि ''स-आत्मा-अतत् त्वम्-असि'' इत्येतदागमस्य पदविभागे कृते स आत्मा स एव परमात्मा अतत्त्वमसि त्वन्तु अतदसि तस्मादन्यद् वस्तु असीत्यर्थो ज्ञायत इति तस्यापि वाक्यस्य भेद एव तात्पर्यमस्ति ।

अस्यैव जीवेश्वरभेदस्य प्रतिपादनं श्रीमन्मध्वाचार्यैः सदृष्टान्तमुक्तं विष्णुतत्त्वविनिर्णये । तत्र पुत्रं श्वेतकेतुं प्रति पितोद्दालक एवमुपदिशति

---

१. श्रीमन्महाभारतान्तर्गतमोक्षधर्मपर्व तथा माध्वदर्शनम् एकं विशिष्टाध्ययनम् ।

२. ब्र.सू.भा-अ.१,पा.१,सू.१० पृ.१३

- तदेव छान्दोग्योपनिषदुक्तः [3]**नवकृत्वोपदेश** इति प्रसिद्धः । तथाहि-

**शकुनिसूत्रदृष्टान्तः- [4]स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं परित्वाऽन्यत्राऽयतनमलब्ध्वा बन्धनमेवोपाश्रयते । सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः'' ।**

प्रबद्धशकुनिवत् जीवोऽपि जाग्रदवस्थायामितस्ततो धावन्नन्ते श्रान्तो भूत्वा स्वप्नावस्थायां पारमात्मानमेवोपाश्रयते । अतो जीवानां भगवदधीनत्वं वर्तत एव। भगवदधीनत्वं नाम भेद एव ।

**वृक्षरसदृष्टान्तः-**

एवमाद्यदृष्टान्तेन जीवानां भगवदाश्रयत्वे कथितेऽपि जीवस्य ''मत्तः अन्यः अस्मिन् देहेऽस्ती''ति भेदानुभवो न भवति । तस्य परिहारार्थं द्वितीयो वृक्षरसदृष्टान्तः-

**[5]यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणां रसानां समवहारमेकतां गमयन्ति । ते यथा तत्र न विवेकं लभन्तेऽमुष्याहं वृक्षस्य रसोऽस्म्यमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सोम्येमाः सर्वाः प्रजाः सति सम्पद्य न विदुः सति सम्पत्स्यामह इति । त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तत्तदा भवन्ति'' ।**

---

३. वि.त.नि.-परि.१,पृ.२२ सर्वमूलग्रन्थाः-बन्नञ्जे गोविन्दाचार्यः

४. छा.उ.भा.- अ.६, खं.३,मं.२ पृ.४३६

५. छा.उ.भा.- अ.६, खं.३,मं.६,पृ.४३७

मधुकराः परस्परविलक्षणैर्नानावृक्षरसैर्मधु निर्मिमते । परन्तु तत्र ते नानावृक्षरसाः परस्परभेदं न जानन्ति— अमुष्याम्रवृक्षस्याहं रसोऽस्मि, अयन्त्वन्यस्य, अमुष्य पनसवृक्षस्याहं रसोऽस्मि, अयन्त्वन्यस्येति । परं तत्र तु भेदो वर्तत एव । एवमेवेमाः सर्वाः प्रजाः परमेश्वरशक्तिभिरेव स्वशरीरे विद्यमानस्यापि जीवेश्वरभेदस्य अनुभवं न प्राप्नुवन्ति ।

**नदीसमुद्रदृष्टान्तः-**

ननु नानावृक्षरसानाम् अचेतनत्वात् भेदापरिज्ञानं भवति । परन्तु जीवाश्चेतनाः । जीवस्य भेदपरिज्ञानं कथं न भवतीति शङ्कापरिहारार्थं तृतीयो नदीसमुद्रदृष्टान्तः-

[६]**इमाः सोम्य नद्यःपुरस्तात् प्राच्यः स्यन्दन्तेपश्चात् प्रतीच्यस्तास्समुद्रात् समुद्रमेवापियन्ति । समुद्र एव भवति । ता यथा तत्र न विदुरियमहमस्मीयमहमस्मीति । एवमेव खलु सोम्येमाः सर्वाः प्रजाः सत आगम्य न विदुः सत आगच्छामह इति । त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तत्तदा भवन्ति ।**

इमाः मेघादिद्वारेण समुद्रादुत्पन्नाः प्रसिद्धा गङ्गाद्या नद्यः पुरस्तात्तथा पश्चात् स्रवन्ति। अन्ते समुद्रमेव प्रविशन्ति । तत्र अभिमानिन्यः नदीदेवतास्तत्र समुद्रे, अहं गङ्गास्मि, इयन्तु यमुनेति भेदं न विदुः । परन्त्वत्र परस्परभेदोऽस्त्येव । एवमेव जीवा अपि जीवेश्वरयोर्भेदं न विदुः ।

---

६. छा.उ.भा.- अ.६, खं.३,मं.८ पृ.४३८

**वृक्षजीवदृष्टान्तः-**

ननु जीवेश्वरयोर्भेदे सत्यपि जीवस्य परमेश्वराधीनत्वं कुतः? इति संशयनिवारणार्थं चतुर्थो वृक्षचेतनदृष्टान्तः- [7]**स एष जीवेनात्मनाऽनुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति । अस्य यदैकां शाखां जीवो जहाति । अथ सा शुष्यति ।**

महतो वृक्षस्य मूले, मध्ये तथाऽग्रे हनने कृते तत्र परमात्माधिष्ठितश्चेत्तदा रसमेवोद्गिरेत् । न तु म्रियेत । तत्र परमात्मनोऽधिष्ठानं न वर्तते चेदेकशाखायाश्छेदनादेव वृक्षो म्रियेत । अनेनेदमुक्तं भवति— कदाचिदीश्वरानुग्रहाभावे बाह्यकारणबलवत्वाभावेऽपि शरीरशोषणत्यागाद्यनिष्टं भवति । एवं मानुषशरीरेऽपि जीवस्येश्वराधीनत्वं ज्ञातव्यमिति ।

**न्यग्रोधवृक्षबीजदृष्टान्तः-**

ननु जीवस्य सत्तादिप्रदः परमात्माऽत्रैव शरीरे वर्तमानो जीवेन कुतो न दृश्यते सौक्ष्म्यादिति चेन्न । सूक्ष्मस्वात्मदर्शिनो जीवस्य सूक्ष्मदर्शनशक्तिसद्भावादिति संशयः । अस्य परिहारोऽनेन दृष्टान्तेन क्रियते-

[8]**न्यग्रोधफलमत आहरेति । इदं भगव इति । भिन्धीति । भिन्नं भगव इति । किमत्र पश्यसीति। अण्व्य इमा धाना भगव इति । आसामङ्ग एकां भिन्धीति । भिन्ना भगव इति । किमत्र पश्यसीति**

७. छा.उ.भा.- अ.६, खं.३,मं.१० पृ.४३८

८. छा.उ.भा.- अ.६, खं.३,मं.१२ पृ.४३८

**न किञ्चन भगव इति । तं होवाच यं वै सोम्य एतमणिमानं न निभालयसेऽस्य सोम्यैषोऽणिम्न एवं महान् न्यग्रोधस्तिष्ठति ।**

यथा न्यग्रोधफलमाहृत्य तस्य छेदनं कृत्वा पश्यामः तत्र बीजानि दृश्यन्ते । तत्राप्येकं बीजं स्वीकृत्य छेदनं कृत्वा पश्यामः तत्र किञ्चन न दृश्यते । तत्र तु महान्न्यग्रोधवृक्षः सूक्ष्मरूपेण वर्तत एव । एवमस्माकं सूक्ष्मदर्शनशक्तिसद्भावेऽपि परमसूक्ष्मस्य बीजमध्यस्थन्यग्रोधवृक्षस्य दर्शनसामर्थ्यं नास्ति । तथैव जीवस्य सूक्ष्मदर्शनशक्तिसद्भावेऽपि परमसूक्ष्मस्य परमात्मनो दर्शनशक्तिर्न वर्तते ।

**लवणजलदृष्टान्तः-**

ननु परमसूक्ष्मस्येश्वरस्य प्रत्यक्षाभावेऽपि वटावस्थादिना कार्येण-ेश्वरसामर्थ्यं तावत् प्रत्यक्षमिव दृश्यते । एवं तत्सामर्थ्ये दृश्यमानेऽपि तस्यादर्शनमित्येतत् कथमिति संशयः । सः परिह्रियतेऽनेन दृष्टान्तेन-

[९]**लवणमेतदुदकेऽवधाय मा प्रातरुपसीदथा इति । तद्ध तथा चकार । तं होवाच । यद्दोषा लवणमेतदुदकेऽवधा अङ्ग तदाहरेति । तद्धावमृश्य न विवेद । यथा विलीनमेवाङ्गस्यान्तादाचामेति । कथमिति । लवणमिति । मध्यादाचामेति । कथमिति । लवणमिति । अन्त्यादाचामेति । कथमिति । लवणमिति । अभिप्रास्यैतदथ मा उपसीदथा इति । तद्ध तथा चकार तच्छश्वत् संवर्तते । तं होवाचात्र वाव सोम्येतमणिमानं न निभालयसे अत्रैव किलेति ।**

---

९. छा.उ.भा.- अ.६, खं.३,मं.१३ पृ.४३९

यथा लवणमुदकेऽवधाय स्वल्पसमयानन्तरं पश्यामः तत्र लवणं न दृश्यते। परन्तु तत्र पूर्वात्, मध्यात् तथाऽन्तात् जलभागादाचमनं कृतश्चेज्जलं लवणरसोपेतमिति अनुभवो भवति। एवं लवणगुणे दृश्यमानेऽपि न लवणं दृश्यते। तथैव परमात्मनः सामर्थ्ये दृश्यमानेऽपि न परमात्मा दृश्यते।

**गन्धारपुरुषदृष्टान्तः-**

ननु अविद्यापटलपिहितनयनेन हरिः कथं दृश्यते प्राप्यते चेति जिज्ञासायामयं गन्धारपुरुषदृष्टान्तः-

[१०]**यथा सोम्य पुरुषं गन्धारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने विसृजेत्।**

यथा चोरो धनिकं गन्धारसंज्ञकेभ्यो जनपदेभ्योऽक्षिणी बद्ध्वा ततोऽनन्तरं जनरहितेऽरण्ये विसृजेत्, स विसृष्टः सर्वदिगभिमुखमुच्चैः शब्दं कुर्यात्। तदा तद्वाक्यं श्रुत्वा कश्चित् कृपावान् 'अस्यां दिशि गन्धाराः सन्ति' इति प्रब्रूयात्। स तेनोपदिष्टात् ग्रामात् निर्गम्यापरं ग्रामं गत्वा तत्र पण्डितं प्राज्ञं मेधाविनं पृष्ट्वाऽन्ते गन्धारदेशं प्राप्नोति। तथैवानाद्यविद्यादिभिराच्छादितनिजज्ञानो जीवः, संसारे पतितः परमेश्वरानुग्रहाद् जातजिज्ञासः गुरूपदेशं लब्ध्वा क्रमापन्नानि श्रवाणादीनि साधनान्यनुष्ठाय स्वजन्मभूमिं भगवन्तं पश्यति प्राप्नोति।

**अज्ञप्राणादिनियामकदृष्टान्तः-**

१०. छा.उ.भा.- अ.६, खं.३,मं.१४ पृ.४३९

ननु जीवस्य वृक्षशरीरे भगवदधीनत्वमवगतम् । मानुषशरीरे तत्कथमिति जिज्ञासायामयमङ्गप्राणादिनियामकदृष्टान्तः— [११]**अथ यदाऽस्य वाङ् मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायां तावन्न विजानाति ।**

यदा रोगिणं पुरुषं ज्ञातयः परित उपविश्य 'जानासि मां जानासि माम्' इति पृच्छन्ति । यदि तस्य पुरुषस्य वागभिमानिन्युमा मनोभिमानिरुद्रे, रुद्रः प्राणाभिमानिवायौ, वायुस्तेजोभिमानिलक्ष्म्यां, लक्ष्मीः परस्यां देवतायां विष्णौ ग्रस्तव्यापारा न भवति तावत् स जानाति । यदि ते ग्रस्तव्यापारा भवन्ति तदा स रोगी न तान् बन्धून् जानाति । एवं मनुष्यशरीरेऽपि जीवस्य भगवदधीनत्वं वर्तते।

**स्तेनापहार्यदृष्टान्तः-**

एवं सर्वप्रेरकं महानुभावं भगवन्तं योऽत्यन्तभेदेन जानाति यश्च स एवाहमस्मीति जानाति तयोः कीदृशं फलं भवतीति ज्ञापनार्थमयं स्तेनापहार्यदृष्टान्तः-[१२]**पुरुषं सोम्योत हस्तगृहीतमानयन्ति, अपहार्षीत् स्तेयमकार्षीत् परशुमस्मै तपतेति । स यदि तस्य कर्ता भवति तत एवानृतमात्मानं कुरुते सोऽनृताभिसन्धोऽनृतेनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यतेऽथ हन्यते । अथ यदि तस्याकर्ता भवति तत एव सत्यमात्मानं कुरुते । स सत्याभिसन्धः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स न**

---

११. छा.उ.भा.- अ.६, खं.३,मं.१५ पृ.४३९

१२. छा.उ.भा.- अ.६, खं.३,मं.१६ पृ.४४०

**दह्यतेऽथ मुच्यते । एवमेव खलु सोम्य आचार्यवान् पुरुषो वेद ।**

राजद्रव्येऽपगते सति शङ्कास्पदं पुरुषमानयन्ति राजभटाः 'अयं स्तेयमकार्षीदि'ति वदन्तः । ततस्तेन पुरुषेण नेदं मया कृतमित्युक्ते भटान् प्रति राजा 'अस्य परीक्षार्थं परशुं तपत' इति आदिशति । स पुरुषो यदि चौर्यं कृत्वाऽपि नेदं मया कृतमित्युक्तवान् चेत् स परशुना दह्यते । स यदि तस्याकर्ता भवेत् स सत्याभिसन्धः परशुना न दह्यते । अथ एवं यो भेदसद्भावेऽपि 'स आत्मा अहमेवास्मी'ति विजानाति स दह्यतेऽन्धन्तमः प्रविशति। यश्च भगवन्तं भेदेन जानाति स न दह्यते, अपि तु मुच्यते मोक्षमाप्नोतीत्यर्थः ।

एवं शकुनिसूत्रयोः, नानावृक्षरसानां, नदीसमुद्रयोः, जीववृक्षयोः, अणिमाधानयोः, लवणोदकयोः, गन्धारपुरुषयोः, अज्ञप्राणादिनियामकयोः, स्तेनापहार्ययोरैक्यं न वर्तते । एवं स्थाननवकेऽपि भेद एव दृष्टान्ता अभिहिताः । नत्वेकोऽपि दृष्टान्तोऽभेदविषयोऽभिहितः । गृहादागतस्य गृहे प्रविष्टस्य च गृहस्यैक्यं न वर्तते । तदुक्तं श्रीमन्महाभारतमोक्ष-धर्मपर्वण्यपि-

**[१३]''ऐकात्म्य नाम कश्चिद्धि कदाचिदभिपद्यते ।**
**शास्त्रं ह्यबुद्ध्वा तत्त्वेन केचिद्वादबलाज्जनाः ।।**
**कामद्वेषाभिभूतत्वादहङ्कारवशङ्गताः ।**
**याथातथ्यमविज्ञाय शास्त्राणां शास्त्रदस्यवः ।।**
**ब्रह्मस्तेनानिरारम्भा अपक्वमनसोऽशिवाः ।**

---

१३. म.भा.शा.प-अ.२७५,श्लो.५१-५४

**नैर्गुण्यमेव पश्यन्ति न गुणाननुयुञ्जते ।।**

**तेषां तमश्शरीराणां तम एव परायणम्''।। इति ।**

भेदपराणां वाक्यानां याथार्थ्यमविज्ञाय शास्त्राण्यतत्त्वावेदकानीति मन्यमानाः, जीवब्रह्मणोस्तत्त्वतो निर्गुणत्वमेव पश्यन्तः सार्वज्ञादीन् गुणान् तत्स्वरूपेण न योजयन्ति। एवम्भूतानां तमोगुणप्रचुरशरीराणां तमोनामनरकविशेष एव प्राप्य इति जीवात्मैक्यनिषेधः कृतः । अतो जीवात्मपरमात्मनोर्मध्ये भेदो वर्तत एव । एवं श्रीमन्मध्वाचार्यैः यः पञ्चभेदः समर्थितः स एव शास्त्रसम्मतः ।

**उपयुक्तग्रन्थसूची-**


१. महाभारतशान्तिपर्व -टि.आर.कृष्णाचार्यः निर्णयसागरप्रेस्, पूना -१९१४

२. महाभारतलक्षालङ्कारः - महाभारतसंशोधनप्रतिष्ठाम्, बेङ्गलूरु.- २००४

३. महाभारतशान्तिपर्वनीलकण्ठीयव्याख्या - शंकरू नरहरिजोशी चित्रशालाप्रेस्.- १९२९

४.सर्वमूलग्रन्थाः-अखिलभारतमाध्वमहामण्डलम्(सम्पादकः बन्नञ्जेगोविन्दाचार्यः)१९६९

# मध्वाचार्य का पुराणों के प्रति वैशिष्ट्य : ब्रह्मसूत्र चतुःसूत्री के आलोक में

**मानसी (शोधच्छात्रा)**
संस्कृत एवं प्राच्यविद्या अध्ययन संस्थान,
जवाहरलाल नेहरू विश्वविद्यालय, नई दिल्ली-६७

भारत की समृद्ध ज्ञानपरम्परा के आधारभूत स्रोत वैदिक साहित्य, इतिहास ग्रन्थ एवं धर्मशास्त्र हैं जिनमें वेद, ब्राह्मण, आरण्यक, उपनिषद, वेदाङ्ग, सूत्र, रामायण, महाभारत, श्रीमद्भगवद्गीता, पुराण एवं स्मृति प्रमुख हैं। प्रमुख भारतीय साहित्यों में ऐतिहासिक, सांस्कृतिक महत्त्व एवं भक्तिपरक ग्रन्थों के रूप में पुराणों का विशिष्ट स्थान है। उपनिषद में वेद के साथ ही पुराण को ब्रह्म का निःश्वास बताया गया है[१]। भारत के प्राचीन तथ्यों, सिद्धान्तों, दर्शन और नैतिक मूल्यों को समझने के लिए पुराण सर्वाधिक उपकारक हैं। भक्तिमार्ग के अनुगामी, वैष्णव परम्परा के पोषक, पूर्णप्रज्ञ एवं आनन्दतीर्थ के नाम से प्रख्यात मध्वाचार्य का प्रस्थानत्रयी ग्रन्थ-लेखन परम्परा में एक विशिष्ट स्थान है जिन्होंने 'पूर्णप्रज्ञभाष्य' नाम से प्रसिद्ध अपने वेदान्तसूत्रभाष्य के माध्यम से शङ्कराचार्य के मायावाद का खण्डन कर स्वतन्त्र रूप से विशुद्ध द्वैतवाद के सिद्धान्त को प्रतिष्ठित किया हैं। मध्व ने पुराण एवं

१. बृहदारण्यकोपनिषद २.४.१०

स्मृति वाक्यों के आधार पर ईश्वर और जीव के मध्य विशुद्ध द्वैत को स्वीकार करते हुए पाँच प्रकार के भेदों को माना है : १- ब्रह्म और जीव का भेद, २- ब्रह्म और जड का भेद, ३- जीव और जड का भेद, ४- जीवों का परस्पर भेद एवं ५- जड पदार्थों का परस्पर भेद[२] ।

८-९ वीं शताब्दी में जैन एवं बौद्ध मतों का खण्डन करके आचार्य शङ्कर ने वैदिक धर्म को प्रतिष्ठित किया था किन्तु १३वीं शताब्दी के कालखण्ड तक धर्म के क्षेत्र में उत्पन्न विसंगतियों और अन्धविश्वास के कारण श्रुतिवाक्यों और स्मृतिवाक्यों का भी प्रचलन नहीं था। तथा पुराणवाक्य भी तिरस्कृत हो चुके थे। शङ्कराचार्यजी ने निर्गुण, निर्विशेष एवं विशुद्ध ब्रह्म की सत्ता को सिद्ध कर जगत के मिथ्यात्व का प्रतिपादन किया और रामानुजाचार्यजी ने भक्ति सिद्धान्तों के पोषणार्थ विशिष्ट तत्त्व के रूप में विष्णु के स्वरूप को प्रतिपादित किया। वैष्णव परम्परा का अनुगमन करते हुए मध्वाचार्य ने वेद एवं स्मृतिशास्त्रों में वर्णित तत्त्वों का पुराणों में आलोढन करके तत्सम्बन्धी विषयों को प्रकृष्ट रूप से जनमानस के समक्ष पुनस्थापित किया, जिससे लोगों के हृदय में पुराणों के प्रति श्रद्धा भाव का उदय हुआ। वैष्णवाचार्यों ने शङ्कराचार्य के अद्वैतवाद और मायावाद का विरोध करके ज्ञान के स्थान

---

२. असत्यः स्वगतो भेदो विष्णोर्न्नान्यदसत्यकम् ।
जगत्प्रवाहः सत्योऽयं पञ्चभेदसमन्वितः ॥
जीवेशयोर्भिदा चैव जीवभेदः परस्परम् ।
जडेशयोर्ज्जडानां च जडजीवभिदा तथा ॥

महाभारततात्पर्यनिर्णय, १.६९-७०

पर भक्ति तथा ब्रह्म के स्थान पर सविशेष ईश्वर की सत्ता को अङ्गीकार किया। वैष्णव मत में जीव द्वारा अनुभूत यथार्थ सुखानुभूति ही मोक्ष है और मोक्ष का साधन भक्ति है। आचार्य मध्व का मत है कि व्यावहारिक अनुभव को असत्य नहीं ठहराया जा सकता है अर्थात् जीव और ईश्वर दोनों ही सत्य है किन्तु ईश्वर स्वतन्त्र और जीव परतन्त्र है। तथा सृष्टि की सम्पूर्ण गति उसके द्वारा ही संचालित और नियन्त्रित होती है।[३]

वेदान्तशास्त्र में प्रस्थानत्रयी के अन्तर्गत चतुःसूत्री सर्वप्रसिद्ध है। प्रस्तुत शोधपत्र में ब्रह्मसूत्र चतुःसूत्री के परिप्रेक्ष्य में मध्वाचार्य का पुराणों के प्रति उनके अवदान एवं वैशिष्ट्य को स्पष्ट करना है। मध्वाचार्य ने ब्रह्मसूत्र पर लिखित अपने भाष्य में प्रतिपादित तर्क, चिन्तन और श्रुतिप्रमाणों को पुष्ट करने के लिए स्वतन्त्र रूप से तीन प्रमुख ग्रन्थों अनुव्याख्यान, न्यायविवरण एवं अणुभाष्य का प्रणयन किया, जिनमें 'अनुव्याख्यान' सर्वाधिक लोकप्रिय है। सर्वदर्शनसंग्रह में श्रुतिप्रमाण के साथ द्वैत सिद्धान्त का समर्थन किया गया है।[४] मध्वाचार्य के प्रमुख सिद्धान्तों में जगत् की सत्यता, जीवों के मध्य

---

३. स्वतन्त्रं परतन्त्रञ्च प्रमेयं द्विविधं मतम्।
स्वतन्त्रो भगवान् विष्णुः निर्दोषोऽशेषसद्गुणः ।।

तत्त्वविवेक १, पृ. १०७६

४. सत्य आत्मा, सत्यो जीवः, सत्यं भिदा सत्यं भिदा
सत्यं भिदा मैवारुण्यो मैवारुण्यो मैवारुण्यः।

सर्वदर्शनसंग्रह, पृ. १३१

परस्पर भेद और हरि की सर्वोत्कृष्टता है। ब्रह्मसूत्र का व्याख्यान करते हुए आचार्य मध्व ने देवाधिदेव एवं सविशेष ब्रह्म के रूप में विष्णु का स्मरण किया है एवं सविशेष ब्रह्म की उपासना पर बल दिया है। मध्वाचार्य का मत है कि वेद का समस्त तात्पर्य विष्णु ही है।[५] अतः आचार्य का पुराणों के प्रति वैशिष्ट्य को स्पष्ट करने के लिए निम्न बिन्दु दृष्टव्य हैं-

* मध्व का लक्ष्य साधन सविशेष विष्णु है और पुराणों में सविशेष विष्णु से सम्बन्धित विवेचित विषयों का प्राधान्य है।

* मध्व के कालखण्ड में साधारण जनों के सामान्य जीवन में संस्कृतनिष्ठ श्रुतिवाक्यों के गहन अर्थों का सहज बोध कर पाना अत्यन्त कठिन था, किन्तु कथाओं एवं दृष्टान्तों से पूर्ण पुराण में लोक विषयों का आधिक्य होने से पुराण सामान्यजन के लिए सहज और बोधगम्य हैं।

मोक्ष का साधन भक्ति है। विग्रह-आराधन, भगवद्भक्ति और सेवा-शुश्रुषा के सिद्धान्तों का प्रधानतया प्रतिपादन पुराणों में वर्णित हैं।

मध्व को उपर्युक्त तीनों बिन्दु अभिलषित हैं और तीनों बिन्दुओं का प्राधान्य पुराणों में है। मध्वाचार्य ने वेद और उपनिषदों में प्रसिद्ध

---

५. ततोऽनन्तगुणो विष्णुर्न कश्चित् तत्समः सदा।
इत्यादि वेदवाक्यं विष्णोरुत्कर्षमेव वक्त्युच्चैः।
महाभारततात्पर्यनिर्णय, १.७४-७५

विशिष्ट गुणों से युक्त विष्णु के स्वरूप को भी स्वीकार किया है। इसीलिए आचार्य ने इन सभी बिन्दुओं को समायोजित करके समस्त श्रुतिवाक्यों का तात्पर्य विष्णु में ही व्यक्त करने के लिए श्रुतिवाक्यों व स्मृतिवाक्यों के साथ पुराणवाक्यों का यथावसर समन्वय प्रदर्शित किया हैं।

बादरायणकृत ब्रह्मसूत्रों पर प्राप्त भाष्यों में मध्वाचार्य का भाष्य सबसे सङ्क्षिप्त है। एक ही सूत्र के अन्तर्गत विविध श्रुति-स्मृति समन्वित पौराणिक सन्दर्भों के प्राचुर्य को देखकर आचार्य मध्व का पुराणों के प्रति विशिष्ट ज्ञान और समन्वयात्मक शैली का परिचय प्राप्त होता है जो पुराणों के अध्ययन-अध्यापन के महत्त्व और पुराणविहित ज्ञान के संरक्षण-संवर्धन के प्रति उनके अवदान को ही स्पष्ट करता है। ब्रह्मसूत्रमाध्वभाष्य में पदे-पदे विष्णु ही ब्रह्म के रूप में वर्णित हैं। अतः भक्तिमार्ग के साधकों के लिए यह भाष्य भाषा एवं विषय-विवेचन की दृष्टि से सहज है।

---

६. आनन्तर्येऽधिकारस्य मङ्गलार्थे तथैव च।
अथशब्दस्त्वतः शब्दो हेत्वर्थे समुदीरितः॥
ओङ्कारश्चाथशब्दश्च तस्मात् प्राथमिकौ क्रमात्।
तद्धेतुत्वं वदंश्चापि तृतीयोऽत उदाहृतः॥ पूर्णप्रज्ञभाष्य,
(गरुडपुराण का वाक्य 'अथातो ब्रह्मजिज्ञासा' की सूत्रव्याख्या में उद्धृत, ललितकृष्ण गोस्वामी, प्रथम संस्करण, सं. २०३१ ), पृ. ३

७. अन्त्यजा अपि ये भक्ता नामज्ञानाधिकारिणः।
स्त्रीशूद्रब्रह्मबन्धूनां तन्त्रज्ञानेऽधिकारिता॥

मध्वाचार्य ने ब्रह्मसूत्र के प्रथम सूत्र 'अथातो ब्रह्मजिज्ञासा' में पठित 'अथ' एवं 'अतः' पदों का अर्थ स्पष्ट करने के लिए गरुड पुराण से[६], अधिकारी और साधन-चतुष्टय सम्पत्ति के निरूपण में भागवत तन्त्र, व्योम संहिता[७] तथा नारद पुराण[८] के साथ-साथ श्रुति से भी प्रमाण दिए हैं। वेदान्तसार में साधन-चतुष्टय सम्पन्न प्रमाता को अधिकारी कहा गया है। मध्वाचार्य ने पुराणों से श्रुतिविशेष अर्थ को ग्रहण करके ही साधनचतुष्टय-सम्पत्ति और अधिकारी का निरूपण किया है। ब्रह्मजिज्ञासा के सन्दर्भ में आचार्य ने बृहत्संहिता से प्रमाण उद्धृत करते हुए अपना मन्तव्य स्पष्ट किया है कि सूत्र में स्थित पदों और वाक्यों का साक्षात् अर्थ यदि अभिधा वृत्ति से प्राप्तव्य हो, तो उस अर्थ का ही ग्रहण करना चाहिए। जहाँ संभव न हो, वहाँ अन्य अर्थ की कल्पना करना अनुचित है[९] अर्थात् माध्व-मत में 'ब्रह्मजिज्ञासा'

---

एकदेशे परोक्ते तु न तु ग्रन्थपुरस्सरे।
त्रैवर्णिकानां वेदोक्ते सम्यग् भक्तिमतां हरौ ।। पूर्णप्रज्ञभाष्य
(व्योमसंहिता का वाक्य,'अथातो ब्रह्मजिज्ञासा' की सूत्रव्याख्या में उद्धृत), पृ. ६

८. श्रवणं मननं चैव ध्यानं भक्तिस्तथैव च।
साधनं ज्ञानसम्पत्तौ प्रधानं नान्यदिष्यते ।। पूर्णप्रज्ञभाष्य,
(नारदपुराण का वाक्य, 'अथातो ब्रह्मजिज्ञासा' की सूत्रव्याख्या में उद्धृत), पृ. ७

९. यत्रानवसरोऽन्यत्र पदं तत्र प्रतिष्ठितम्।
वाक्यं वेति सतां नीतिः सावकाशे न तद् भवेत् ।। पूर्णप्रज्ञभाष्य,
(बृहत्संहिता का वाक्य, 'अथातो ब्रह्मजिज्ञासा' की सूत्रव्याख्या में उद्धृत), पृ. ६

पद में निर्दिष्ट 'ब्रह्म' पद विष्णु के लिए ही प्रयुक्त है[१०] । अपने मत के समर्थन में मध्व भाल्लवेय श्रुति से प्रमाण उद्धृत करते हैं कि इस नामरूपात्मक जगत् में सब कुछ परम ब्रह्म विष्णु से ही उत्पन्न हुआ है ।[११]

शाङ्कराचार्य मत में ब्रह्म के अखण्ड स्वरूप की अनुभूति ही मोक्ष है[१२] किन्तु द्वैत वेदान्त में भक्ति ध्यानरूप है और नारायण के परम अनुग्रह से ही मोक्ष की प्राप्ति होती है । आचार्य शङ्कर ने स्वयं भक्ति को मुक्ति का साधन माना है ।[१३] पुराणों में भक्तिमार्ग के असंख्य सिद्धान्त प्रतिपादित हैं । सम्भवतः मध्वाचार्य ने उक्त विषय को केन्द्र में रखकर पुराणों को आश्रित करके वेदान्तसूत्र पर भाष्य किया और भागवत

---

१०. ब्रह्मशब्दश्च विष्णावेव । ब्रह्मसूत्रपूर्णप्रज्ञभाष्य, ('अथातो ब्रह्मजिज्ञासा' की सूत्रव्याख्या में उद्धृत), पृ. ८

११. नामानि विश्वाअभिनि न सन्ति लोके यदाविरासीदनृतस्य सर्वम् ।
नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ति ।। पूर्णप्रज्ञभाष्य, (भाल्लवेय श्रुतिवाक्य, 'अथातो ब्रह्मजिज्ञासा' की सूत्रव्याख्या में उद्धृत), पृ. ८

१२. ब्रह्मभावश्च मोक्षः । ब्रह्मसूत्र शाङ्करभाष्य, १.१.४

१३. मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी ।
स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते ।। विवेक-चूडामणि, ३२

१४. परं पदं वैष्णवमामनन्ति । श्रीमद्भागवत पुराण, द्वादश स्कन्ध, अध्याय ६.३२.
ओमिति ब्रह्म । ओंनाम भगवान्विष्णुरधिकोच्चगुणत्वतः । तैत्तिरीयोपनिषद्भाष्य (मध्वाचार्य), १.१९, पृ. ६३३

पुराण, विष्णुपुराण आदि में वर्णित शंख, चक्र एवं कमल चिन्ह के लक्षणों से सुशोभित सगुण विष्णु का स्वरूपाख्यान पुराण वचनों एवं श्रुतिवाक्यों के समन्वय से किया है।[१४]

आचार्य मध्व के अनुसार वैदिक सूक्तों में विष्णु के अतिरिक्त प्रयुक्त सभी संज्ञाएँ मुख्य रूप से विष्णु के ही सर्वोच्च अर्थ का प्रतिपादन करती हैं। वैदिक रुद्र-सूक्त भी एकमात्र विष्णु को ही सूचित करता है। मध्वाचार्य का मत है यद्यपि रुद्र सूक्त शिव के सन्दर्भ में भी पठित है जिससे वैदिक शैववाद अपना आधार स्थापित करता है किन्तु मुख्यतया रुद्रसूक्त की व्याख्या वैष्णव व्याख्या के अनुकूल है। मध्वाचार्य ने 'अम्भृणी सूक्त' के मन्त्र को प्रमाण रूप में प्रयुक्त करते हुए स्पष्ट किया है कि 'यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्'[१५] मन्त्रांश में 'उग्र' का अर्थ 'रुद्र' है और 'अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वन्तस्समुद्रे'[१६] मन्त्रांश में 'समुद्रेऽन्तः' शब्द 'नारायण' का वाचक है तथा ये शब्द प्रसिद्धि और सूचक होने से उक्त अर्थ का ही प्रतिपादन करते हैं। इसके अतिरिक्त मध्वाचार्य ने वाराह और ब्रह्मवैवर्त्त पुराण से प्रमाण देते हुए यह स्पष्ट किया है कि रुद्र संज्ञा

१५. ऋग्वेद, १०.१२५.५, (ब्रह्मसूत्रपूर्णप्रज्ञभाष्य, 'अथातो ब्रह्मजिज्ञासा' की सूत्रव्याख्या में उद्धृत), पृ० ९

१६. ऋग्वेद, १०.१२५.७, (पूर्णप्रज्ञभाष्य, 'अथातो ब्रह्मजिज्ञासा' की सूत्रव्याख्या में उद्धृत) पृ० ९

१७. एष मोहं सृजाम्याशु यो जनान् मोहयिष्यति ।
त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय ॥

से भी विष्णु के देवत्व को प्रतिपादित किया गया है एवं विष्णु के अतिरिक्त जो ब्रह्म का प्रयोग शिव आदि देवताओं के लिए किया गया है वह तो भगवान की लीलामात्र है।[१७] इस सन्दर्भ में मध्वाचार्य ने एक न्याय का उल्लेख किया है 'न च प्रसिद्धार्थं विनाऽन्योऽर्थो युज्यते'[१८] अर्थात् प्रसिद्ध अर्थ को छोडकर अन्य अर्थ की कल्पना नहीं करनी चाहिए, जब तक विरोध की स्थिति उत्पन्न न हो। उनके मत में वेद, रामायण, महाभारत, पुराण एवं अन्य शास्त्रों के आदि, मध्य और अन्त में विष्णु का ही गुणानुवाद किया गया है।[१९]

**'जन्माद्यस्य यतः'** सूत्रार्थ का परिशीलन करने पर ज्ञात होता है कि इस सूत्र में मध्वाचार्य ने जगत्कारणादि के रूप में ब्रह्म का लक्षण

---

अतथ्यानि वितथ्यानि दर्शयस्व महाभुज।
प्रकाशं कुरु चात्मानं अप्रकाशं च मां कुरु।। पूर्णप्रज्ञभाष्य,
(पद्मपुराण, उत्तरखण्ड, खण्ड-६, अध्याय ७१.१०८-१०९, 'अथातो ब्रह्मजिज्ञासा' की सूत्रव्याख्या में उद्धृत), पृ.९
नाहं न च शिवोऽन्ये च तच्छक्तयेक्त्येकांशभागिनः।
बालः क्रीडनकैर्यद्वत् क्रीडतेऽस्माभिरच्युतः।। पूर्णप्रज्ञभाष्य,
(ब्रह्मवैवर्त्तपुराण का वाक्य, 'अथातो ब्रह्मजिज्ञासा' की सूत्रव्याख्या में उद्धृत), पृ. १०

१८. पूर्णप्रज्ञभाष्य, ('अथातो ब्रह्मजिज्ञासा' की सूत्रव्याख्या में उद्धृत), पृ० ८

१९ वेदे रामायणे चैव पुराणे भारते तथा।
आदावन्ते च मध्ये च विष्णुस्सर्वत्र गीयते।। पूर्णप्रज्ञभाष्य,
(हरिवंशपुराण का वाक्य, 'अथातो ब्रह्मजिज्ञासा' की सूत्रव्याख्या में उद्धृत), पृ० ९

किया है और जगत्-उत्पत्ति, स्थिति, प्रलय, नियति, ज्ञान, अज्ञान, बन्ध और मोक्ष के एकमात्र कर्त्ता हरि अर्थात् विष्णु को ही बताया है जिसमें स्कन्द पुराण[20] एवं श्रुतिवाक्यों[21] से प्रमाण प्रस्तुत कर ब्रह्म का लक्षण करते हुए शास्त्रप्रमाणकत्व को स्वीकारा है। ब्रह्म के जगत् जन्मादि के कारणरूप में भी आचार्य मध्व ने पुराण वाक्यों के साथ श्रुति का समन्वय प्रदर्शित कर श्रुतिवाक्यों के अर्थ का समन्वय विष्णु में ही किया है।

**'शास्त्रयोनित्वात्'** सूत्र की व्याख्या में मध्वाचार्य कूर्मपुराण[22] से

---

२०. उत्पत्तिस्थितिसंहारा नियतिर्ज्ञानमावृतिः।
बन्धमोक्षौ च पुरुषाद् यस्मात् स हरिरेकराट्।। पूर्णप्रज्ञभाष्य,
(स्कन्दपुराण का वाक्य, 'जन्माद्यस्य यतः' सूत्रव्याख्या में उद्धृत), पृ. १०

२१. यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत् प्रयन्त्यभिसंविशन्ति, तद् विजिज्ञासस्व, तद् ब्रह्मेति ।
तैत्तिरीयोपनिषद, ३.१.१ । यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा । ऋग्वेद १०.८२.३
परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति ।
न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमाप ।। ऋग्वेद ७.९९.१
(पूर्णप्रज्ञभाष्य, 'जन्माद्यस्य यतः' सूत्रव्याख्या में उद्धृत), पृ. १०-११

२२. श्रुतिसाहाय्यरहितम् अनुमानं न कुत्रचित् ।
निश्चयात् साधयेदर्थं प्रमाणान्तरमेव च ।।
श्रुतिस्मृतिसहायं यत् प्रमाणान्तरमुत्तमम् ।
प्रमाणपदवीं गच्छेत् नात्र कार्या विचारणा ।। पूर्णप्रज्ञभाष्य, (कूर्मपुराण का वाक्य, 'शास्त्रयोनित्वात्' सूत्रव्याख्या में उद्धृत), पृ० ११-१२

प्रमाण की यह परिभाषा उद्धृत करते हैं कि श्रुति ही तत्त्व का निर्णय करती है, तत्पश्चात् अन्य सभी प्रमाण की सार्थकता सिद्ध होती है। श्रुति और स्मृति की सहायता से जिस प्रमाण की सङ्गति मिलती है, वही वास्तविक प्रमाण कहलाता है। माध्व-मत में अविरोध वाक्यों की उपस्थिति में शुष्क तर्कों का ग्रहण नहीं करना चाहिए। इस सम्बन्ध में मध्वाचार्य ने इस नियम की व्यवस्था की- 'अनुमानतोऽन्ये न कल्पनीयाः'[२३] अर्थात् अनुमान से किसी अन्य ब्रह्म की कल्पना नहीं करनी चाहिए क्योंकि अनुमान प्रमाण से युक्त नहीं होता है और श्रुति की सहायता के बिना भी अनुमान से होने वाला ज्ञान यथार्थ नहीं रहता है।[२४] ब्रह्म अनुमान से नहीं, अपितु शास्त्र से ज्ञातव्य है। उपनिषदों में श्रुतिवाक्यों के द्वारा ही उसे ज्ञेय बतलाया गया है।

पुनः अनुमान प्रमाण के विषय में मध्व का स्पष्ट कथन है- 'शक्यत्वाच्चानुमानानां सर्वत्र'[२५] अर्थात् शब्द से जो अर्थ सम्भव होता है सभी स्थलों पर उसी का अनुमान किया जाता है। अनुमान प्रमाण के सन्दर्भ में आचार्य पुनः वाराह प्रमाण से वचन उद्धृत करते हैं कि आगम और पुराणों को समझे बिना किसी भी स्थल पर अनुमान करना सम्भव नहीं है अर्थात् आगमशास्त्रों को सम्यक् प्रकार से समझे बिना अनुमान

२३. पूर्णप्रज्ञभाष्य, पृ० ११

२४. न चानुमानस्य नियतप्रामाण्यम्। पूर्णप्रज्ञभाष्य, पृ० ११

२५. पूर्णप्रज्ञभाष्य, पृ० १२

२६. सर्वत्र शक्यते कर्तुम् आगमं हि विनानुमा।
तस्मान्न सा शक्तिमती विनागमनमुदीक्षितुम्॥ पूर्णप्रज्ञभाष्य, (वाराहपुराण का वाक्य, 'शास्त्रयोनित्वात्' सूत्रव्याख्या में उद्धृत), पृ० १२

करने की योग्यता एवं सामर्थ्य भी विकसित नहीं हो पाता। अनुमान करने से पूर्व आगमशास्त्रों का समुचित अध्ययन आवश्यक है।[२६] अतः मध्वाचार्य ने अनुमान प्रमाण से अधिक महत्त्व श्रुतिप्रमाण और आगम शास्त्रों को दिया है।

'तत्तु समन्वयात्' सूत्र की व्याख्या में मध्व ने ब्रह्म के विषय में शास्त्र के प्रामाण्य का प्रतिपादन किया है कि ब्रह्म शास्त्रगम्य है। उपक्रम-उपसंहार, अभ्यास, अपूर्वता, फल, अर्थवाद और उपपत्ति- इन छः प्रकार के तात्पर्य निर्णायक लिङ्गों से युक्तियुक्त निरूपण करने पर शास्त्रप्रतिपादित ब्रह्म (विष्णु) का ज्ञान होता है। इसमें मध्व ने भागवतपुराण का वचन उद्धृत किया है कि "शास्त्रों में मुझे ही तत्त्व रूप से निर्णय और नियत किया गया है तथा अनेक रूप से और तर्क द्वारा स्थापित करने योग्य भी एकमात्र मैं ही हूँ। इन श्रुतियों का मैं ही हृदय हूँ। मेरे अतिरिक्त किसी और को मत जानो।"[२७] पूर्वपक्ष के द्वारा 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह',[२८] अवचनेनैव प्रोवाच यद्वाचाऽनभ्युदितम्'[२९] एवं 'येन वागभ्युद्यते यच्छ्रोत्रेण न शृणोति'[३०] इत्यादि श्रुतियों को उद्धृत कर ब्रह्म की शब्द गोचरता के निषेध का

२७. मां विधत्तेऽभिधत्ते मां विकल्प्योऽपोह्य इत्यहम्।
इत्यस्या हृदयं साक्षान्नान्यो मद्वेद कश्चन ।। श्रीमद्भागवद्पुराण ११.२१.४३ (पूर्णप्रज्ञभाष्य, 'तत्तु समन्वयात्' सूत्रव्याख्या में उद्धृत), पृ० १३

२८. तैत्तिरीयोपनिषद १२.४.१

२९. पूर्णप्रज्ञभाष्य, पृ. १४

३०. केनोपनिषद १.४

कथन करने पर मध्व ब्रह्म के वाच्यत्व को पुराणवाक्यों एवं श्रुतिवाक्यों के विलक्षणतापूर्वक समन्वय कर प्रदर्शित करते हैं कि 'स एतस्माज्जीवघनात् परात् परं पुरिशयं पुरुषमीक्षते',[३१] 'विज्ञाय प्रज्ञां कुर्वीत'[३२], 'सर्वे वेदा यत् पदमामनन्ति'[३३] इत्यादि श्रुतियों से उसका ईक्षणीयत्व और वाच्यत्व सिद्ध होता है क्योंकि उसके विषय में अप्रसिद्ध कथन को श्रुति के वचन कथ्य सिद्ध कर देते हैं । अतः ब्रह्म का अवाच्यत्व नहीं कहा जा सकता ।[३४]

मध्वाचार्य के दर्शन का समन्वय किस प्रकार पुराणों के साथ है मध्व के दर्शन में श्रुति, स्मृति और पुराणवाक्यों का समायोजन चतुःसूत्री के सम्बन्ध में देखा जा सकता है। मध्वाचार्य ने कुछ शब्दार्थ-भेद से सूत्र का जिज्ञास्य विषय ब्रह्म ही माना है। 'अथातो ब्रह्मजिज्ञासा' सूत्र में 'अथ' शब्द से मङ्गलार्थक, अधिकारवाचक इत्यादि अर्थ की सिद्धि में श्रुतिप्रमाण, स्मृतिप्रमाण के साथ पुराण से भी प्रमाण उद्धृत किये हैं । सूत्र में निर्दिष्ट 'ब्रह्म' पद के व्याख्यान में ब्रह्मवैवर्त्त आदि पुराणों के वाक्यों से व्याख्यान किया है। 'जन्माद्यस्य यतः' सूत्र के द्वारा ब्रह्म का लक्षण जगज्जन्मादि के निमित्तकारण के रूप

---

३१. प्रश्नोपनिषद ५.५

३२. बृहदारण्यकोपनिषद २३

३३. कठोपनिषद २.१५

३४. अप्रसिद्धेरवाच्यं तद् वाच्यं सर्वागमोक्तिः ।
अतर्क्यं तर्क्यमज्ञेयं ज्ञेयमेवं परं स्मृतम् ।। पूर्णप्रज्ञभाष्य, (गरुडपुराण का वाक्य, 'ईक्षतेर्नाशब्दम्' सूत्रव्याख्या में उद्धृत), पृ० १४

में किया है। सूत्र के समुचित अर्थ के आलोढन में जितने श्रुतिप्रमाण एवं स्मृतिप्रमाण उद्धृत हैं वहीं पुराणवाक्य प्रमाणों का भी आधिक्य है। यह आचार्य मध्व के दर्शन का विशिष्टतम अंश है। 'शास्त्रयोनित्यत्वात्' सूत्र में ब्रह्मज्ञान के साधन में शास्त्र को ही प्रमाण माना है और 'तत्तु समन्वयात्' सूत्र में पुराण के वाक्यों को शास्त्रप्रमाण के साथ विश्लेषित करते हुए ब्रह्मज्ञान में पुराणों को प्रमुखशास्त्रप्रमाणकत्व के रूप में प्रतिपादित किया है। उपर्युक्त चतुःसूत्री का अनुशीलन करने पर निम्न दृष्टि से आचार्य मध्व का पुराणों के प्रति वैशिष्ट्य ज्ञात होता है-

* आचार्य मध्व ने जहाँ-जहाँ वेद में, शास्त्रों में और प्रस्थानत्रयी में ब्रह्मपरक, जीवपरक एवं आत्मपरक शब्दों का दर्शन एवं श्रवण किया है उन स्थलों पर पुराणों में विद्यमान शब्दों को आधार करके प्रमाण सहित सिद्धान्तों को प्रस्तुत किया है।

* तत्त्व की दृष्टि से मध्व का पुराणों के प्रति वैशिष्ट्य इस दृष्टि से स्पष्ट होता है कि शङ्कराचार्य ने यत्र-तत्र पुराण-स्मृतिवाक्यों के साथ अत्यधिक स्थलों पर श्रुतिवाक्यों के ही उद्धरण प्रस्तुत किए हैं किन्तु मध्वाचार्य ने पुराणवाक्यों के अनुसार श्रुतिवाक्यों और स्मृतिवाक्यों को समायोजित करके सप्रमाण विशिष्ट मतों की स्थापना की है।

* सामान्य जन रामायण, महाभारत एवं पुराणों में वर्णित दैनन्दिन तत्त्वों का अपने जीवन में व्यवहार करते हैं। अति सामान्य जन भी विग्रह आराधना (मूर्ति के रूप में देवताओं का अर्चन) करते हैं और

विग्रहाराधन की कथा पुराणों में उपलब्ध है। मध्वाचार्य ने पुराणों में विद्यमान कथाओं एवं विग्रहाराधन की पद्धतियों का संग्रह करके अपनी रचनाओं में स्थापित किया है।

* महाभारत के अनुसार- 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्'[३५] अर्थात् वेदों के अर्थ को विस्तार से समझने के लिए इतिहास और पुराणों का अवलम्बन करना चाहिए । इतिहास-पुराण के द्वारा हमें अपने पूर्वजों की जीवनपद्धति और जीवन-तत्त्वों आदि का ज्ञान होता है। मध्व इस उक्ति को चरितार्थ करते हैं क्योंकि मध्व के दर्शन में लौकिक दृष्टान्तों से युक्त सिद्धान्तों का प्राधान्य है।

* मध्वाचार्य के दर्शन में पुराण के अंश सर्वाधिक है- इस तथ्य पर विचार करने पर स्पष्ट होता है कि महर्षि व्यास प्रणीत अष्टादश पुराण वेदशास्त्र के तुल्य है। आचार्य मध्व ने अपने दर्शन में यह सम्पूर्णतया प्रदर्शित किया है। वस्तुतः सामान्यजन अपने जीवन में पुराणवाक्यों एवं पुराणनिहित सिद्धान्तों को स्वीकार करते हैं। इस कारण से मध्वाचार्य ने अपने दर्शन में पुराणवाक्यों को सर्वाधिक महत्त्व दिया है जिससे समाज का प्रत्येक वर्ग लाभान्वित हो सके।

अत एव आचार्य मध्व ने 'द्वा सुपर्णा सयुजा सखाया',[३६] 'ऋतं पिबन्तौ'[३७] इत्यादि श्रुतिवाक्यों को स्वीकार करके, अपने समय की

---

३५. महाभारत १.१.२६७

३६. मुण्डकोपनिषद ३.१.१

३७. कठोपनिषद ३.१

परिस्थितियों का सम्यक्तया विचार करके तथा लोगों के सामर्थ्य को देखकर श्रुति, पुराण और तर्क के बल पर वेदान्तसूत्र भाष्य का प्रणयन किया। यद्यपि केवलाद्वैत के आचार्यों ने तर्क, चिन्तन और अनुभवों को पुष्ट करने के लिए प्रस्थानत्रयी में परिगणित श्रुतिवाक्यों, श्रीमद्भगवद्गीता एवं वेदान्तसूत्रों को प्रमाणस्वरूप प्रस्तुत कर अपने मत का स्थापन किया है, किन्तु मध्व ने भक्तिमार्ग का उद्धार करने के लिए अपनी कृतियों में सूत्रार्थ की पुष्टि एवं समर्थन में विविध आगम-पुराणों से अधिक प्रमाण प्रस्तुत किए हैं। मध्वाचार्य ने विलक्षणता के साथ सविशेष ब्रह्म के प्रतिपादन में पुराणवाक्यों, स्मृतिवाक्यों और श्रुतिवाक्यों को एकत्रित करके अपना विशिष्ट मत स्थापित किया है। मध्वाचार्य ने द्वैत सिद्धान्तों का दृढता से प्रतिपादन करते हुए गरुड पुराण, विष्णु पुराण, भागवतपुराण, स्कन्दपुराण, नारद पुराण एवं ब्रह्मवैवर्त्त आदि पुराणों तथा वेद प्रतिपादित विष्णुदेव प्रतिपादक श्रुतियों का और पुराणवाक्यों का तर्कपूर्वक समन्वय किया है। सर्वोच्च ब्रह्म के रूप में विष्णु की उद्घोषणा करना मध्वाचार्य का अन्यतम वैशिष्ट्य है । यही द्वैतवेदान्त की प्रसिद्धि का कारण है। वस्तुतः तत्त्वानुसन्धान में पुराणों की आवश्यकताओं का वैशिष्ट्य मध्वाचार्य ने अपने रचनाओं में प्रतिपादित किया है। मध्वाचार्य का यह कार्य पुराण साहित्य के प्रति उनके विशिष्ट योगदान को रेखांकित करता है।

## सन्दर्भग्रन्थ-सूची

गंगूर, पं. मध्वाचार्य रामाचार्य, श्रीसर्वमूलग्रन्थः, भाग-२,

परमपूज्य श्रीप्रज्ञाननिधितीर्थश्रीपादाः, श्रीप्रसन्नराघवेन्द्रस्वामिमठः, कोलार, बेंगलुरु, १९९८.

गोस्वामी, आचार्य ललित कृष्ण, श्रीमाध्ववेदान्त (पूर्णप्रज्ञभाष्य), श्री निम्बार्क पीठ, प्रयाग, संवत् २०३१.

बन्नञ्जे गोविन्दाचार्यः, श्रीमहाभारततात्पर्य्यनिर्ण्णयः, प्रथमो भागः, तत्त्वसंशोधनसंसत् विद्यामान्यप्रकाशनम्, उडुपि, २००९.

मध्वाचार्य विरचित सर्वमूल प्रकरणग्रन्थ - available on archive.org, १८९१.

मुनिलाल (अनुवादक), विवेक-चूडामणि (श्रीमदाद्यशङ्कराचार्य विरचित), गीताप्रेस गोरखपुर , संवत् २०७३.

शर्मा, चन्द्रधर, भारतीय दर्शन : आलोचन और अनुशीलन, मोतीलाल बनारसीदास, नई दिल्ली, २०१३.

शुक्ल, चण्डीप्रसाद, कृष्णकान्त शास्त्री (सम्पादक), ब्रह्मसूत्रशाङ्करभाष्य (रत्नप्रभा टीकासहित), अच्युतग्रन्थमाला कार्यालय, काशी, संवत् १९९१.

सिंह, पं. उदय नारायण, सर्वदर्शनसंग्रह (मध्वाचार्य विरचित), लक्ष्मीवेङ्कटेश्वर मुद्रणालय, मुम्बई, १८४७.

Shanbagh, D.N., MADHVĀCĀRYA'S CONTRIBUTION TO INDIAN THOUGHT, Shri Rama Prakashana, Dharwad, 1996.

# An excerpt from the Bhāgavata Tātparya Nirṇaya

The Bhāgavata Tātparya Nirṇaya is a unique and important work of Ācarya Madhwa. The Sumadhva Vijaya states that the Bhāgavata Tātparya Nirṇaya is like a guide for those who wish to tread the path of the Purāṇas, but are not in a position to understand their true purport as they are not equipped to interpret them.

Without the help of the Bhāgavata Tātparya Nirṇaya, an average reader is bound to end up with misconceptions and doubts. Ācarya, with his unique style not only elucidates many new epistemological and philosophical aspects, but also clarifies many doubts, quotes from other Purāṇas to supply missing links, states the correct meanings of many words and phrases by referring to different lexicons and clears seemingly contradictory situations. Whenever there is a possibility of misunderstanding a word or a phrase, Acharya steps in and reveals to us the heart of Lord Śrī Vedavyāsa.

One such example of Ācarya's contribution can be found in the story of Ajāmila in the sixth skanda of the Bhāgavata.

## The Story of Ajāmila

In the city of Kanyakubja, there lived a pious brahmin youth called Ajāmila. One day, his father asked him to fetch fruits, flowers and twigs for the sacrificial fire (samith) from the forest. Going to the forest he saw a half clad sudra woman with her lover and was attracted by her. The attraction was so much that he abandoned his parents and his young wife and

started living with this woman. He forgot his duties and gave up all spiritual obligations. He spent all his money to keep this woman happy. When his resources were exhausted, he did not hesitate to get money by dishonest means. The woman bore him many children and his last son was named Nārāyaṇa. Many years rolled by and now Ajāmila was an old man of eighty years and on his death bed. Soon, three messengers of Yama came to take him to their master. Seeing these dreadful men, Ajāmila was filled with fear. Then he saw his son Nārāyaṇa playing at a distance and called out his name. He was at once reminded of the glorious Lord Śrīman Nārāyaṇa because of his previous samskara. Thinking of the Lord, his heart was filled with deep remorse for all his past misdeeds. The moment Ajāmila chanted the Lord's name, the servants of Lord Viṣṇu appeared there. They stopped the messengers of Yama from tightening the noose around Ajāmila. The messengers of Yama who were thus prevented, spoke to the servants of Lord Viṣṇu, 'Who are you? How dare you stop Lord Yama's orders? From where have you come? You are so handsome; you are dressed in yellow silk and are adorned with a crown. You wear a garland of lotuses around your neck! This old man Ajāmila has committed many crimes and deserves to be punished in hell. Do not stop us from taking him''. The servants of Viṣṇu replied, 'We will not allow you to take Ajāmila, as he has remembered the Lord.

Whatever be his sins, wanting to call his son, he has actually called our Lord and Master, with a heart filled with great devotion and remorse for his past deeds. He has atoned not only for the sins committed in this life but also for sins

committed by him in millions of past lives. So, you have no right to touch him''. The messengers of Yama realising that they could not get Ajāmila in their custody, went back.

The Bhāgavata then elaborates the conversation the messengers of Yama had with Yama and then states that Ajāmila attained liberation due to his chanting of the Lord's name.

This story seemingly suggests that Ajāmila attained salvation merely by calling out his son pronouncing, 'Nārāyaṇa!' and immediately, the servants of Lord Viṣṇu appeared and took him to Vaikunṭa, the Lord's abode. One may also mistakenly conclude that one can commit any number of sins and at the end, utter the Lord's name just once and attain liberation.

Śrī Madhvacārya, in his Bhāgavata Tātparya Nirṇaya quotes from the Nārada Puraṇa to clear this doubt and states

.....सर्वथा अघहरं विष्णोर्नाम तद्भक्तिपूर्वकम् । अभक्त्योदाहृतं नैव फलदातृ भविष्यति । .....अजामिलोपि स्मरणात् भक्त्या म्रुत्योरमुच्यत इति नारदीये

Merely Chanting the Name of the Lord can cleanse a person of all sins only if uttered with bhakti - right knowledge combined with dispassion. Chanting the name of the Lord by a person who is not a devotee of the Lord or without the right devotion will not fetch any result. It is not true that Ajāmila attained liberation by merely uttering the name of the Lord just once, but due to intense devotion only.

Ajāmila witnessed the entire conversation between the

servants of Lord Viṣṇu and the messengers of Lord Yama. Great was his wonder at the efficacy of the Lord's name. The conversation between the servants of Lord Viṣṇu and the messengers of Lord Yama added to his dispassion. With a heart and mind turned towards God and away from the pleasures of the senses, he went to Haridwar and engaged himself in deep meditation of the Lord. After several years of performing intense penance he attained liberation.

The story of Ajāmila tells us how forgetting the Lord for a long time brings misery and how remembering the Lord even for a moment, destroys vast amounts of misery and sorrow. If we constantly have the Lord in our mind, we will never go astray. Even if by chance we tread the path of adharma, remembering the Lord will save us. Harināmasmaraṇa is the most efficient protective gear against all dangers.

Thus Ācarya Madhva upholds the merit in the chanting of the Lord's name and at the same time emphasises that only true devotion is the means to attain salvation and clears with conviction and authority the doubt that a mere mechanical chanting of the Lord's name can cleanse a person of all sins and result in liberation.

